CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

सागरिका

षड्विंशवर्षे तृतीयोऽङ्कः

२६.३

वि० सं० २०४५

प्रकाशिका
सागरिका-समिति
महामनापुरी
वाराणसी ५
B. H. U.

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

सागरिका

षड्विंशवर्षे तृतीयोऽङ्कः

२६·३

विक्रमसंवत् २०४५

सम्पादकाः

रामजी उपाध्यायः

रेवाप्रसाद द्विवेदी

राधावल्लभ त्रिपाठी

रामगोपाल मिश्रः

प्रकाशिका

सागरिका-समितिः

महामनापुरी

वाराणसी—५

(B. H. U.)

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

प्रचारिका व्यवस्थापिका च
सागरिका-समितिः
गौरनगर, सागर

देयम्

प्रत्यङ्कम्		५.०० रूप्यकाणि
वार्षिकम्		२०.०० रूप्यकाणि
आजीवनग्राहकस्य		२००.०० रूप्यकाणि
प्राचीनाः सर्वेऽङ्काः सवस्त्रपुटबन्धाः		१०००.०० रूप्यकाणि
वर्ष १-५	प्रत्यङ्कम्	१५.०० रूप्यकाणि
वर्ष ६-१०	,,	१२.०० रूप्यकाणि
वर्ष ११-१५	,,	१०.०० रूप्यकाणि
वर्ष १६-२०	,,	८.०० रूप्यकाणि
वर्ष २०-२५	,,	६.०० रूप्यकाणि
अङ्कप्रकाशः		प्रतिवर्षम्—आषाढाश्विन-पौष-चैत्रमासेषु [जून-सितम्बर-दिसम्बर-मार्च]

मुद्रकः
श्री विद्याप्रेस
छित्तूपुर, बी० एच० यू०, वाराणसी

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

विषय-सूची

१.	श्रीरेवाभद्रपीठकाव्यम्—रेवाप्रसाद द्विवेदी	१
२.	वेदमूलकं गान्धर्वम्—विनायको 'रटाटे'	३७
३.	प्राभाकरमीमांसानये प्रत्यक्षप्रमाणस्वरूपम् —डा० राजेन्द्रनाथशर्मा	४१
४.	णत्वविधाने पाणिनिः —श्रीहरिनारायण तिवारी	४५
५.	सप्तद्वीपवती पृथ्वी—कैलाशनाथ द्विवेदी	५५
६.	सहार्थश्च साहित्यम्—बालशास्त्री	६१
७.	विकृतिसमानवचनकत्वमाख्यातस्य—देवनारायणझा	६७
८.	द्वौ कालिदासौ—रमाशंकर तिवारी	७५
९.	मम कविता—रेवाप्रसाद द्विवेदी	९१
१०.	शक्तितत्त्व-समीक्षा—एन० आर० श्रीनिवासन्	१०१
११.	पीयूषधाराटीकाया व्यापकत्वम्—कामेश्वर उपाध्यायः	११३
१२.	लक्षणायाः शाब्दबोधः —जागृति पाण्ड्या	१२३
१३.	ग्रन्थसमीक्षा—कुसुमभूरिया	१२९

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

॥ श्रीः ॥

श्रीरेवाभद्रपीठकाव्यम्

रचयिता

रेवाप्रसाद-द्विवेदी

सनातनः

काशीहिन्दूविश्वविद्यालयः

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

पीठिका

यत्र वाङ्मनसोल्लासं दृश्यमानमिदं जगत् ।
भासते प्रतिसंक्रान्तं नमस्तस्मै स्वयम्भुवे ॥

नाहं भवामि रविकीर्त्तिरपास्य देवं
यो वै धिनोति पुलकेशिनमेव काव्यैः ।
नो वत्सभट्टिरपि यः खलु पट्टवाय-
श्रेणीं विभूषयति तैर्यदि वा कुमारम्[1] ॥

अस्म्येष भूतचितिसंयुतिजाततीर्थ-
दिव्यावदान — परिकीर्त्तन — पुण्यपाकैः[2] ।
वाग्देवतामिव निजां जननीं प्रणन्तुं
श्रीनर्म्मदां भगवतीं तु निबद्धभावः ॥

नाहं भवामि खलु पण्डितराज[3] एव
क्षीणार्थकश्च परिभावितशब्दकश्च ।
देवस्तुतिः कृपणता च कदापि नास्तां
राष्ट्रेऽत्र संस्कृतधियां मिलिते वचःसु ॥

तीर्थायते न खलु केवलमम्भ एव
पात्रं न वा न च तटं सरितां स्तुतीनाम् ।
तत्तीरगा जनपदा जनतास् तदीया
[4]जीवातवश्च न न तीर्थयितुं क्रमन्ते ॥

सर्वं तदत्र कृपणेतर-भाववन्धमा-
धाय वाक्षु हृदयादुदितासु रेवाम् ।
श्रीनादनेरसहितां प्रणमन् भवामि
धन्यश्रमः समुपहृत्य विदां वरेभ्यः ॥

---

१. कुमारगुप्तनामानं गुप्तशासकम् ।   २. ०पाकैः काव्यरूपैः ।
३. पण्डितराजो गङ्गालहरीकविः ।
४. अत एव सजनजनपदायाः श्रीरेवायाः स्तवः ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

यत् 'सेन्ससे'-ति युगमद्यतनं जनानां
संख्यासु कश्चिदुररीकुरुतेऽभियोगम् ।
तं सेतिहासमिह पश्यतु काव्यभाषा-
पात्रीषु कीर्णममृतं नु बुधः स्वमातुः ॥

[1]तारल्यमेव हृदयस्य कवित्वमद्य
यः स्वीकरोति कुरुतां स तथा यथेच्छम् ।
आद्यामृचं स कलयेदकवित्वदिग्धां
स्वैरं निजां च जननीं व्यभिचारजुष्टाम् ॥

हट्टो ममास्ति मम चापणिका ममैव
द्रव्यं भवाम्यहमथो वणिगित्यनर्हैः ।
अर्हा[2] सनातनतमा यदि सिद्धिमुग्धा-
प्युज्झास्यतेऽद्य, ननु तां वयमर्हयामः ॥

भवति कविता रेवा सानातनी श्रुतिमङ्गला
स्पृशति हृदयं सैषा सूते च तत्र सुधाधुनीम् ।
भरतभुवनाभोगालोकाः मनस्विमहर्षयः
कृतमतितरां मौनैर् भूयोऽद्य जाग्रत जाग्रत ॥

इति निवेदयामः काश्यपाः श्रीरेवाप्रसादद्विवेदिनः सनातनाः
काशीहिन्दूविश्वविद्यालयः

अधिकज्येष्ठ कृष्णा–११, वि० सं० २०४५, दिनांक १०-६-८८

---

१. तारल्यविशेषाय जनन्यां व्यभिचारिणीत्वमेषामावश्यकाभ्युपगमकम् ।
२. अर्हा मूल्यम् ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

श्रीरेवाभद्रपीठम्

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

॥ श्रीः ॥

श्रीरेवाभद्रपीठम्+

(१)

वन्दे श्रीनर्म्मदाम्बां सलिलपुलिनयोः सारसद्वन्द्वगीतां
चक्रश्रीप्रीतिलीलां[1] रसयति भगवान् यत्र सार्धं भवान्या ।
वन्दे चास्यैव शिष्यं[2] प्रभवति परशौ यस्य दण्डाधिकारे
सुस्था गौर्मानवीया सुभगयति सुखं स्वाः प्रजाः स्वै रसौघैः ॥

(२)

अस्ति श्रीनर्म्मदायाः सलिलवति[3] तटे [4]नादनेराभिधानो
ग्रामो भोपालभुक्तौ बुधनिजनपदे शाहगञ्जे च थाने ।
यत्पृष्ठे बोरनाऽऽस्ते लसति च पुरतः खर्वटः कोऽपि ढाना
पूर्वस्यां वामभागे कुसुमपदयुतः खेटको जोन्तलावत् ॥

(३)

मार्गा यत्र भवन्ति पञ्च तरवो बिल्वप्रधाना गृहा
मृत्स्नादारुक-[5]खर्पराभिरचिता भूम्ना[6] सुधाभिः सिताः ।
पूर्वस्यां दिशि यत्र राजतितरां कामप्रदाख्यः[7] शिवः
सिन्दूरारुणविग्रहश्च भगवान् पृष्ठे महान् मारुतिः ॥

+ काव्यस्यास्य नामकरणे मूलमस्यैव काव्यस्य 'मातर्मेकले'-ति ६७पद्यम् ।

१. चक्रश्रीः चक्रवाकश्रीः श्रीचक्रञ्च । २. शिष्यः परशुरामः ।

३. सलिलवति, न तु पुलिनवति । तत्र पुनर्ढानानामकः खर्वटः ।

४. नन्देश्वर इति नन्दीश्वर इति नान्देर इति च यस्य पर्यायः भोपालनगरं मध्यप्रदेशराजधानी बुधनीति तहसीलम्, शाहगंज इति थाना, बोरना ढाना जोन्तलेति ग्रामान्तराणि, कुसुमपदयुतः खेटकः 'कुसुमखेड़ा' इति नामा ग्रामः । खेटकखर्वटयोः कृते द्र० श्रीभागवतारम्भे नारदवृत्तान्तः । खेटः खर्वटश्चेति लधिष्ठानां ग्रामाणां संज्ञा ।

५. खर्परः खपरैलपदवाच्योऽर्थः । ६. भूम्नेति कथिते पक्वेष्टकमयानां भवनानामल्पता सूच्यते । 'गृहे गृहाश्च पुंभूम्नी'-तिमेदिनी । सुधा छुई मिट्टी । ७. भगवानेषोऽत्र मनकामनेश्वर इत्युच्यते ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

(४)

यस्मिन् दुर्लभदेव[१] इत्यभिहितः श्रीभैरवश्चत्वरे
मुक्ते भ्राजति, राजते तरुतले चाम्बा महाभैरवी[२]।
मध्ये यस्य [३]महेन्द्रकेतुयुगली विभ्राजते गैरिकै-
र्लिप्ता व्योम्नि समुच्चलद्ध्वजपटद्वन्द्वा प्रकाण्डोच्छ्रया ॥

(५)

यस्मिन् माखनलाल[४] इत्यभिहितो भाषाकविः शैशवे
विद्यामभ्यसितुं [५]पितृव्यशरणेऽवात्सीत् समाः काश्चन।
यत्र ज्यौतिषपण्डिताः समभवन् सारस्वतव्याकृतौ
निष्णाता मम [६]तातपादसदृशास्तेजोधनाः शासनाः ॥

(६)

गौडा[७] यत्र भवन्ति केचिदपरे [८]शुक्लाः परे भार्गवा[९]
विप्रैः [१०]पाठकसंज्ञकैश्च सहिताः केचिद् द्विवेदोत्तमाः[११]।
श्रीमद्भागवतेऽभिषेकसवने शम्भोर्महिम्नःस्तुतौ
श्राद्धे काव्यकलाकलापभणितौ येषाममेयं यशः ॥

(७)

राजन्याः खलु यत्र सन्ति विपुलश्रीका भुवां स्वामिनः
प्राज्यानां श्रुतिमङ्गले पथि भृतश्रद्धाः समानाश्च ये।
येषां गौरवगाथया रसवती रेवा निदाघेष्वपि
क्षीणत्वं न दधाति गर्व्वशिखरिप्रोद्भूतसन्तानया ॥

(८)

वैश्या यत्र भवन्ति भूतिमहिता, यस्मिन् गुरौ वासरे
हट्टः संभ्रियते प्रशासनकृतो यत्रास्ति विद्यालयः।
भैषज्यस्य कृतेऽपि यत्र सुलभा काचिद् व्यवस्थान्वहं
पत्राणामपि यत्र संवितरणं सञ्जायते शासनात् ॥

---

१. दूलहदेवनाम्नो ग्रामदेवता। २. मातामाँईति यस्याः संज्ञा।
३. इन्द्रध्वजमुगली। ४. माखनलालचतुर्वेदी। ५. पितृव्यस्य वंशीधरस्य।
६. मम रेवाप्रसादस्य तातपादाः पं० श्रीनर्मदाप्रसादद्विवेदिनः।
७. वंशीधरश्चतुर्वेदी गौडः। ८. हरप्रसादप्रभृतयः शुक्लाः।
९. उमाशङ्करप्रभृतयः। १०. हरगोविन्दादयः।
११. द्विवेदिनो वयमस्मन्महत्तराश्च श्राकालूरामरामनारायणप्रभृतयः।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

(९)

नारीणां वसनानि यत्र लँहगा[१] चोली[२] सशाटी, शिरो-
भूषायै ननु रेखड़ी[३], [४]गुणशतैः केशेषु सन्नद्धता।
यासां वै [५]कटिदोरकेण विपुलाभोगेन संशोभितं
मध्यं तन्त्रति सार्थकीकृतिविधौ मध्यप्रदेशश्रुतौ॥

(१०)

ताटङ्कं[६] श्रवसोः सुवर्णरचितं ग्रीवासु [७]कण्ठावृता
स्वार्णालङ्कृतिरङ्गनासु भजते [८]बाजट्टिका च श्रियम्।
बाजूबन्द[९]युगान्विते भुजयुगे [१०]चूड़ा [११]वतानान्विता
पादे वृश्चिक[१२]-पायजेब[१३]-कटिका[१४] गर्वाय संजाग्रति॥

(११)

यासां [१५]चूनरसंज्ञकं निवसनं गौरे शरीरे लस-
न्नानावर्णशुभं दिशामपि तनुं संमण्डयद् द्योतते।
यासां वै [१६]मदयन्तिकाऽरुण-कर-द्वन्द्वाङ्घ्रियुग्माब्जिनी-
षण्डे चञ्चलतां जिहासतितरां स्वाभाविकीं श्रीः स्वतः॥

---

१. लँहगा पेटीकोटपदवाच्यम् अधोवस्त्रम्। २. वक्षःकञ्चुकिका।
३. सीमन्ताग्रे धार्यमाणः सौवर्णोऽलङ्कारः।
४. गुणाः सूत्राणि, तैराबध्य रचितः केशपाशः।
५. कटिदोरकं नाम कड़्डोरापदवाच्या सुवर्णादिभिर्निर्मिता मेखला।
६. ताटङ्कं करनफूलपदवाच्यं कर्णभूषणम्।
७. द्वादशभिर्दशभिरेव वा बृहदाकारैः सौवर्णैर्माणिक्यैर्निर्मितं कण्ठभूषणम्।
८. बजट्टीति पदवाच्या सुवर्णगुलिकामयी गलपट्टिका।
९. बाजूबन्दं नाम भुजबन्धनालङ्कारः।
१०. चूड़ा मणिबन्धधार्यो राजतः सौवर्णो वाऽलङ्कारविशेषः कङ्कणप्रायः।
११. चूडाकल्प एव किङ्किणिकावृन्दचतुष्टयेन युक्तोऽलङ्कारः।
१२. विछियेति पादयोरङ्गुलित्रये परिधार्यं राजतं मुद्रिकाप्रायं सौभाग्यवती-नामपरिहार्यं भूषणम्। १३. पॉयजेबेति संज्ञकानि भूषणानि येषां रिक्तेषूदरेषु झङ्कारोपयिक्यः स्थूलशर्करा निक्षिप्यन्ते।
१४. कटिका कड़ोति प्रसिद्धो राजतः पादमात्रालङ्कारः।
१५. चूनरं नाम चूनरीति चूँड़ीति चुन्दुदडोति चोच्यमानं चित्रं वक्षोवासः।
१६. मेंहदीति पदेन प्रोच्यो वनस्पतिविशेषः करतलादिरञ्जनाय प्रसिद्धः।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

(४)

यस्मिन् दुर्लभदेव[1] इत्यभिहितः श्रीभैरवश्चत्वरे
मुक्ते भ्राजति, राजते तरुतले चाम्बा महाभैरवी[2]।
मध्ये यस्य [3]महेन्द्रकेतुयुगली विभ्राजते गैरिकै-
र्लिप्ता व्योम्नि समुच्चलद्ध्वजपटद्वन्द्वा प्रकाण्डोच्छ्रया ॥

(५)

यस्मिन् माखनलाल[4] इत्यभिहितो भाषाकविः शैशवे
विद्यामभ्यसितुं [5]पितृव्यशरणेऽवात्सीत् समाः काश्चन।
यत्र ज्यौतिषपण्डिताः समभवन् सारस्वतव्याकृतौ
निष्णाता मम [6]तातपादसदृशास्तेजोधनाः शासनाः ॥

(६)

गौडा[7] यत्र भवन्ति केचिदपरे [8]शुक्लाः परे भार्गवा[9]
विप्रैः [10]पाठकसंज्ञकैश्च सहिताः केचिद् द्विवेदोत्तमाः[11]।
श्रीमद्भागवतेऽभिषेकसवने शम्भोर्महिम्नःस्तुतौ
श्राद्धे काव्यकलाकलापभणितौ येषाममेयं यशः ॥

(७)

राजन्याः खलु यत्र सन्ति विपुलश्रीका भुवां स्वामिनः
प्राज्यानां श्रुतिमङ्गले पथि भृतश्रद्धाः समानाश्च ये।
येषां गौरवगाथया रसवती रेवा निदाघेष्वपि
क्षीणत्वं न दधाति गर्व्वशिखरिप्रोद्भूतसन्तानया ॥

(८)

वैश्या यत्र भवन्ति भूतिमहिता, यस्मिन् गुरौ वासरे
हट्टः संभ्रियते प्रशासनकृतो यत्रास्ति विद्यालयः।
भैषज्यस्य कृतेऽपि यत्र सुलभा काचिद् व्यवस्थान्वहं
पत्राणामपि यत्र संवितरणं सञ्जायते शासनात् ॥

---

१. दूलहदेवनाम्नो ग्रामदेवता। २. मातामाँईति यस्याः संज्ञा।
३. इन्द्रध्वजयुगली। ४. माखनलालचतुर्वेदी। ५. पितृव्यस्य वंशीधरस्य।
६. मम रेवाप्रसादस्य तातपादाः पं० श्रीनर्मदाप्रसादद्विवेदिनः।
७. वंशीधरश्चतुर्वेदी गौडः। ८. हरप्रसादप्रभृतयः शुक्लाः।
९. उमाशङ्करप्रभृतयः। १०. हरगोविन्दादयः।
११. द्विवेदिनो वयमस्मन्महत्तराश्च श्रीकालूरामरामनारायणप्रभृतयः।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

(९)

नारीणां वसनानि यत्र लँहगा[१] चोली[२] सशाटी, शिरो-
भूषायै ननु रेखड़ी[३], [४]गुणशतैः केशेषु सन्नद्धता।
यासां वै [५]कटिदोरकेण विपुलाभोगेन संशोभितं
मध्यं तन्त्रति सार्थकीकृतिविधौ मध्यप्रदेशश्रुतौ॥

(१०)

ताटङ्कं[६] श्रवसोः सुवर्णरचितं ग्रीवासु [७]कण्ठावृता
स्वार्णालङ्कृतिरङ्गनासु भजते [८]बाजट्टिका च श्रियम्।
बाजूबन्द[९]युगान्विते भुजयुगे [१०]चूड़ा [११]वतानान्विता
पादे वृश्चिक[१२]-पायजेब[१३]-कटिका[१४] गर्वाय संजाग्रति॥

(११)

यासां [१५]चूनरसंज्ञकं निवसनं गौरे शरीरे लस-
न्नानावर्णशुभं दिशामपि तनुं संमण्डयद् द्योतते।
यासां वै [१६]मदयन्तिकाऽरुण-कर-द्वन्द्वाङ्घ्रियुग्माब्जिनो-
षण्डे चञ्चलतां जिहासतितरां स्वाभाविकीं श्रीः स्वतः॥

---

१. लँहगा पेटीकोटपदवाच्यम् अधोवस्त्रम्। २. वक्षःकञ्चुकिका।
३. सीमन्ताग्रे धार्यमाणः सौवर्णोऽलङ्कारः।
४. गुणाः सूत्राणि, तैराबध्य रचितः केशपाशः।
५. कटिदोरकं नाम कड्डोरापदवाच्या सुवर्णादिभिर्निर्मिता मेखला।
६. ताटङ्कं करनफूलपदवाच्यं कर्णभूषणम्।
७. द्वादशभिर्दशभिरेव वा बृहदाकारैः सौवर्णैर्माणिक्यैर्निर्मितं कण्ठभूषणम्।
८. बजट्टीति पदवाच्या सुवर्णगुलिकामयी गलपट्टिका।
९. बाजूबन्दं नाम भुजबन्धनालङ्कारः।
१०. चूड़ा मणिबन्धधार्यो राजतः सौवर्णो वाऽलङ्कारविशेषः कङ्कणप्रायः।
११. चूडाकल्प एव किङ्किणिकावृन्दचतुष्टयेन युक्तोऽलङ्कारः।
१२. विछियेति पादयोरङ्गुलित्रये परिधार्यं राजतं मुद्रिकाप्रायं सौभाग्यवती-नामपरिहार्यं भूषणम्। १३. पाँयजेबेति संज्ञकानि भूषणानि येषां रिक्तेषूदरेषु झङ्कारोपयिक्यः स्थूलशर्करा निक्षिप्यन्ते।
१४. कटिका कड़ोति प्रसिद्धो राजतः पादमात्रालङ्कारः।
१५. चूनरं नाम चूनरीति चूँड़ीति चुन्दुदडोति चोच्यमानं चित्रं वक्षोवासः।
१६. मेंहदीति पदेन प्रोच्यो वनस्पतिविशेषः करतलादिरञ्जनाय प्रसिद्धः।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

(१२)

प्रातर्या नवनीतमन्थनविधौ नेत्रेण मन्थानकं
भ्रामं भ्राममुदीरयन्ति मधुरं ग्रामीणकं गीतकम् ।
यत्तालेषु लयेषु च श्रुतिसुखेष्वाविष्क्रिया मूर्च्छनो-
च्छ्रायैः सूचिकयेव खे विदधते रागस्य संव्यानताम् ॥

(१३)

ता गच्छन्ति घटोद्वयीं कटितटे बाहौ च कृत्वा जला-
न्यानेतुं सवनद्वये ननु यदा कूपाय मुग्धाननाः ।
मञ्जीराणि निशम्य तत्पदगतान्यासिञ्जनाभाञ्जि भू-
माता तुष्यति पुष्यति श्रियमथो द्यौः सौभगव्रीडिता ॥

(१४)

कालुष्यं चिकुरेषु ता यदि भजेद्, भालेषु संभास्वरै-
श्श्वेताः कश्चन सेवते पुनरलंभावाञ्चितः शुद्धिमा ।
यस्मिन् संस्मृतिमात्रगेऽपि हृदयं दुग्धैरिवासिच्यते
शम्भोः पारदबाणतां च भजते संभावनैकास्पदम् ॥

(१५)

एकत्र प्रतिमापरं प्रवहति श्रीनर्मदाया जलं
यत्रान्यत्र च तादृशं हि सुभगाव्रातस्य सत् सौभगम् ।
किं कस्मादधिकायतामिह युगे कस्माच्च किं न्यूनता-
मन्वेत्वत्र भवो मनोभव इति द्वन्द्वोऽप्यलीको हि यत् ॥

(१६)

यासामङ्घ्रिसरोजयोररुणिमा लाक्षारसव्यर्थतां
संसाधय्य रसेन सिञ्चतितरां केनापि चेतस्तटीम् ।
कामाक्षीकरपुण्ड्रकाणि मधुरां यासां नतां भ्रूलता-
मन्वास्य प्रतियोगिता-रसमिदम्प्राथम्यतो बिभ्रति ॥

(१७)

यासां निर्मलनिश्छलानि नितरां संमुग्धिमव्रीडिता–
न्यक्षीणि क्षिणुतेतरामृजुतमा व्रीडैव सांसिद्धिकी ।
तारल्ये परिशिक्षितान्यपि न यान्यभ्यासनन्यक्क्रियां
पञ्चेषोश्चपलस्य यौवनभरेऽप्याविश्चिकीर्षन्तकि ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

(१८)

तासामल्पवपूंष्यनल्पतपसां चक्षुष्मतां पाकतः
पुण्यानामिव निर्मितानि दधते वासांसि धूलीं तु याम् ।
श्रीरेवातटजामिमां प्रणुवते नम्रेण मूर्ध्ना महा-
तीर्थानामयुतान्यपि क्षितितले मुक्तेः सभुक्तेः खनिम् ॥

(१९)

यच्चक्षुः कमठायते श्रुतिमहावाक्यार्थ – मन्थाचले
तत्तत्त्वार्थ — सुधोत्कटाद्भुतघट — प्रादुर्बुभूषास्वलम् ।
रेवाक्षेत्रनिवासिनां हलकृषिव्यापारमात्रात्मना-
मप्येषां परमर्षयोऽपि शुचितां गुम्फन्ति काव्योत्तमैः ॥

(२०)

मारो यत्र पुरन्ध्रिषु स्तुतिशतैः संतिष्ठते दीयतां
मह्यं कुक्षिषु रत्नधातृषु कृपां कृत्वाऽवकाशक्षणम् ।
नो चेद् वः खलु तुल्यकुल्यचरिता सृष्टिः कथं भाविनी
स्वाहाभिः स्वधया च तर्पितुमलं भावी च कः प्राग्भवात् ॥

(२१)

या काचिद् [1]वटिका शणैर्विरचिता त्रैगुण्यकार्यैरथो
सिक्ता मायिककञ्चुकस्तुतिशतैर्द्राघीयसी स्पन्दते ।
आबध्नन्ति तया तु यत्र यमिनः संवित्कुटीचारिणो
दस्यून् मत्सरिणो नमामि तमिमं श्रीनर्मदायास्तटम् ॥

(२२)

दम्भस्तम्बेरमाणामलिकफलकगां मौक्तिकीं मालिकां ये
पञ्चैः क्रूरै कराग्रैर्विकिरणकलनां लम्भयन्तेऽतिभीष्माः ।
श्रीरेवातीरभाजां विशकलितपरद्वन्द्वकोषास्त एते
प्राज्ञानां तर्कसिंहा अपि दधतितरामार्भटीं यत्र तीक्ष्णाम् ॥

(२३)

यस्मिन् स्तम्बेरमास्यो विलसति भगवान् कारुणा चारुतायां
द्वैतीयोकत्वशून्यां प्रणिहितमनसा प्रापितो भूमिमाढ्याम् ।
भक्तानां स्थूलमुक्ताफलधवलरुचां मोदकानां सपर्या
माङ्गल्यानां प्रवर्षैर्विनिमयविधिना यः कृतार्थीकरोति ॥

---

१. वटिका रज्जुः ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

(२४)

यस्मिन् वाग्देबताऽपि स्फुरति फलकगा कच्छपीमादधाना
द्वाभ्यां द्वाभ्यां सपुस्तामथ च करपुटाभ्यां स्रजं शुद्धिमुग्धाम् ।
सङ्गीताध्यात्मविद्यायुगलमिव महाकाव्यशारीरकेण[1]
या स्वं साहित्यविद्यामयमिव ललितैस्तैः प्रपुष्णाति गात्रम् ॥

(२५)

यस्मिन्नाम्रवनी बभूव महती श्रीपार्वतीजानिना
ध्युष्टायां नहि यत्र चापलमगाच्चापः सुमेघोरपि ।
यस्या गायति कोकिलोऽपि मधुरं कण्ठैः कषायैर्मधौ
दिव्यां काञ्चन पुष्पदन्तरचितां स्तुत्यां महिम्नः स्तुतिम् ॥

(२६)

सूर्यो यत्र शिलासु टङ्करचितः पद्मस्य मुद्रां दधद्
रथ्यासु प्रतिमापरः प्रतिपदं गर्भे भुवस्तिष्ठति ।
वीचिषु प्रतिबिम्बितानथ जडीभूतान् निजान् विग्रहान्
संक्रान्तिस्नपनेषु स स्वयमिह न्यासीकरोति प्रभुः ॥

(२७)

आदिक्रोड[2] इवाऽरुणेन वपुषा यस्मिँश्चतुर्भिर्भुजैः
श्रीमाली भगवान् विराजतितरां सुश्लिष्टमृष्टाङ्कनः ।
यस्मिन् भूरिव गीरपि प्रतिपदं मुग्धेव कन्या वरे
मूकां व्यक्तिमुपाददाति सुषमासौन्दर्यवारान्निधेः ॥

(२८)

यस्मिन् राजति लक्ष्मणादिसहितः श्रीजानकीजानिर-
प्याकारेण वृषार्कशुद्धरुचिना श्रीपुण्डरीकेक्षणः ।
[3]चातुर्विद्यवनीमहामृगपतिर्विप्रान्वयोऽद्यापि यं
नित्यं प्राङ्मुखमास्थितं समुदितश्रद्धः समभ्यर्चति ॥

---

१. काव्यशारीरकं काव्यशास्त्रम् २. क्रोडोऽपि तत्र लभ्यते । भूः क्रोडे गीः श्रीमालिनि मुग्धा कन्या वरे यथेत्यन्वयः ३. चतुर्वेदिनो द्विजाः ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

(२९)

यत्र प्लक्षतरोर्विशालवपुषश्छायां तमालप्रभां
सेवन्ते खलु कल्पवृक्षशिखरेष्वाबद्धपद्मासनाः।
भूयांसो जिनवर्धमानतनवस्तीर्थङ्करा लक्षणै-
स्तैस्तैर्मण्डितविग्रहा बहुतिथात् कालादिदानीमपि ॥

(३०)

संक्रान्तौ मकरस्य पर्वसु जना राहूपरागे वृषै-
र्युक्ताभिः शकटीभिरेत्य सहिता दारैः समाचिन्वते।
यस्मिन् पुण्यचयं प्रवाहिणि परब्रह्मद्रवे श्रद्धया
स्नानैः किल्विषशर्वरीरविकरैर्दानैश्च रेवाञ्चले ॥

(३१)

यस्मिन् केऽपि रथाङ्गनामविरुदाः सौभाग्यदाम्पत्ययो-
रौपम्ये प्रतिमानतां कविवरैर्दत्तां श्रयन्तो द्विजाः।
गोनर्देन तथाविधेन ललितक्रेङ्कारिणा स्पर्धितुं
चेष्टन्ते खलु क⁀क इत्यनुरुतैस्तस्मिन्नवज्ञानिनः ॥

(३२)

मीना यत्र सहस्रशः प्रवयसः पीनाश्च राजन्तकि
स्फारां राजतशौक्तिकीमिव परां स्निग्धां श्रयन्तः श्रियम्।
एषामेव हि लोलतामियमपि श्रोः शीलितां सङ्गते
निर्विश्रान्तिनि नो जिहासतितरामद्यापि सर्वङ्कषाम् ॥

(३३)

पृष्ठे मन्दरमाश्रयत् किल कृती यः सिन्धुमन्थाध्वरे
वंशस्तस्य च यत्र पुष्यतितरां कान्ति परां श्रीहरेः।
एतेनैव समुद्रबन्धनमखे रामस्य साहाय्यकृत्
कर्त्तुं सेतुरपारयिष्यत, नला नीला मुधैवार्थिताः ॥

(३४)

श्रीरेवापुलिनेषु यत्र सलिलक्लिन्नेषु शैवालिभि-
स्तैस्तैः पल्वलकैः श्रिया शबलितेषूर्व्वारुकावल्लरोः।
मेषे चापि वृषे च तिष्ठति रवौ रागाकुलाः श्यामलाः
पीनाङ्गा विवहन्ति हन्त मधुराः श्रीकृष्णबीजा मुदा ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

(३५)

यस्मिन् कर्कटिका जलार्द्रहृदयैर्धिन्वन्ति तैस्तैः फलै
रेवातीरतपोभिरेव निभृतं कुक्षिम्भरिष्णून् यतीन् ।
शुष्कैर्गोमयपिण्डकैरपगतज्वालाग्निगर्भैरहः-
शान्तौ यत्र पचन्ति वाटकयुगीं वार्त्ताकिनीं यात्रिणः ।।

(३६)

अन्नानीव जलानि यत्र मधुना स्फारेण मेदस्वितां
बिभ्रन्ति प्रविभान्ति कीरगरुतां संमण्डितानि श्रिया ।
भैषज्यागमपण्डिता अपि यतः सौस्थ्येषु शिक्षां परा-
मादातुं स्पृहयालुताकवलितस्वान्ताः समाशेरते ।।

(३७)

यस्योत्सेधिनि [1]खेटकेऽतिमहतः प्रत्नस्य कीर्णा लस-
न्त्यैतिह्यस्य परात्पराः प्रमितयो भित्तिप्रतोल्यादयः ।
मुद्रा यत्र यदा तदा नवनवा जाम्बूनदीया अथो
ताम्रीया अपि रत्नजातय इव प्रादुर्भवन्त्युज्ज्वलाः ।।

(३८)

रेवावारिपवित्रितास्तटतरुक्षुद्रामधुश्च्योतिनः
स्पृष्टोदुम्बरडम्बरारुणफलक्षाराम्बवश्चापि यम् ।
सेवन्ते खलु मारुताः खलकृषिव्याकोषहेवाकिनो
नित्यं, तं ननु नादनेरविरुदं ग्रामं नुमः श्रद्धया ।।

(३९)

यस्मै मेकलकन्यका भगवतो वर्षात्यये शाटक-
द्वन्द्वेनैव ददाति रत्ननिचयान् पुण्योत्करस्यानुजान् ।
तस्मै स्वस्थसमस्तगेहपतये ग्रामाय मेधाविना-
मुल्लासैकनिकेतनाय नतयः श्रीनादनेराय नः ।।

१. खेड़ा इति ख्याते

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

(४०)

[१]सीतयाश्चरितस्य यः कवयिता काव्योत्तमस्योत्तरे
सीतायाश्चरितेऽनुरूप – रचना – सौभाग्य – मेदस्विनः ।
काव्यालङ्कृतिभालपट्ट – तिलकालङ्कारिका-कारिका-
कारुर्यत्र सनातनोऽपि रमते तन्नादनेरं नुमः ॥

(४१)

यन्नाम्नः श्रवणेन [२]गूढचरणो धत्ते नतं स्वं शिरो
यन्न्यायैर्न स मम्मटोऽपि भजते काव्यप्रकाशे रुचिम् ।
तं यो नायक–नायकं महिमनि श्राद्धं नवीनीकृता-
लङ्कारात्मपथं सनातनमृषिं सूते पदं तन्नुमः ॥

(४२)

रेवाया दक्षिणस्यां तटभुवि विपुलं तत्र दीवानवंशो-
त्तंसानां ब्राह्मणानां विलसति सुमहद् राज्यमेकातपत्रम् ।
क्षीराणां का नु गाथा, पिबति खलु घृतं धूर्वहानां समूहो
येषां तेषाममीषामनुहरतुतरां भूतियोगे यशः कः ॥

(४३)

मारागाँव इति श्रुतो विजयते ग्रामो महानत्र यं
दीवानो विनयाभिधोऽधिवसति स्वच्छात्मनामग्रणीः ।
यं वै त्रिर्जनता विधायकपदं संमानतोऽलम्भयद्
रत्ने वर्षति यश्च निस्स्पृहतयैवातिष्ठिपत् स्वं यशः ॥

(४४)

रेवाया उत्तरस्यां प्रभवति नितरां सूर्यवंशाङ्कुराणां
राजन्यानाञ्च वंशः श्रुतिमहति पथि स्थैर्यधैर्योद्भटश्रीः ।
येषां मानोन्नतानां कथयति सुतरां मानगाथाः शिरोभ्यः
श्रीविन्ध्याद्रेर्हिमाद्रेरिव समवतरन् कीचकात्मा नभस्वान् ॥

---

१. सनातन एतत्काव्यस्य रचयिता रेवाप्रसादः द्विवेदी सीताचरितं दश-सर्गात्मकं महाकाव्यम्, काव्यालङ्कारकारिका चेति ग्रन्थौ ।

२. गूढचरणोऽभिनवगुप्तः नायको भट्टनायक महिमा महिमभट्टः ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

(४५)

श्रीरेवाया धरित्रीपरिसर उदयत्क्षात्रविप्रप्रताप-
व्यामिश्रस्याद्भुतात्मा भवति खलु पदं वर्त्मनोऽध्यात्मनीतेः।
मन्ये नो वारिधारां वहति भगवती नर्मदाऽस्मिन् प्रदेशे
तां ब्रह्मक्षत्रधाम्नां प्रणयमसृणितां प्रीतिधारां वदामः॥

(४६)

जीयाज्जोनतलाभिधः स च महान् ग्रामो महच्छाम्भवं
यस्मिन्नायतनं द्युसिन्धुविशदैर्यो श्वेतयत्यंशुभिः।
ढक्कासु क्वणितासु यत्र नभसि[1] श्यामे घनैः पाणिनि-
व्रातोऽद्यापि शृणोति सूत्रनिचयं विप्रोत्तमानां मिषात्॥

(४७)

लेढुं यत्र हवींष्युषर्बुधमुखे क्षिप्तानि मन्त्रैः समं
माघे वा यदि वा मधौ व्यवसिता वैमानिकानां गणाः।
पीयूषैः परिवेष्टयन्ति वसुधाकुक्षि सपञ्चामृता
तस्मादौषधसन्ततिः प्रभवति स्वास्थ्याय सा च क्षितेः॥

(४८)

माता भूमिरहं सुतः, सुतवती माता मया, मातृमा-
नेषोऽहं च तयाऽनया धृतमहावात्सल्यया भूतिमान्।
एषाथर्वविदां शुभा मतिरिह प्रत्यक्षमालक्ष्यते
पाणौ लाङ्गलिनि क्षितिर्भगवती यत्र प्रसूते क्षमाम्॥

(४९)

गव्ये सर्पिषि तण्डुलान् यवतिलैर्व्यामिश्रितान् मीलयन्
यस्मिन्नौषधसन्निपातमहिते यज्वाभिमानी शिवः।
मूर्त्तिं स्वां ज्वलनाभिधां शुचिपदब्रह्मोद्यविस्फूर्जितां
स्वैरं तर्पयतेऽधिमाधवमलङ्कारैश्च [2]काव्याभिधाम्॥

(५०)

यस्मिन् कृष्णमृगा मृगीसहचरा मन्दारमूले स्थितां
शृङ्गैः कामगवीं शितैः सुखयितुं कण्डूतिमातन्वते।
तच्चित्रं न हि, नर्मदापरिसरे पापर्द्धिकैर्वैकला
कारुण्यैकमहाब्धिभिः शमधनैर्यष्टुं समालभ्यते॥

---

१. नभसि श्रावणे। २. काव्यमपि भागवतमेव वपुः।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

(५१)

यस्मिन्नारभटीं विभर्त्ति भरतः पारम्परीणां खण-
त्कारालङ्करणां मृदङ्गरणनामाश्रावणां लम्भयन् ।
नो चेत् किनु वनीकुटीचरवधू-व्यारेचितभ्रूकटि-
व्याविद्धासु नृतिक्रियासु विरमत्यद्यापि नो दिण्डिका ॥

(५२)

नास्त्याख्यः कुतपः श्वसित्यतितरामद्यापि यस्यां क्षितौ
वारस्त्रीनृतिसङ्गतिद्रुतकटिस्थेमाञ्चितैः पुष्करैः ।
येषु व्याहृतिमापितेषु गृहिणो ग्राम्या मुदा गेहतो
निर्गच्छन्ति च तापयन्ति च हिमे सस्पाग्निभिः शर्वरीः ॥

(५३)

यस्मिन् कार्त्तिककृष्णपक्षविरतौ प्रातर्घटोध्नीः समं
वत्सैर्वर्णशतैर्विचित्रयति वै ग्रामाधिवासी जनः ।
कण्ठाभिश्च वराटकैः पृथुतरैर्नद्धाभिराभूष्य यस्
तासां मेचकशेखराणि तनुते शृङ्गान्तरे स्फारिणि ॥

(५४)

हेमप्रस्पर्धि-कौषेयक-वसन-कृतोष्णोषवन्धाः शिरस्सु
सक्षारां[1] नागवल्लीं खदिररसजुषं संश्रयाणा मुखेषु ।
आरूढाः शाकटेषु प्रतिनवधवलश्यामसुस्थोक्षकेषु
पातुं सम्बन्धिभार्याजनभणितिरसान्[2] यान्ति यत्राभियुक्ताः ॥

(५५)

सम्बन्धिद्वन्द्वमेलापकसदसि रुचा [3]साभ्रपिष्टातकाना-
मासारैर्मण्डिताङ्गे क्वणयति [4]टिमकीवाद्यमेकस्तदन्यः ।
सार्धं [5]झाल्लारिकीभिः श्रुतिसुभगगतिं गीतिकां मूर्छयित्वा
मूर्ध्न्युष्णीषाभिरूपे रचयति ललितां काञ्चिदारेचलक्ष्मीम् ॥

१. क्षाराणि चूर्णतमालादीनि २. गालीति प्रसिद्धान्
३. अभ्रमभ्रकम्, पिष्टातकं कुङ्कुमक्षोदः ४. टिमकीति देशी शब्दः मृन्नि-
मितपात्रश्चर्मानद्धमुखश्शलाकाहतिभिस्ताराराबी वाद्यभेदः ।
५. झांझपदवाच्याभिर्घनवाद्यजातिभिः

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

(५६)

एतस्मिंस्ता हताशा दधति बत [1]वताशाभिधाना विशालाः
शुभ्रा माधुर्य्यकोषाः स्मितिललितमुखीर्मुष्टिभिः क्षेपणा याः[2] ।
सौभाग्या[3]म्भोधिसूताऽर्जयति नु कमलाप्यासु भैक्ष्यस्य चर्यां
साध्वीं माध्वीमवाप्तुं शतमखशतकैरप्यनाघ्रातसाराम् ॥

(५७)

एतस्मिन् नारिकेलान्यपि रसिकतया कीर्यमाणानि ताभ्य-
स्ताभ्यः सम्बन्धिनीभ्यः सिचयपुटसमालिङ्गिताङ्गानि चाभिः ।
आशीराशीन् किरन्ति 'द्यु मणिरिव भवेदञ्चलेऽस्मिँस्तमांसि-
च्छेत्तुं शक्तः प्रभास्वाननुपहतगतिः कश्चिदित्येवमादीन् ॥

(५८)

प्राजापत्याह्वयेऽस्मिन् सरति मखपतौ गेहमेधिष्वजस्रं
तत्र प्रोच्चैर्नभस्वानपि सुरभिमयो जायते व्योमकुक्षौ ।
यज्ञाज्यैर्यत्र पङ्केरुहतनयमुखैरप्यभिष्टूयमाने
संपुष्यन्तः क्रमन्ते सरभसमभितो[4] वह्नयो लेलिहानाः ॥

(५९)

माणिक्येन बलिभुजां बत मुखान्याभूषयन्तोऽधुना
विज्ञानव्रतिनो भवन्तु कृतिनो वै किं नु तेषां[5] पुरः ।
प्राजापत्यमखे[6] हवींषि बत यैः कृत्वा वपूंषि स्वका-
न्यात्मा नूतननूत्नतामनुदिनं प्रापय्य मोमुद्यते ॥

(६०)

विज्ञान ! त्वमहो जडं भवसि धिक्, सर्पोऽपि शम्भोर्गले[7]
त्वङ्गन् नस्त्वयि थूत्करोति रभसेऽपीन्दोः कलां यः कृती ।
आस्यस्थास्तुभिराशिषां विषरसैः संमिश्र्य सञ्जीवनीं
मृत्योरप्यपलापिनीं रचयितुं बर्भर्त्ति दिव्यर्षिताम् ॥

---

१. बताशेति देशिपदम् शर्करानिर्मितो ह्येष वर्त्तुलात्मा पाकविशेषः
२. सौभाग्यमन्योन्यप्रेमपाशः ३. तदिदमिदानीमपि फाग फगुवेत्युच्यते
४. अत्रोत्तरार्धेऽप्रस्तुतप्रायमेवाध्यवसितमतिशयभङ्ग्या
५. तेषां यैरित्युत्तरार्धेन सम्बन्धः
६. प्राजापत्यो मखो गर्भाधानादियुक् स्त्रीपुंसयज्ञः
७. ऋषयो हि विषमप्यमृतभावमापयन्ति योगविशेषैः ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

(६१)

यन्त्रं [1]तन्त्रति तन्त्रणासु जडताक्लिष्टात्मनामेव वो
भूतानां न तु चित्कलामसृणितप्रज्ञात्मनां नो जडम् ।
एतस्मिन् स्फुरतात् तु संयममयी धात्री विधात्री जग-
त्काव्यानां प्रतिसृष्टिभिः सृतिलतामुल्लासयन्ती चितिः ॥

(६२)

एषा यत्र सनातनस्य कविता श्रीनर्म्मदाया महा-
प्राज्ञैरध्युषितेऽतिमात्रविमले पात्रे सदा श्रूयते ।
भोगो मोक्षति यत्र, यत्र यजनं नैष्कर्म्यति, [2]क्ष्वेडति
स्वर्गो यत्र, शिवा च यत्र शिवति क्षेत्राय तस्मै नमः ॥

(६३)

धर्मः पञ्चशिलीमुखस्य रभसे प्रोन्माथिनि स्थेमभा-
गर्थेन प्रथिमानमञ्चति यतः पुण्यप्रभोद्भासिना ।
[3]रेवारोधसि नादनेरललिते तस्मिन् सपर्यां शिवे
तन्वानेषु कृतं युगं कलियुगेऽप्युच्चासनस्थायते ॥

(६४)

त्यागस्त्यागति यत्र, यत्र च तपः सम्यक् तपस्यत्यथो
यत्राचारति वेदवर्त्मविधृताचार-क्रियासन्ततिः ।
तान् वै कल्मषमोषपोषितपरप्रज्ञानकोषान् यतीन्
वत्सान् गौरिव नर्मदाजनपदक्षोणिर्मुदा [4]सूर्क्षति ॥

(६५)

[5]सोम्यं यत्र बृहच्च किञ्चन मधु श्रौते श्रुतं वाङ्मये
प्राश्नन्तः कविता-स्वयंवरवधूर्युञ्जन्त्यजैर्योगिनः ।
यस्मिन् याति रसेश्वरी भगवती रासेश्वरीत्वं स्वतः
कालं कालिमथो कलाञ्च कलयन्ती कालिदासायते ॥

---

१. तन्त्रति तन्त्रं कारणं, तन्त्रायत इत्यर्थः । प्रतिसृष्टिः प्रलयः, प्रलयेन सृष्टेरुल्लास एव मीमांसकानां मोक्षः २. स्वर्गः क्ष्वेडो विषमिवाचरति अस्पृहणीयत्वाद् ३. रेवारोधसि वेतसीत्यस्य पद्याधमस्यैतदुत्तरम् । ४. सूर्क्षत्यभिनन्दति ५. वेदमन्त्रोऽत्राधारो विभ्राड् बृहत् पिबतु सोम्यं मधु इति । अजैर्ब्रह्मभिरपि । रसोऽद्वैतभूमिकः, रासः पुनस्तद्विपरीतो द्वैतमयः । कालिः कालापत्यम् ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

(६६)

अत्र प्राज्यमुपस्तुवन्ति ललितं साम्राज्यमर्चिष्मता-
मेकत्राज्यभरैः समिद्धवपुषां सप्तार्चिषां सूरयः।
अन्यत्र प्रसरद्भिरम्मयपरब्रह्मप्रवाहैरिव
स्तोत्रैर्भावितचेतसां च वचसां स्तोमैश्च संख्यावताम्॥

(६७)

मातर्मेकलकन्यके! तव पयोराशौ प्रभाते कृत-
स्नानानामभिसूर्यमर्घ्यसलिलान्युत्क्षिप्य शान्तात्मनाम्।
मेरुः सर्षपति, स्थलत्युदनिधिर्नीहारति ज्वालभृत्
क्रूरा किञ्च कृकाटिकाऽन्तकमुखे [1]भद्रासनत्येव नः॥

(६८)

मातर्! मेकलविन्ध्यभूधरमहापाषाणषण्डेष्वलं
संघर्षैर्मसृणात्मसु त्वयि यदा निष्पद्यते शम्भुता।
का गाथा चरितैः सितैर्धवलितस्वान्तस्य पुंसस्त्वयि
स्नातस्य प्रतिवासरं भवदवद्रोणत्वमासेदुषः॥

(६९)

मातः सोमसुते! सुतेषु कृतिषु [2]क्षुद्रासपीतिक्षणे
त्वत्पाथो भिषजायते ननु, सुधासारो मृषा स्तूयते।
त्वत्तीरं त्रिदिवायते ननु, [3]वृषागारो मुधा स्मर्य्यते
त्वत्तीर्थं ननु तत् पदं तदितरद् ब्रह्माप्यलीकायते॥

(७०)

ब्रह्मण्येषु महर्षिषु प्रतिभया त्रैकाल्यसंस्पर्शिना-
मग्रण्येषु चरिष्णुषु त्वयि तपो येयं फलेच्छावधूः।
ताटस्थ्येन कषायितेषु पुरुषेष्वज्ञा प्रधानेश्वरी
त्रैगुण्याकलनेव सापि च दरिद्रातुं विनिद्रायते॥

---

१. इदमेव मूलं काव्यस्यास्य भद्रपीठनामकरणे २. क्षुद्रा अत्र क्षुद्रासञ्चितं तद्युक्तं च मधुच्छत्रम्। तत्सपीतौ क्षुद्रादंशोपद्रवोऽपि प्रस्तुतः। एष खलु एवंगुण एव संसाररसभोगः। ३. वृष्ण इन्द्रस्यागारः स्वर्गः, वृषाणां गवामागारो गोष्ठं च।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

(७१)

भूयांस्येव पयांसि पर्व्वतशिलावक्षांसि भित्त्वाऽवनौ
धावन्ति प्रतिभान्ति किं ननु फलं तेभ्योऽपिपासाभृताम् ।
त्वत्तोयं तु कृतान्तपाशविघसव्यापारविद्रावण-
द्राघिष्ठस्तवनोद्धुरं विजयते मृत्युञ्जिताऽभ्यर्थितम् ॥

(७२)

मातः ! संस्कृतभारती श्रुतिमहद् वाङ्मङ्गलं बिभ्रती
त्वत्तीरे वसतां सतां बहुतिथात् कालान्मुखेषु स्थिता ।
कालुष्यं प्रगुणायते क्षपयितुं स्नातैर्निसृष्टं ततो
मातस्त्वं विरम क्षणं तव सखी सेयं शिवैवाऽपरा ॥

(७३)

त्वद्वीचिष्वनुवाचयन्ति बहुधा कीर्णां महिम्नां स्तुतिं
देवस्य त्रिपुरासुरप्रशमिनो ये केऽपि संमर्शिनः ।
तेषामग्रत एष धावति [1]सृकाहस्तो निषङ्गी मृग-
व्याधो भालविलोचनः परशिवो हर्त्तुं विषं क्ष्वेडिनाम्[2] ॥

(७४)

माङ्गल्येऽनुपमे तवाम्बुनि जगन्मातस्त्रपन्तेतरां
स्नातुं नागरकास्तनुर्बत यतो दैगम्बरी जायते ।
भाले वह्निविलोचनानि दधतामेषां त्रिशूलं करे
दृष्ट्वा प्रज्वलिताग्निभासुरमपि प्रेष्ठा द्रवन्त्यन्तिकात् ॥

(७५)

त्वत्पाथस्सु निमज्जनस्य हि फलं तद् यत् प्रदुग्धेऽखिलान्
कामान् कामगवी स कल्पविटपी चिन्तामणिश्चापि सः ।
नो चेन्मातरिमे समेऽपि निभृतास्तिष्ठन्ति, दृग्गोचरं
नैव स्वप्नमयेऽपि हन्त समये गच्छन्ति किं प्राणिनाम् ॥

---

१. 'सृकाहस्ता निषङ्गिण' इति श्रुतिरत्रोपजीव्या
२. क्ष्वेडं विषम् ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

(७६)

मन्दान् मन्दाकिनीनां रमयतु सलिलं भोगिनो [1]भोगिनीनां
मर्त्यान् भागीरथीनामथ, कृपणतमा काप्यसौ वृत्तिरेषाम् ।
मृत्यूत्तीर्णेषु भोगानुपहतमतिषु ध्वस्तमान्द्यान्धकारे-
ष्वस्मासु त्वेकमात्रं तव जननि जलं नर्मदे ! नर्म धत्ते ॥

(७७)

सत्तुं तर्तुमथो निमज्ज्य निभृतं स्थातुं क्षमो यः स्थले
तोये चाण्डभवो भवेद् यदि स ते नक्रोऽपि वक्रोक्तये ।
तर्कैरागमिकैस्तु[2] वेद्मि तमिमं संसारमेवोत्कट-
ग्राहं हन्त [3]सयौवनश्च [4]विपुलाभोगश्च नित्यं हि यः ॥

(७८)

एतं यः खलु [5]वञ्चयत्यपि जगन्मातः सबोधिश्च यः
सत्त्वो जन्तुफले[6] निधाय हृदयं शाखाकुरङ्गायते ।
तद्वंशेऽङ्कुर एक एव, भगवत्पादः स, सोऽपि त्वयै-
वोङ्कारेश्वरनाम्नि धाम्नि करुणापूर्णे ! कृतार्थीकृतः ॥

(७९)

मान्धाता तव वरिणैव विमलप्रज्ञो धराधारणे
निस्सापत्यमचीक्लृपद् यदि यशः श्वेतातपत्राग्रजम् ।
मातस्तत् सदृशं, वृषाकपिरपि द्यां संपिपर्त्ति त्वयि
स्निग्धायाः सलिलैरुपार्जितबलः श्रीविष्णुपद्या[7] यतः ॥

---

१. भोगिनी भोगवतीनाम्नी पातालगङ्गा ।
२. भूमिव्योम्नोः सरति तरति स्वैरमप्सु प्रलीनः
पाताले दृश्यते यः स्थलसलिलचरोऽप्यण्डजः कोऽपि भावः ।
संसारं वा तमेतं मकरमपि वयं वक्तुमीशामहे यत्
तुल्यं धर्मेषु तद्वै भवति विरहितं भेदतस्तर्कमार्गे—इत्यर्थः ।
३. नक्राण्डकोषरससूचीवेधेन जरापि यौवनायत इति वृद्धागमः ।
४. नक्रशरीरवृद्धिर्हि ह्रदपरिमाणप्रमाणकेति मृगयाचार्याः ।
५. शिशुमारजातककथाऽत्र स्मरणीया ।
६. जन्तुफल उदुम्बरः ।
७. विष्णुपदी गङ्गा ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

(८०)

श्रीमान् [१]मेकलभूधरो विजयते प्राचीं गतो यस्य वै
पुत्रः शोण उवाह काञ्चनवपुर्भागीरथीं सुन्दरीम् ।
पुत्री यस्य च नर्मदेति भवती तद्वत् प्रतीचीं गता
सिन्धुं संवरणस्त्रजेव वरयाञ्चक्रेऽच्छया धारया ॥

(८१)

त्वं माता मम मेकलः स भगवान् मातामहो मातुलः
शोणस् ताश्च हिमाचलस्य तनया मन्मातुलानीव्रजः ।
इन्द्र त्वं कृपणो जडोऽसि वरुण त्वं त्वं [२]कुबेरोऽवरस्
त्वं वै प्रेतपतिर् यमेति यदिमान् धिक्कुर्महे तत् क्षमम् ॥

(८२)

मातस्त्वामवमत्य यज्जनकजाजानिर्गतो [३]दण्डकां
तस्मादेव परामसौ जनवने प्रापद् विपत्सन्ततिम् ।
नो चेत् को नु दशाननो दशमुखी तस्यैकभक्तस्य ते
साहस्त्रीं भुजपञ्जरस्य विवशोच्छ्वासैः पुराऽवोजयत् ॥

(८३)

रामस्यास्ति विराम एव भवती यस्यामहल्या[५] न, नो
सुग्रीवा, न विराधिनो, गतवृषा[६] नो दुर्जया बालिनः ।
नो वै सूर्पणखाः,[७] खरत्रिशिरसो नो, कुम्भकर्णादयः,
पौलस्त्या अपि नो, भवन्ति तु तपोमग्नाः शुभा गोतमाः[८] ॥

---

१. अत्र भारतीया स्थलवेदी युगपदेव व्याप्तेति मेकलस्य यशः ।

२. कुवेरः कुत्सितं वेरं शरीरं यस्यात एवावरत्वमस्य ।

३. दण्डकयात्रायां रामो नर्मदां नातरत् ।

४. तस्य दशाननस्य, एकभक्तपदेन कार्त्तवीर्यो विवक्षितः ।

५. हल्या हलकृष्या भूः, अहल्या तद्विरुद्धा, गौतमस्त्री च ।

६. वृषो धर्मः ७. सर्वेऽपि वृत्तिविशेषस्य प्रतिनिधयः ।

८. गोतमा उत्कृष्टा उक्षाणोऽपि ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

(८४)

त्वत्तीरे हरिणाः सुवर्णवपुषः सीताश्च[1] दिव्यश्रियः
क्षेत्रेषु प्रविभान्ति वञ्चनकलालेशेऽप्यनभ्यन्तराः ।
ते ता नो छलयन्ति ता अपि न तान् निर्व्याजमुर्व्वीं दिवं
कुक्षींश्चापि दिशां विभूषितवतो घ्नन्त्येष वै ते गुणः ॥

(८५)

त्वत्तोयेषु मतङ्गशापकलितां मातङ्गतां धारयन्
गन्धर्व्वो यदुवास तस्य हि फलं यत् तामजोऽमोचयत्[2] ।
आचान्तेश्च तवाम्ब ! सा परिणतिर्यत् सोऽप्यजो मोहिनीं[3]
वैदर्भ्या[4] सममाप काव्यकलनां श्रीकालिदासो यथा ॥

(८६)

तर्कैर्ये प्रतिपादिताः कथमपि न्यायेषु पञ्चाननैः
श्रद्धा तेष्वपि चेन्निसर्गमधुरा देवेषु विद्यावताम् ।
का वार्त्ता तव नर्मदे ! त्वमसि नः प्रात्यक्षिकं दैवतं
भुक्तिर्मुक्तिमथो कवित्वमृषिता दुग्धे तु [5]यत्सैकतम् ॥

(८७)

विज्यं[6] यत्र कपर्दिनो धनुरलङ्कारायते केवलं
नो बाणान् वृणुते कदाचिदपि यद् यद् वै विशल्यायते ।
तस्मिन् यच्छति शर्म नर्मसहितं श्रीनर्मदे ! त्वत्तटे
सौराज्यस्य कथैव का विलसति [7]स्वाराज्यमेवाव्ययम् ॥

---

१. सीता सीरकृष्टा भूः, तदध्यवसिता जानक्यपि २. रघुवंशे ५.४२-५६ पद्यानि षष्ठसप्तमौ च सर्गौ ३. मोहिनी संमोहनास्त्रमपि रघुवंशे ५.५७
४. वैदर्भीन्दुमती तन्नाम्नी रीतिश्च । कालिदासकविताप्येतद्द्वितयसमृद्धा श्रीमर्मदाप्रसादरूपा च । वैदर्भीरीतिः संमोहनश्चेति द्वितयाय कालिदास-कविता प्रसिद्धा ।
५. सैकतं गोस्थानीयम्
६. द्र० विज्यं धनुरिति श्रुतिः ।
७. स्वमात्मा ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

(८८)

यद् वार्ताकमिदं यदल्पचणिकाकीर्णञ्च गोधूमिका-
पिष्टं मिष्टमिदं तवाम्ब ! पुलिनेष्वस्माभिरापच्यते ।
तत् पातञ्जलदर्शनेषु[१] निभृताँस्ताँस्तान् रसान् भोजयन्
मातर्नायिकतां[२] दिवस्पतिशताजुष्टां प्रपुष्णाति नः ॥

(८९)

दोर्भ्यामम्ब ! दधासि यत् कलशिकां पीयूष[३]यूषापरी-
वाहोद्गारगरीयसीं, क्षममिदं, नो चेत् कथं कल्पताम् ।
वाग्देवी परिवादिनीं क्वणयितुं रिक्तोदराभ्यन्तर-
क्षुभ्यच्छुष्म[४]कृशा [५]वृषाऽपि च तथाभूतो जगद् रक्षितुम् ॥

(९०)

यां काश्यामन्नपूर्णा पचति [६]रसवतीं सिद्धिमातोज्जयिन्यां
यां यां श्रीवैष्णवीति क्षितिधरशिखरे राजमाना भवानी ।
यां कामाक्षी कलिङ्गेष्वपि च मधुमतीं काञ्चिकासु त्वदीये-
ष्वम्बैतां वीचिभङ्गेष्वनुपमसुषमां [७]ताश्च हन्तोल्लिखामः ॥

(९१)

माहिष्मत्यां[८] सहस्रार्जुनकरविपिनादुल्लसन्ती ततश्च
साहस्रीमाश्रयन्ती हिमकरविशदां स्रोतसां याम्ब ! ते श्रीः[९] ।
भेर्याघातोपकण्ठे[१०] स्फटिकगिरि-शिलाषण्डवक्षःप्रपात-
स्फीतात्मा या च ताभ्यां स्मरवपुरनलं शामयेते शिवौ [११]नः ॥

---

१. भूयांसि खलु भगवत पतञ्जलेर्दर्शनानि । २. नायको भट्टनायकोऽपि ।
३. यूषा जूसपदवाच्यः क्षोदः । ४. शुष्माऽग्निः
५. वृषा महेन्द्रः । ६. रसोईति योच्यते ।
७. ता अन्नपूर्णादीः त्वमिव सर्वा अपीमाः शिवाः ।
८. महिष्मती महेश्वरनामकं तीर्थम् ।
९. सहस्रधारेति प्रसिद्धा । १०. भेर्य्याघातः जबलपुरस्य पार्श्वे प्रसिद्ध-तमो भेडाघाटेति नाम्ना प्रसिद्धे स्थाने नर्मदाया प्रपातः ।
११. नोऽस्माकमित्यर्थान्तरसंक्रमितं पदम् कामस्य वपुषि कामवपूरूपं चानलं शामयेते । अस्माकं शिवो नैकाकी, शिवाद्वितीयः सः कामरूपमग्निं शमयितुं कामे लग्नस्याग्नेः प्रशमे सोमोऽसौ व्यापिपर्त्ति लोकाननुग्रहीतुम् । दूरे तु कथा कामदाहस्य ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

(६२)

गौरीशङ्करसंज्ञकस्य [1]महतः सिद्धस्य यत् तावके
प्रादक्षिण्यमहामखे परिणतिं याता सभक्तिर्मतिः ।
त्वन्नीरं स्म [2]घृतायतेऽस्य विपुलाभोगे कटाहोदरे
तस्मादेव, तवाम्ब भक्तिलतिका सूते न किं वा फलम् ॥

(६३)

त्वत्तीरे दिवसात्ययेषु स महान् सिद्धोऽसितं पार्थिवं[3]
बाणं पाणितले निधाय यतधीर्दिव्यं व्यधाद् यं बलिम् ।
स्मारं स्मारमिमं विभूतिनिचितं नाद्यापि संविन्नटो
नृत्येभ्यो विरतिं भजत्ययि जनन्युद्भावितेभ्यो मुदा ॥

(९४)

ब्रह्माण्डे[4] तव वारिणाऽमृतमदप्लोषेण कोषेण च
द्राक्षाणां सरतो रसस्य गमिते मातः प्रयागश्रियम् ।
आद्यः सोऽपि रतिं परां [5]किरिहरिः पुष्णाति मुष्णाति च
श्रौते वर्त्मनि मानमेयतिमिरं संमूर्च्छितं पामरैः ॥

(६५)

सूर्ये संयमशीलिना[6] भगवता वज्राङ्गवीरेण[7] यत्
सर्वज्ञत्वमवापि रावणशिरःश्रेणी च यल्लङ्घिता ।
पत्या संगमिता च यद् धृतिमती धात्रीसुता[8] तत् परं
त्वन्नीरस्य [9]तबा-नदेन मिलितस्यासेवनायाः फलम् ॥

---

१. 'गौरीशंकर बाबा की जमात' इति प्रसिद्धा मातुर्नर्मदायाः परिक्रमा प्रदक्षिणे नित्यमेव निरता चतुरङ्गिणी साधुसेनाऽस्माभिर्द्वि। साक्षात्कृता । २. घृतस्याभावे नर्मदाया जलमेव कटाहे क्षिप्यते स्म, परिणमति स्म च तद् धृतरूपेणास्य सिद्धस्य कृते इति प्रतीतचरम् ।

३. सन्ध्यासु सिद्धस्यास्यास्मिन् साधुसैन्यशिबिरे पार्थिवेश्वरपूजाभिषेकोऽस्माभिरपि होशंगाबादनगरीये नर्मदाम्बायाः परतीरपुलिने महति बाल्ये साक्षात्कृत एव अतीव हारी स इदानीमपि न विस्मर्यते ।

४. ब्रह्माण्डमिति मध्यप्रदेशे नरसिंहपुरभुक्तौ करेलीग्रामपार्श्वे प्रसिद्धं नर्मदा-तीर्थम् । ५. किरिः वराहः, ब्रह्माण्डे सोऽपि प्रसिद्धः ।

६-७. योगसूत्रे 'भुवनज्ञानं सूर्ये संयमात्' ३.२६,४६ सूत्रे ।

८ धात्री पृथ्वी तत्सुता सीता । ९. एतदिदानीं बांदराभानमुच्यते ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

(९६)

सावित्रीं खलु ये जपन्ति जननि ! त्वत्तीरतीर्थे पुर-
श्चर्या ह्येषु पुरश्चरन्ति सवितुर्बिम्बे यथा रश्मयः ।
एषामेव समुज्ज्वलेषु महसां पुञ्जैर्ललाटेषु सा
ब्राह्मी कापि कखौ गघाविति शुभां वर्णावलीं शिक्षते ॥

(९७)

त्वन्नीरध्वनिना समाहितधियो मातर्मुनीन्द्रा [1]अलं-
भावालङ्कृतिभिः परिष्कृतिजुषि भ्राम्यन्ति वाङ्मङ्गले ।
तद् वै किञ्चिदपौरुषेयमुदयत्प्रज्ञा महाकाव्यमि-
त्याद्याध्यात्म[2]कलेति वेद इति च स्तोतुं क्रमन्ते हि ते ॥

(९८)

त्वां वासन्तिकमालिकाभिरसकौ [3]रत्नाकरः स्वामिवत्
तुष्टूषन् जगदम्बिके ! हरकथावन्यासु कीरायते ।
युक्तं युक्ततरं च तद्, गिरिसुता त्वं, सैकते ते कणा
ये ते हन्त समे शिवा विधुसुते ! द्वैतं च[4] वासन्तिकम् ॥

(९९)

त्वत्तीरेऽसितमृत्तिकेषु रमतां क्षेत्रेषु कृष्णः शतीं
साहस्रीं च गवां शिवेन पयसा युक्तां समाराधयन् ।
किं वृन्दावनधन्वना, तव तटे मातर्न किं वै फलं
को रासश्च रसश्च सस्यशबले को नो घटः कोऽवटः ॥

---

१. अस्माकं काव्यालङ्कारकारिका ।

२. अमृता ह्यात्मकला कवितेति भवभूतिः ।

३. हरविजये शिवस्वामिवद् वसन्ततिलकं प्राबध्नात्, अस्तौषीच्च हरम् ।
रत्नाकरस्वामिपदयोस्तन्त्रमपि सिन्धुगुहार्थव्यञ्जकम् ।

४. अद्वैतमेव वसन्तः, वसन्ते च दम्पत्योः सौभगाद्वैतमिति ध्येयमत्र ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

(१००)

अक्षय्या[1] बहवो वटास्तव तटे विभ्राजमानाः श्रिया
नीरन्ध्रैर्दलसञ्चयैः परिवृतास्ते ते समाशेरते ।
एषां मारकतीं रुचं तव पयःपूरो यदाऽऽश्लिष्यति
त्वं रेवे ! यमुनायसे न न तदा मृत्योश्च नासि स्वसा ।।

(१०१)

सा नन्दस्य[2] यशोदया परिवृता भूमिस्त्वमेवासि यां
रेवे नित्यमुपासते सुमनसो गोवर्धनाः क्षीरिणः ।
एकस्त्वत्र महान् गुणस्त्वयि सुते ! सोमस्य यत् कालियो
नो नाऽघो न च कंस एव जननि ! क्षेत्रेऽत्र संलक्ष्यते ।।

(१०२)

त्वत्तीरे [3]हलिनोऽपि सन्ति विमला धर्मप्रिया भारते
सश्रद्धा अथ च प्रकामसुहिताः सारस्वतीनामपाम् ।
त्वामुद्भाव्य ततः स मेकलगिरिर्युक्तं कलिन्दायते
युक्तश्चापि स भाललोचन उमाजानिर्मुकुन्दायते ।।

(१०३)

मातः पङ्कजिनीवनीमधुधुनीमाचम्य यां गीतिकां
प्रातर्नित्यमुदाहरन्ति सलिलापूरे तवेन्दिन्दिराः[4] ।
तस्यां तुम्बुरुनारदादिगुरवः कृत्वा निदिध्यासितं
सिद्धिं काञ्चिदवाप्नुवन्ति वचसां देव्याऽप्यनालोचिताम् ।।

१, प्रयागेऽक्षय्यो वटो यमुनाया एव तटे विराजते ।

२. नन्दस्य तदाख्यस्य गोपस्य यशोदया तन्नाम्न्या पत्न्या, परिवृता, सा भूमिरित्येका योजना, सानन्दस्यानन्दसहितस्य जनस्य यशसा दयया च परिवृतेति च द्वितीया । अभिन्नपदवाच्यत्वेनात्र द्वयोरभेदः । गोवर्धना गोपालास्तन्नामानः शैलाश्च ।

३. हली कृषीवलोऽपि, बलदेवः खलु प्रियदुर्योधनः, धर्मे धर्मराजे नास्ति तस्य बहुमानः, भारते महाभारते देव एष तटस्थः । भारतं भारतराष्ट्रं च । 'हित्वा हालामि'ति मेघदूतपद्यमत्र स्मरणीयम् । तदभिन्नाभिन्नस्य तदभिन्नतया मेकलोऽपि कलिन्दगिरिः, शिवोऽपि च कृष्णः ।

४. इन्दिन्दिरा भ्रमराः, तत्त्वेनाध्यवसिता योगिनश्च ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

(१०४)

या वै पश्यति दन्तकोरकयुगीरास्ये[१] विधेश्छोटिका-
मात्रेणैव च तस्य पश्यतितरां कल्पान्तसिन्धौ लयान् ।
तां त्वां कालरथाङ्गचङ्क्रमकलाप्रेक्षासु पश्यन्तिका-
भूयिष्ठां प्रणमन्ति सन्ततममूः सर्वाः दिशो नर्मदाम् ॥

(१०५)

नान्दीश्राद्धविधीस्तनोषि विधये त्वं, त्वं हि मौञ्जीविधे-
रूर्ध्वं तन्मुखचत्वरे क्रमयसे छन्दस्वतीं भारतीम् ।
तस्मै त्वं हि चपेटया दिशसि वै वेदान्, गतायुष्यसौ
त्वं ह्यत्रोर्ध्वविधीन् करोषि, विधये त्वं केवला बान्धवः ॥

(१०६)

डिम्भे ब्रह्मणि पायसं न कतिधा मातस्त्वया प्राशितं
जीर्णे तत्र पितामहे न कतिधा दृष्टास्त्वया प्रक्षयाः ।
स्वाहाकारयुता स्वधा स च वषट्कारः सवौषड्रवा
श्रौषड् हुंफडिति श्रुतिश्च तदियं त्वय्येव नित्यायते ॥

(१०७)

डिम्भेऽनेहसि जानुयुग्मसृमरे[२] दन्ताङ्कुरैर्मण्डिते
धात्री स्तन्यदुघा त्वमेव हि सदा, त्वं रेवसे किन्तु किम् ।
आ ज्ञातं तव नित्यतां प्रति स वै मात्सर्य्यदिग्धो दश-
त्यम्ब त्वां कटु सीत्करोषि रभसात् तं पाययन्ती पयः ॥

(१०८)

क्षोदिष्ठेऽपि तवाम्ब विप्रुषि परस्कोटीः परब्रह्मणो
वर्षाणामनुशीलयन्नयमहो श्रान्तो मृकण्डोः सुतः ।
व्यापारानुपसंहरत्यपि धियः, का वा कथा चक्षुषोः,
सांख्यं योगति सांख्यति प्रमितये योगश्च तुभ्यं न नो ॥

---

१. युगीबहुत्वे जन्मबहुत्वमुत्प्रेक्ष्येत, एवमेव लयबहुत्वेऽपि ।

२. सृमरे क्रममाणे । रेवृ शब्दे ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

(१०९)

चीत्कारैः सह मातरत्रभवतीतीरे निषादः स्वयं
क्रौञ्चद्वन्द्वशरै रतिस्मरसखैर्विद्धान्तरश्चेष्टते ।
मेलानन्दयसे[1] सनातनकवौ किन्तु त्वमेवाम्बिके !
सूक्तिभ्यः शिवयोर्भिदां क्षितवतोरानन्दतः स्यन्दिनी[2] ॥

(११०)

आद्या त्वं यदि मूर्त्तिरष्टवपुषो देवस्य विश्वात्मनो
विश्वेशस्य, बतान्तिमा भवति का सा तस्य, सा त्वं न चेत् ।
त्वद्भेदेन कषायितेऽस्ति यदि चेत् सत्त्वं तदर्थं कृती
स्याद्वादो[3] यदि वाऽस्ति हन्त कृतिनी तद्भिन्नभिन्नत्वगीः ॥

(१११)

केयं व्याकृतिरम्बिके ! [4]ध्वनिरसि त्वं नित्यमव्याहतः
स्फोटस्त्वं ननु वक्तृवाच्यवचनव्यापारणापि त्वमु ।
त्वं धातुः, प्रकृतिस्त्वमेव, भवसि त्वं प्रत्ययः, सान्वय–
स्त्वय्येवाम्ब ! समाप्तिमृच्छतितरामर्थोऽप्यसौ प्रातिभः ॥

(११२)

वाणिज्यं करवाणि चेत् तव दृशोः पात्रीभवन्नप्यहं
मातः केन नु किं वृणोमि किमथो केनोत्सृजामीत्यहो ।
तैस्तैरप्युपदेशकैरपि दृढं व्याबोधितो न क्षमे
निर्णेतुं तदहं त्वयैव जननि ! त्वां कामधेनुं वृणे[5] ॥

---

१. मेलान्दो मषीपात्रम् । २. आनन्दतः स्यन्दः सूक्तिरेवोभयसाधारणः ।
३. 'अप एव ससर्जादावि' त्युक्तेर्जलं भगवतोऽष्टमूर्त्तेराद्या मूर्त्तिः । स्याद्वादोऽनेकान्तवादः । तद्भिन्नभिन्नत्वमपोहः ।
४. अव्याहतो ध्वनिरनाहतो नादोऽपि, स्फोटो ब्रह्मापि चिदात्मा । सान्वयोऽर्थो वाक्यार्थस्तात्पर्यार्थापरपर्यायः । सोऽयमखण्डार्थवाद औपनिषदानाम्, शाब्दिकानामिव । प्रातिभः प्रातिभासिकोऽपि, शब्दतदर्थतत्सम्बन्धानां वाङ्मये बुद्ध्येकरूपत्वात् ।
५. अनुष्ठानस्य फलेच्छाप्रयुक्तत्वं हि वाणिज्यरूपमेव दानादानयोर्विनिमस्य तत्र जागरूकत्वात् ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

(११३)

मातस्त्वं पुरुषार्थदेति वचसां दारिद्र्यदुष्टां कथां
श्रावं श्रावमणीयसीमपि कलां कामस्य यश्चुम्बति ।
जाड्ये[1] तं कलयाम्यनन्वयपथेनैकाकिनैवोन्मिष-
त्सारूप्यं पुरुषार्थता यत इयं त्वय्येव विश्राम्यति ॥

(११४)

त्वं मातः क्व नु किंनु नासि, गतिमान् कालस्य को वा लव-
स्त्वन्निर्देशमनाप्य हन्त भुवनाभोगेऽत्र बंहीयसि ।
वाच्यावाच्यकथे ततो बत वृथेत्यामृश्य तूष्णीं स्थिता-
[2]स्त्वत्स्वातन्त्र्यमिदं महेश्वरतया भोक्तुं तु चेष्टामहे ॥

(११५)

मातस्त्वां प्रणमामि केन शिरसा कुत्राङ्घ्रितीर्थे कथा
सेयं द्वैतिनि केवले कुशलिनी स्वप्नादिषु स्यात् क्षणम् ।
अद्वैतं परमार्थयत्सु वचसां स्तोमेषु निश्चप्रच-
प्रत्यक्पूर्णविमर्शनेषु तु शिरः किं, किं पदं, का नतिः ॥

(११६)

[3]रेवायास्तव योऽम्बिके कृशतनुः कश्चित् प्रसादोऽस्त्यसो
हा हन्त प्रतिमापरः परशिवे ! कश्चित् प्रमादो हि ते ।
नो चेदत्र कथं नु मूर्च्छति महामारी विवेक-स्थिति-
स्वातन्त्र्येषु विवर्त्तते ननु महाचारी च नाट्येष्वसौ ॥

---

१. जाड्ये तद्गतस्य तत्त्वस्यैवानुयोगिप्रतियोगितोभयावच्छेदकत्वेन सादृ-श्यान्वयाप्रतियोगितयाऽनन्वयैकविषयत्वम् । 'सोऽहमि'-ति न्यायेन भग-वती नर्मदैव परः पुरुषार्थः ।

२. स्वातन्त्र्ये तद्भोगे च महेश्वरत्वमेव काकाक्षिगोलकन्यायेन तन्त्रम् भोक्तुं स्वदितुं रक्षितुं च ।

३. रेवाप्रसाद इत्यत्रास्माकीनस्य नाम्नो मुद्रा । अकृशेत्यपिच्छेदः । स्थितिः मर्यादा ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

(११७)

यद् वै [1]कुट्टमितं यददप्युपचितं मोट्टायितं यस्त्वसौ
विव्वोकः प्रकृतेर्भुजङ्गशतकैरावेष्टिताया मयि ।
तद् ग्राहाय निवेदयामि निखिलं त्वां वोढुमुत्काय ते
त्वं मय्यम्ब ! विपक्षतौ द्विजशिशौ धत्स्व स्मितिं ह्लादिनीम् ॥

(११८)

गर्धा मां मुखरीचिकीर्षुरसकौ सन्नाहमाटीकते
शास्त्रार्थः पुनरेष मामनुचितं वक्तुं न दित्सायते ।
तद् यन्म्लिष्टतयाऽपि वच्मि कृपणस्तस्यास्य तात्पर्यतो
मीमांसासु वृताऽम्बिकैव भवती धर्माधिकारी मया[2] ॥

(११९)

वैषम्येण कषायितेऽत्र जगतीपृष्ठे समुद्घातिनी
वन्या कण्टकिनी च हन्त सरणिर्नैकापि नालोच्यते ।
त्वामेवाम्ब दयामयीं प्रणिपतन्नध्वर्युतामेव मे
त्वत्कारुण्यतरङ्गिणीष्ववभृथैः सत्कर्त्तुमिच्छाम्यतः[3] ॥

(१२०)

अभावस्वाभाव्यं[4] दधति नहि भूतानि, विकृतिः
स्वभावश्चैतेषां प्रकृतिविकृतीनां ननु शिवे ।
अमर्षं तत् त्यक्त्वा जननि सविमर्शं सृतिमिमां
त्वमेकैवोत्कर्षं गमयसि सदैव स्मितिमयी ॥

(१२१)

अनारम्भो[5] नाम्ब प्रभवति परित्रातुमनिशं
प्रवृत्तं भूतानां व्यतिकरमिमं कर्मपरमम् ।
त्वयाम्नाणां कूटादुपजलधि सत्यापितमिदं
जगन्माङ्गल्यं यद् वहति तव धारा रसमयी ॥

---

१. कुट्टमितमोट्टायितविव्वोका शृङ्गारनायिकाहावाः । भुजङ्गो विटः ।
२. म्लिष्टतयाऽस्फुटतया । तात्पर्यार्थं मीमांसैव प्रथमयति ।
३. सोऽयं पुरुषार्थवादोऽस्माकं यज्वनाम् ।
४. स्वभाव एव स्वभाव्यम् त्रिकालबाधित्वरूपमित्यर्थः ।
५. अनारम्भः कर्मविरतिः ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

(१२२)

अनारम्भो मातर्भवति तव कुक्षेरनुपमः
सदम्भो न्यक्कारस्त्रिभुवनविधानव्यसनिनः ।
अनारम्भो नाशः, स च चरति मातस्तव तटे
निराशः[1] स्वेऽस्तित्वे व्रतमिह पराकाद्यनशनम् ॥

(१२३)

य आरम्भस्तस्मिन् परमशिवपुत्रि ! त्वमसि नः
शरण्योत्सेकानामपगमविधानेऽपकृतिनाम्[2] ।
अनुत्सेकारम्भ-द्वय-परिणतिर्नर्म, तदिदं
त्वदायत्तं, मातस्त्वमसि जननी हन्त कृतिनी ॥

(१२४)

अकामानां कामस्त्वमसि, स मृकण्डोः सुत उत
प्रवर्षी कामानां स खलु भगवाँल्लोमश[3] ऋषिः ।
कथं तीरे नो चेत् स्फटिकसितनीरे जननि ते
त्वदीये क्षीरे नु व्यवसितिमतीव प्रभजतः ॥

(१२५)

पिशाचानां[4] वृत्तिः प्रणयविमुखा तां हि परुषां
त्वमेवैका मातर्व्यपगमयसे प्रीतिकल्या ।
इमां त्वां लोकानामुभयहितधात्रीमनुपमां
विधात्रीमर्थानां क इव समुपासीत न कृती ॥

---

१. निराशः=आशो भक्षणं निराशस्त्यक्तभोजनोऽपि । पराकसांतपनादीनि व्रतानि पुराणेषु प्रसिद्धानि ।

२. नर्मदा रुद्रदेहसंभवेति पुराणविदः । अपकृतिनोऽपकारिणः, तेषाम् ।

३. लोमशस्याख्यानं पद्मपुराणस्य तृतीये स्वर्गखण्डे २२-२३ अध्याययोः ।

४. पद्मपुराणे ३.२३ अध्याये कथेयं प्रथिता । गन्धर्वकन्यकानां प्रणयमगणयन् ब्राह्मणस्ताः पिशाच्यो भवतेति शशाप, ता अपि प्रणयविमुखं तं तथैव शेपुः । त इमे लोमशोपदेशान्नर्मदास्नानेन पिशाचभावान्मोचिताः ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

(१२६)

पुरां[1] दग्धुर्गोप्ता यदि चरणयोरम्ब पतितोऽ-
सुरो बाणः शम्भोः स खलु तव वारां हि महिमा।
दिधक्षोः कालाग्निः कथमितरथा स्यात् प्रशमितो
महेशानस्याम्ब त्वमिह यदि भक्तिं न सृजसि॥

(१२७)

क्षनीदृक्त्वे त्वम्ब ! प्रथितकरुणोऽपि प्रभुरसा–
वधाक्षीत् किं कामं तुहिनगिरिकन्यां प्रददतम्।
प्रभुश्चैतन्याब्धिः स हि चितिघनस्त्वं हि महिते !
रसासारैस्तस्मिन् सृजसि यदि कारुण्यलहरीम्॥

(१२८)

विनीतस्त्वत्तीरे तरलयति लोकान् न परुषः
सुमेषुः स्वैरत्वे दशमुखमुखानां कवलने[2]।
ललाटाग्नौ शम्भोस्तनुमयमहौषीन्ननु तप-
स्तदेवामुं मातस्तव परिसरेऽस्मिन् रमयते॥

(१२६)

य एव त्वत्तीरे विरचयति सौन्दर्यलहरीं
जगन्मिथ्यात्वे किं स खलु हिमशैले व्यवसितः।
परं तेजश्शम्भोस्त्वमसि शशिपीयूषमसृणं
त्वदासङ्गः काव्यं भवति हिमशीतो, न तु हिमम्[3]॥

(१३०)

त्वदीयं यद् ग्रैवेयक[4]मिदमनङ्गारितनये
श्रितप्राथम्यानामरुणमहसां दर्पदलनम्।
श्रियं तस्य ध्यायन् कनकवपुषः स्वर्गजनुषा-
मपि श्रीसौभाग्यं विगणयति भक्तस्तव शिवे॥

---

१. पुरां गोप्ता बाणस्तासां दग्धुः शिवस्येत्यन्वयः। कथेयं मत्स्यपुराणे १८(तमेऽध्याये द्रष्टव्या। २. कवलन इति स्वैरत्वविशेषणम्।
३. य एव भगवत्पादः शङ्कराचार्यः।
४. नर्मदाम्बा हि सुवर्णमयं ग्रैवेयकं बिभर्तीति प्रसिद्धिः।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

(१३१)

करांभ्यां द्वाभ्यां यद् वहसि वरमुद्रामभयता–
बलिष्ठां तां दृष्ट्वा कलिरधृतिजानित्व[1]मयते ।
दिशं यां यामेष द्रवति ननु रक्षार्थमिह वै
स सर्वत्रैवेशं, कलयति दिधक्षाग्निपरुषम् ॥

(१३२)

त्वयि ब्राह्मं सूत्रं भवति भुजगेन्द्रो, रमयितुं
शिशुं त्वां साम्बो वै भवति च पिनाकी शिखिवकौ ।
न चित्रं तत् कल्पा यदि दधति तीरद्वयकलां
त्वदम्भस्संभारेष्वमृतपदसत्यार्थयितृषु ॥

(१३३)

मयूरत्वं[2] कल्पे भजति कुहचित्, कुत्रचिदथो
वकत्वं, मीनत्वं क्वचिदथ कदाचित् कमठताम् ।
तदेतद् वात्सल्यं परिणमति शम्भोस्त्वयि परे !
शिशूनां क्रीडायै ननु पितृजनः किं न कुरुते ॥

(१३४)

कदाचित् कूर्मे त्वां भजति स मृकण्डोस्तनुभवः
कलापानां सन्धौ क्वचिदथ मयूरस्य निभृताम् ।
कदाचिच्चाम्बाया मनसिजगजालानवपुषः
प्रियोरःसंस्पर्शादुरसि लसिते स्वेदपयसि ॥

(१३५)

कदाचित् त्वं मातर्गणयसि कपालावलिमुखे–
ष्ववाप्तप्रागल्भ्या पितुरुरसि खेलत्सु दशनान् ।
कदाचिच्चान्द्रीं तां स्नपयसि कलां पन्नगमुखो-
च्छलत्फूत्काराग्निग्लपितवपुषं वारिविसरैः[3] ॥

---

१. अधृतिरस्थैर्यं जाया यस्य तद्भावम् ।

२. नर्मदा हि व्यालोपवीतिनीति पुराणेषु प्रतीततमम् । मयूरकल्पे मयूरः, वककल्पे च वको भवति शिवः ।

३. स्कन्दपुराणे ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

(१३६)

पयःसन्ताने ते झष इति कुलीरा इति च ये
ऽप्युदीर्य्यन्ते सत्त्वाः प्रणतिपरमास्तेष्वपि वयम् ।
अमीषां मध्ये यद् भवति खलु कश्चिद् विधिरथो
हरिः कश्चित् कश्चित् सुरपतिरपस्ते रसयितुम् ॥

(१३७)

न सत्ता त्वां मातर्व्यभिचरति कल्पान्तकुहना[1]-
स्वपि स्वैरं सर्वश्रुतिरवपराभ्यासमहतीम् ।
विशन्तः कालास्यान्यसुरमुनिवृन्दारकवृषा
महाकालीमैकां प्रलयविपदि त्वां हि नुवते ॥

(१३८)

न यस्मिन्नाकाशं लसति न समीरो न दहनो
न तोयं नो भूमिस्तपनि न रविर्नापि च विधुः ।
तमोभूते तस्मिन् व्यभिचरति कालेऽपि भवतीं
न सत्ता, वाक्यानां त्वयि हि महतां सत्परिणतिः[2] ॥

(१३९)

त्वमेका[3] त्वं नैका त्वमयि जननि प्रत्ययमयीं
तनुं कृत्वा काञ्चित् परमशिवगात्रे विहरसि ।
तवाश्लेषादेव प्रभवति पराम्बापि परमे !
पयःपारावारैः स्थगयितुमिदं शून्यकुहरम् ॥

(१४०)

विलीनाः सर्वेऽमी शतमखमुखास्त्वं च शिरसो-
र्विराजन्ती पित्रोः प्रलयजललीलासु रमसे ।
निमज्जन्नुन्मज्जन्नयमिह मृकण्डोः करपुटौ
सुतः सिन्धौ बध्नन्नयि जननि तुभ्यं प्रणमति[4] ॥

---

१. कल्पान्तेषु केवला नर्मदाम्बैव ध्रियत इति पुराणेषु प्रकामं प्रसिद्धम् । कल्पान्ते नर्मदा श्यामतर्णेत्यपि पुराणे प्रतीतम् ।
२. त्वमेव महावाक्यार्थं इत्यर्थः ।
३. शिवास्वेदात् सिन्धूदरापूर्तिरिति पुराणेषु कथा ।
४. ध्यानमिदं पुराणेषु, विशेषेण स्कन्दपुराणे प्रसिद्धम् ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

(१४१)

श्रुतीनां छायां वै हरति, न तु मूलं, स दितिजो
हिरण्यानीमक्षैरभिसरति यः स्वार्थपरमाम् ।
परार्थानुष्ठाने निरतमतिरम्ब त्वयि तु त-
न्महारावै रेवे ! शतधृतिरसौ मूलमयते[1] ॥

(१४२)

त्वमाद्या सर्वेषां गुरुरसि विरञ्चिस्तव करा-
वसौ सद्योजातः श्रयति पदशक्तिं च लभते ।
अमुष्मिन् कूष्माण्डे महति परिपक्वे विसृमरा
अमी सर्वें देवा जननि दधते बीजकलना[2] ॥

(१४३)

अनालम्बेष्वम्ब त्वमसि परमालम्बनमिति
त्वयैव प्रासाधि त्वयि परिलसन्त्यां क्व नु विपत् ।
समर्थे ! त्वं व्यर्थानयि रचयसे कालदशनान्
कृतार्थाः क्रीडामस्तदयि तव पुत्रास्त्रिभुवने ॥

(१४४)

न शर्म त्वां हित्वा भवति न च धर्मस्त्रिभुवनीं
परित्रातुं मर्म स्पृशति निगमान्तैर्निगमितः ।
सृतौ नर्म त्वेकं 'श्वसनगतिरेषान्तकसरी-
सृपास्यादुन्मुक्ते'[3]—त्ययमपि तवैवाम्ब विभवः ॥

(१४५)

लिहन्तो धिक्कारान् मम तव सुतस्यास्य महिषा
यमानां निर्यासानिव निगमसौवर्चल[4] — भवान् ।
सरस्वत्यास्तोये मम हि विमले काममुररी-
चिकीर्षन्ति क्रीडामिति सृतिलतेयं प्रसरति ॥

---

१. महाप्रलयान्ते हिरण्याक्षमुखान्नर्मदैव वेदानाच्छिनत्ति प्रयच्छति च तान् विधये । स्वयं च वेदमन्त्रनिपुणा ।

२. ब्रह्मदेवोऽपि जायते नवनवश्च भवतीति पुराणकथा ।

३. अत एव नर्मदेति संज्ञा ।

४. सौवर्चलं लवणविशेषः । सरस्वती नदीविशेषोऽपि ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

(१४६)

एतावन्मात्रमम्ब ! त्वयि निखिलमरुद्वन्द्यतायै प्रकामं
पर्याप्तं वै प्रमाणं यदसि भगवती काशिकायां तदीशः ।
त्वद्गौरीकुण्डगर्भे लसति य उपलस्तन्मयीं त्वां हि मातः
काश्यां श्रीविश्वनाथो गमयति पदवीमात्मनः, संप्रसीद[1] ॥

(१४७)

न स्कन्दो नापि कूर्मो भवति ननु कृती यन्महिम्नामखण्ड-
स्फोटानां गीतियोगे न च परमतमो मत्स्यनामादिदेवः ।
मातुः श्रीनर्मदायास्तरलयति मतिं तत्र दुर्गे प्रसादो
रेवाया यत् क्षमं तत् सुतचपलतयैवाश्नुते प्रीतिमम्बा[2] ॥

(१४८)

वारिणे शम्भुरूपाय वारिरूपाय शम्भवे ।
वारिशम्भुस्वरूपायै रेवाम्बायै नमो नमः ॥

(१४९)

श्रीनर्मदाप्रसादस्य द्विवेदस्यात्मजेन या ।
स्तुता रेवाप्रसादेन रेवेयं नर्मदास्तु सा ॥

(१५०)

एकादश्यां ज्येष्ठकृष्णे पुरुषोत्तमतास्पृशि ।
बाणवेदाभ्रनेत्राब्दे काश्यामेषाद्य पूर्यते ॥

॥ ॐ नमो नर्मदायै, नमो रेवायै, नमो मेकलकन्यकायै ॐ ॥

॥ ॐ तत् सत् ॥

---

१. काश्यां चतुर्ष्वपि विश्वनाथमन्दिरेषु नर्मदेश्वरबाणा एव संप्रति श्रीविश्वनाथबाणाः ।

२. स्कन्दादिपदैस्तन्नामानि पुराणान्यपि गृह्येरन् ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

वेदमूलकं गान्धर्वम्

विनायको 'रटाटे'

वेदोत्तरे-'गान्धर्वे' 'संगीते' वा मुख्यतः त्रयाणां तत्त्वानां विचारो भवति। तानि स्वरतालपदात्मकानि[1] गीतवाद्यनृत्यात्मकानि[2] वा सन्ति। अयमेव तत्त्वसमूहो वेदेषु 'शिल्प'-नाम्ना पारसीक (परशियन) भाषायां 'सुरोद' नाम्ना च लभ्यते। तत्र नाट्यशास्त्रे वेदानुयायिनः भरतस्य—

जग्राह पाठ्यं ऋग्वेदात्सामभ्यो गीतमेव च।
यजुर्वेदादभिनयान् रसानाथर्वणादपि॥ इति

प्रतिज्ञा वर्तते। विषयोऽयं निरन्तरं विविधैश्चिन्तकैः परिश्रमपूर्वकं विवेचितः। तद्यथा ऋक्सामवेदयोः पाठस्य (पदस्य), गानस्य (स्वरस्य) चान्तर्भावः कृतस्तैरिदं तु समीचीनम्। परं पाठगानयोस्तालस्यान्तर्भावं कृत्वा तैः निरर्थकः प्रयत्नो विहितः। अनन्तरं च तालेन विना 'अभिनय'-मात्रस्यैव यजुर्वेदाश्रयत्वं स्वीकृतम्।

भरतस्य मनसि अभिनयशब्दतालार्थकत्वेनाप्यासीत्। तालशब्दवदभिनयशब्दोऽपि गत्यर्थक। भवतु तावद्। यजुर्वेदाश्रयिणीयं विचारपद्धतिः भरतेन कुतः स्वीकृता।

यजोरवदानं गान्धर्वं प्रति

तत्रादौ विषय-सम्बद्धः यजुःशब्दविचारो विदुषां पुरतः संस्थाप्यते। शतपथे—"यजुः पुरस्तादेति—अभिनेतैव तदेति[3]" इति वचनं श्रूयते। अनेनैव वचनेन भरतः प्रभावितः आसीत्। अपि च—'सर्वा गतिर्याजुषी हैव शश्वत्[4]।' वचनेऽस्मिन् यजुर्वेदस्य गत्यर्थकत्वं स्पष्टतो विज्ञायते। एवमेव तालस्य संयोजकत्वं सर्वविदितमेव। विचारस्यास्याप्याधारो वेद एव। यथा शतपथे—"यजुः—इति एष हीदं सवं युनक्ति[5]" अपि च—

१. गान्धर्वं त्रिविधं विद्यात् स्वरतालपदात्मकम्। ना० शा० २८-११।
२. गीतं वाद्यं तथा नृत्यं त्रयं संगीतमुच्यते॥ संगीतरत्नाकरे—१-२१।
३. श० ब्रा० १०-१-१-४। ४. तैत्तिरीयब्रा० ३.१२.९.१।
५. श० ब्रा० १०.५.२.२०।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyder

"यजुः। प्राणो वै यजुः। प्राणे हीमानि सर्वाणि भूतानि युज्यन्ते। युज्यन्ते हास्मै सर्वाणि भूतानि श्रैष्ठ्याय। यजुषः सायुज्यं सलोकतां जयति[१]।" इति।

भरतस्य वेदोपजीवित्वम्—

अत्र भरतस्य प्रतिज्ञावचनस्याधारः पुरःस्थाप्यते। तद्यथा—

ऋचां त्वा पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्वरीषु।
ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां वि'मिमीत उत्वः[२] ॥ इति ॥

अत्र 'ऋचां' पदं पाठार्थकम्। 'गायत्रं', 'गायति' च पदद्वयं गानात्मकम्। 'मात्रां', 'मिमीत' इति पदद्वयं तालात्मकम्। दृष्ट्वेयं ऋङ्निश्चयेन वक्तुं शक्यते यदियं ऋग्भरतस्य प्रतिज्ञावचनस्य समग्रत्वेनोपजोव्या। मन्ये सायणादिना तत्र हौत्रादिचतुरङ्गात्मकस्य श्रौतयज्ञस्य च सिद्ध्ये प्रमाण-पुरस्सरं मतं प्रतिपादयितुं मन्त्रस्यास्य विचारः कृतः। परं गान्धर्वदृष्ट्या भरतेन पुरैव स्वमतपरिपोषकोऽर्थ उपर्युक्तमन्त्रतः संचयितः। अपि च—सामविधानब्राह्मणे साम्नो ध्यानं दृश्यते। अथवा यथा पुरुसस्य विभिन्नावयवा भवन्ति तथैव गानस्याप्यवयवानामिव वर्णनं तत्र लभ्यते। यथा—"तस्य ह वा एतस्य साम्न ऋगेवास्थीनि। स्वरो मांसानि। स्तोभा लोमानि[३]"। इति। अत्रास्थि स्वरयोर्ऋक्साश्रितत्वं स्पष्टं परं लोमाश्रयस्य स्तोभस्य केन वेदेन साकं सम्बन्धेति मुख्यः प्रश्नः। अतोऽत्र विचारः क्रियते। तत्र शतपथे—'लोमतः। छन्दांसि वै लोमानि। छन्दःस्वेवैनमेतत् सम्भरति[४]।" इति वचनं श्रूयते। प्रायः सर्वत्र सामान्यरूपेण छन्दःशब्द ऋगादिवेदानां ज्ञापकः। परं सांगीतिक दृष्ट्या छन्दःशब्दो विशेषेण यजुर्वेदार्थकः इति नूतनगवेषणया प्रायः सिद्धमेव।

शिल्पम्

वेदेषु वेदोत्तरग्रन्थेषु च प्रायः समस्तचतुषष्टिकलानां शिल्पमित्यभिधानं प्रसिद्धम्। कलाकौशलस्याचार्यः कश्यपः काश्यपः नैध्रुकाश्यपो वा सर्व-

---

१. श० ब्रा० १४.८.१४.२।
२. ऋ० सं० १०.७१.११।
३. सा० वि० बा० १.१.१०।
४. श० ब्रा० ६.४.१.६।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

विश्रुतः। तत्र संगीतस्य क्वचिद् विद्यारूपेण क्वचिच्च कलारूपेण परिचयो लभ्यते। तत्र सर्वप्रथमं तैत्तिरीयब्राह्मणे शिल्पशब्दः सामान्यरूपेण कलाकौशलार्थको वर्णितः। यथा—"येभिः शिल्पैः", यत्ते शिल्पं कश्यपरोचनावत्[1]" इति। विशेषेण कौषीतकिब्राह्मणे शाङ्खायनब्राह्मणे च—'त्रिविद्वै शिल्पं नृत्यं गीतं वादितम्' इत्याम्नातम्। एवमेव कृष्णाजिनस्य परिचयः शतपथब्राह्मणेऽनेन प्रकारेण लभ्यते—'सैषा त्रयी विद्या यज्ञः। तस्या एतच्छिल्पम्—एष वर्णः। तद्यत् कृष्णाजिनं भवति[2] इति। अत्र ऋगादि वेदत्रयं गीतवाद्यनृत्यार्थमिङ्गयति। तथा च कृष्णाजिनस्थ शुक्लकृष्णबभ्रुवर्णत्रयी चित्रकलामिङ्गयतीत्यर्थः प्रायः।

वैदिकवाङ्मये उपर्युक्तविषयार्थपरिपोषिणी सामग्री बहुविस्तरेण लभ्यते। अत्र अन्येऽपि बहवः विचाराः पुनःस्थापनार्हाः परं लेखविस्तार भयादन्ते पुनः स्वमतमेकवारं स्थाप्यते। तद्ययत् वेदे—गान्धर्वे संगीते वा यजुः, छन्दः, तालः, नृत्यमभिनयवाचकश्शब्दाः प्रायः समानार्थकाः सन्तीति। यतो ह्येते गत्यर्थकाः। इति शम्।

---

१. तै० ब्रा० २.१०.१५।

२. श० ब्रा० १.१.४। २.३। द्वितीयकण्डिकायां लोमानां शुक्ल-कृष्ण-बभ्रु-वर्णत्रयं प्रतिपादितम्।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

प्राभाकरमीमांसानये प्रत्यक्षप्रमाणस्वरूपम्

डा० राजेन्द्रनाथ शर्मा

भारतीयदर्शनेषु सर्वप्रमाणज्येष्ठत्वेन प्रत्यक्षप्रमाणं स्वीकृतमस्ति। प्राभाकरमीमांसादर्शनेऽपि प्रमाणेषु प्रत्यक्षमेव प्राथम्येन निरूपितमस्ति। तस्य च प्रत्यक्षप्रमाणस्य स्वरूपप्रतिपादने दार्शनिकानां मध्ये वैमत्यं परिलक्ष्यते। तथाहि—इन्द्रियजन्यं ज्ञानं प्रत्यक्षमिति नैयायिकाः[1]। धर्मकीर्तिसम्मतं प्रत्यक्षलक्षणं तु "कल्पनापोढमभ्रान्तं प्रत्यक्षम्" इति। दिङ्नागेन तु केवलं 'कल्पनापोढं प्रत्यक्षमिति प्रत्यक्षप्रमाणस्य लक्षणं प्रतिपादितम्। शबरस्वामिनां मते "सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्यं, तत् प्रत्यक्षम्" इति प्रत्यक्षस्य लक्षणम्। भाट्टमीमांसकानां मते तावद् "इन्द्रियसन्निकर्षजं प्रमाणं प्रत्यक्षम्[2]। विभिन्नेषु दर्शनसम्प्रदायेषु प्रत्यक्षप्रमाणस्य यानि लक्षणानि प्रतिपादितानि सन्ति तेषु प्राभाकरमीमांसादर्शनप्रदर्शितं प्रत्यक्षस्वरूपं शालिकनाथमिश्रेण अतीव सरलतया आलोचितं वर्तते। शालिकनाथस्य प्रत्यक्षलक्षणं यथा—[3] "साक्षात्प्रतीतिः प्रत्यक्षम्" इति ननु किमिदं साक्षात्त्वं नाम? अर्थधर्मः? उत ज्ञानधर्मः? अथ ज्ञातृधर्म? तत्र अर्थधर्मत्वं साक्षात्त्वमिति भाट्टमीमांसकानामभिमतम्। ज्ञानधर्मत्वमित्यन्ये। ज्ञातृधर्मत्वं साक्षात्त्वमिति प्राभाकरा मन्वते साक्षात्त्वं तु स्वेन रूपेण वस्तुभानम्। अतएव साक्षात्प्रतीतिः स्वरूपप्रतीतिरिति नन्दीश्वरेण सम्यक् प्रतिपादितम्।[4] स्वस्यैव रूपं स्वरूपम्। असाधारणरूपमित्यर्थः। यस्य वस्तुनो यदसाधारणं स्वरूपं तेनैव रूपेण या व्यवह्रियते सा साक्षात्प्रतीतिः। साक्षात्प्रतीतिश्च मेयमातृप्रमासु भवति। अयमत्र निष्कर्षः—मेयं (प्रमेयं), माता (प्रमाता), प्रमा च प्रत्यक्षस्य विषया भवन्ति इति प्राभाकरमीमांसकानां मतम्। तदुक्तं शालिकनाथेन[5]— "मेयमातृप्रमासु सा" इति।

---

१. "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षमात्र—"न्यायसूत्रम्—१।१।४।

२. मानमेयोदयः—पृ० २८।

३. प्रकरण-पञ्चिकाया अमृतकलाप्रकरणम्।

४. प्रभाकरविजयस्य प्रत्यक्षलक्षणप्रकरणम्:

५. प्रकरणपञ्चिकाया अमृतकलाप्रकरणम्।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyder

सा च प्रतीतिः मेयेषु इन्द्रियसंयोगेन, तत्संयुक्तसमवायेन समवायेन च जायते इति त्रिविधस्सन्निकर्षो गृह्यते। ततः संयोगाद् रूपवन्महत्त्वात् स्पर्शवद् द्रव्यं प्रतीयते। संयुक्तसमवायात् तदाश्रयजातिगुणसंख्यासादृश्यादीनां ग्रहणम्। समवायास्तु शब्दग्रहणम्। तथाहि—

"मेयेष्विन्द्रिययोगोत्था द्रव्यजातिगुणेषु सा।" इति[1]। ननु कानि वा इन्द्रियाणि? उच्यते, घ्राण-रसन-नयन-त्वक्-श्रावणानि बाह्यानि। आन्तरञ्च इन्द्रियं मनः। घ्राणादीनां पञ्चानां बाह्येन्द्रियाणां मध्ये आद्यानि चत्वारि पृथिव्यप्तेजोवायुप्रकृतीनीति तार्किकवद् भाट्टैः प्राभाकरैश्च मीमांसकैः स्वीक्रियन्ते। श्रौत्रविषये परं विवादः। तत्र भाट्टा दिशः श्रौत्रमिति अध्रिगुप्रैषगतं वाक्यं प्रमाणयन्तः दिशात्मकं श्रौत्रमित्याचक्षते प्राभाकरास्तु तार्किकमतमनुवर्तमाना आकाशात्मकमेव श्रौत्रमाचक्षते। सा इन्द्रिययोगोत्था प्रतीतिः द्रव्यजातिगुणेषु भवतीति उक्तमेव। तत्र गुणा रूपरसगन्धस्पर्शाः संख्यापरिमाणपृथक्त्वानि संयोगविभागौ परत्वापरत्वे बुद्धिसुखदुःखेच्छाप्रयत्नास्तु प्रत्यक्षग्राह्याः।

प्राभाकरमीमांसानये द्रव्यजातिगुणेषु या साक्षात्प्रतीतिः सुवै सविकल्पकनिर्विकल्पकभेदेन द्विविधा भवति[2]। अविकल्पशब्दः निर्विकल्पकार्थे शालिकनाथेन प्रकरण-पञ्चिकायां व्यवह्रियते। तत्र विकल्पो नाम भेदको धर्मः जात्यादि। तैस्सह विकल्पेन वर्तत इति सविकल्पकम् निर्गतो विकल्पो यस्मिन् तन् निर्विकल्पकम्। तत्र सविकल्पकं प्रत्यक्षं स्वरूपमात्रग्रहणं द्रव्यजातिगुणेषूपपद्यते। तच्च स्वानुभवसिद्धम्। सविकल्पकदशायां गुणस्य गुणिना सह अन्वय इतरेभ्यो व्यतिरेकश्च पश्चादेव प्रतीयते 'शुक्लो घटः न कृष्ण' इति विशिष्टप्रतीतिसंभव इति सविकल्पकं विशिष्टविषयम् इति रामानुजाचार्याः[3]।

निर्विकल्पकं स्वरूपविषयम्। तथाहि इन्द्रियसम्प्रयोगानन्तरं प्रथमं द्रव्यगुणजातिषु स्वरूपमात्रज्ञानं जायते। तस्य च न द्रव्यमात्रं विषयः। जातिगुणयोरप्यवभासात्। अतो योग्यं सर्वमपोति निर्विकल्पकं स्वरूप-

---

१. तत्रैव।

२. सविकल्पाविकल्पा च प्रत्यक्षा बुद्धिरिष्यते—

प्रकरण-पञ्चिकायाः प्रमाणपारायणप्रकरणम्।

३. तन्त्ररहस्यम्—पृ० ६।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

विषयम् । भेदद्वयस्य विषये शालिकनाथेन एवमुक्तम् - [1]"आद्या विशिष्ट-विषया स्वरूपविषयेतरा इति । सविकल्पकदशायां प्रत्यक्षं विशेषणविशेष्य-भावम् अवगच्छति । अपरोक्षार्थावभासो हि अयं सविकल्पकप्रत्ययः । निर्विकल्पकदशायां तु विशिष्टबुद्धिर्नास्ति । तथाहि निर्विकल्पकदशायां वस्त्वन्तरानुसन्धानशून्यतया जातेरनुवृत्तिर्व्यावृत्तिश्च न प्रतीयते ।

अत्रेदमवधेयम्—प्रत्यक्षप्रमाणविषये प्राभाकरमीमांसकाः विशिष्टं वादं प्रतिपादयन्ति । स च वादः त्रिपुटीप्रत्यक्षवाद इति सुप्रसिद्धः । अस्य त्रिपुटीप्रत्यक्षवादप्रतिपादनेन प्राभाकरं मीमांसादर्शनं दर्शनसम्प्रदायेषु विशेषेण प्रसिद्धिं लभते ।[2] पूर्वमेवास्माभिरभिहितं यत् प्राभाकरमते प्रत्यक्षं मेयमातृप्रमास्वरूपमिति त्रिपुटं भवतीति । अस्य अयमाशयः—सर्वेषु स्मृत्यनुभवरूपेषु ज्ञानेषु मेयं माता मितिरिति त्रितयं प्राभाकराः स्वीकुर्वन्ति । तदेव त्रितयं त्रिपुटीत्यभिधीयते । त्रिपुटीमुररीकुर्वाणा प्राभाकरमीमांसका घटमहं जानामि, घटमहं स्मरामि इति अनुव्यवसायात्मकमेव ज्ञानमभ्युप-गच्छन्ति, न तु अयं घट इति ।

मातरि मितौ च प्रत्यक्षव्याख्यानप्रसङ्गे शालिकनाथेन उच्यते—

[3]"सर्वविज्ञानहेतुत्था मितौ मातरि च प्रमा ।
साक्षात्कर्तृत्वसामान्यात्प्रत्यक्षत्वेन सम्मता ॥" इति

अत्र प्रश्नस्समुदेति—मेय-मातृ-प्रमाणानां प्रतीतौ को वा विशेषः ? उच्यते—मेये मातरि च व्यतिरिक्ता प्रतीतिः साक्षात्कारवती, मितौ तु अव्यतिरिक्ता इति । उदाहरणं यथा—इदमहं जानामि, इदमहं स्मरामि इति । अत्र सर्वत्र मेयं (इदम्) माता (अहम्) मिति (जानामि) च इति त्रितयमेव अवभासते । मेयमात्रवभासरूपा संविदेका । न तु तस्यां संविदन्तरं चकास्ति । अपि च मेयानि अप्रकाशस्वभावानि । माता तु

---

१. प्रकरण-पञ्चिका—पृ० १६० ।

२. Prabhakara will always be remembered as the author of a peculiar theory of knowledge known as Triputi-pratyaksaavada on the theory of triple perception, EPB, P. I.

३. प्रकरण-पञ्चिकायाः अमृतकलाप्रकरणम् (का० ६) ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

प्रकाशमपेक्षते। प्रकाशश्च प्रकाशात्मकत्वात् नान्यमपेक्षते। जाग्रतो हि मेयानि माता च प्रकाशन्ते। सुषुप्तस्य तदा न तत् द्वयमपि प्रकाशते। मेयमात्रोरपि प्रकाशात्मकताभ्युपगमे सुषुप्तिदशायामपि प्रकाशते। अतएव अप्रकाशात्मकं तत् द्वयमपि स्वीकरणीयम्। प्रकाशस्य तु अप्रकाशमानस्य सत्तैव नाभ्युपेयते। तस्मात् स्वयंप्रकाशसमये मेयमातृप्रकाशः।

मेयानां मातुश्च स्वयं प्रकाशो नोपपद्यते इति तयोः परापेक्षा युक्ता। मितौ च काचिदनुपपत्तिर्नास्ति इति मितिः स्वयंप्रकाशा एव इति प्राभाकराणामभिमतम्। भवतु नाम, प्राभाकरसम्मतं प्रत्यक्षप्रमाणस्य लक्षणमतीव सरलं समीचीनं चेति प्रतिभाति इत्यलं विस्तरेण।

संस्कृत-विभागे
गुवाहाटी विश्वविद्यालये, आसाम

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

णत्वविधाने पाणिनिः

श्रीहरिनारायणः तिवारी

शब्दशास्त्रस्य परमाचार्येण भगवता पाणिनिना अष्टसु अध्यायेषु विभक्ता अष्टाध्यायी निरमायि। तत्र प्रत्येकमध्याये चत्वारः पादाः सन्ति। अष्टमाध्यायस्य चतुर्थे पादे प्रथमादेव णत्वविधायकानि सूत्राणि पठितानि। तत्र प्रथमं सूत्रम्—

[1]रषाभ्यां नो णः समानपदे, रषाभ्यां पञ्चम्यन्तं निमित्तपदम्। नः षष्ठ्यन्तमुद्देश्यवचनम्। णः प्रथमान्तं विधेयवचनम्। समानपदे इति नियमः। एवं रषाभ्यामव्यवहितोत्तरस्य नस्य णः समानपदे। यथा— यूष्णः, पूष्णः इति।

[2]अट्कुप्वाङ्नुम्व्यवायेऽपि, अट् च कुश्च पुश्च आङ् च नुम् चेति इतरेतरयोगद्वन्द्वः। तैर्व्यवायेऽपीत्यर्थः। पूर्वसूत्रं सम्पूर्णमनुवर्तते। अट् कवर्ग पवर्ग आङ् नुम् एतैर्व्यस्तैः यथासम्भवं मिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः स्यात् समानपदे। उदाहरणम्—रामाणाम्, रामेण, हरीणाम्, हरिणा। समानपदत्वं चात्रसूत्रे "पदे" इतीयतैव सामर्थ्याद् एकपदत्वे लब्धेऽपि समानग्रहणं यत्समानमेव। समानत्वञ्च निमित्तानधिकरणनिमित्तिमत्पादाघटितत्वम्। एवं स्वीकारेण "रामनाम" इत्यत्र णत्वापत्तिर्निरस्ता। तथा हि—निमित्तपदं रामपदम्, तदनधिकरणनिमित्तिमत्पदं नामपदं तदघटितत्वं रामपदमिति णत्वशङ्का निरस्ता। एवमेव रामनाथ इत्यत्रापि णत्ववारणं बोध्यम्।

"[3]पूर्वपदात्संज्ञायामगः" पूर्वपदादिपञ्चम्यन्तं निमित्तपदम्, उत्तरपदं विनापूर्वपदमनुपपन्नं पूर्वोत्तरपदयोः नित्यसाकाङ्क्षत्वात्। अतो येन विना यदनुपपन्नं तत्तेनाक्षिप्यते" इति न्यायेन उत्तरपदमाक्षिप्तम्। पूर्वोत्तरपदं च समास एव सम्भवतीति तत्रैवैतस्य प्रवृत्तिः। पूर्वसूत्राद् रषाभ्यां नो णः इति पदत्रयमनुवर्तते। रषाभ्यामित्यनेन लब्धो रेफः षश्च प्रत्येकमन्वेति।

---

१. पा० सू० ८।४।१। २. पा० सू० ८।४।२।
३. पा० सू० ८।४।३।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyder

तथा च—रेफषकारात्मकात् पूर्वपदस्थान्निमित्तात् उत्तरपदस्थस्य नस्य णः स्यात् । अगः इति पञ्चम्यन्तं निषेधवचनम् । उदाहरणं यथा—द्रुणसः, खरणसः शूर्पणखा । अगः किम् ? ऋचामयनम् ऋगयनम् । अत्र गकारान्तात्परस्य उत्तरपदस्थस्य नस्य णो न भवति । अणृगयनादिभ्यश्च इति निपातनाण्णत्वमाश्रित्य अगः इति प्रत्याख्यातमाकारे ।

"[1]वनं पुरगामिश्रकासिध्रकासारिकाकोटराग्रेभ्यः" वनमित्यत्र षष्ठ्यर्थे प्रथमा । पूर्वसूत्रात् "नो णः" इति पदद्वयमनुवर्तते । पुरगादिपञ्चशब्दानां दीर्घनिर्देशसामर्थ्यात् "वनगिर्योः संज्ञायां कोटरकिंशुलुकादीनाम्" इत्यनेन वनशब्दाव्यवहितपूर्वत्वविशिष्टानां पुरगादीनां पञ्चानामेव ग्रहणं व्याख्यानात् । "वनगिर्योः संज्ञायां कोटरकिंशुलुकादीनाम्" इत्यनेन संज्ञायामेव दीर्घविधानेन तत्र च पूर्वपदात्संज्ञायामगः इत्यनेनैव णत्वसिद्धे नियमार्थमिदं सूत्रम् । अत एवाह सिद्धान्तकौमुद्यां श्रीमद्भट्टोजिदीक्षितः—इह कोटरान्ताः पञ्चदीर्घविधौ कोटरादयो बोध्याः । तेषां कृतदीर्घाणां णत्वविधौ निर्देशो नियमार्थः । अग्रशब्दस्य तु विध्यर्थः । वनशब्दस्योत्तरपदस्य एभ्य एव णत्वं नान्येभ्यः । उदाहरणम्—पुरगावणम्, मिश्रकावणम्, सिध्रकावणम्, शारिकावणम्, कोटरावणम् । णत्वविधावग्रेशब्दस्योपदेशस्तु अग्रेवणशब्देऽपूर्वणत्वविध्यर्थं एव, न तु नियमार्थः, अग्रेवणशब्दस्य असंज्ञत्वात् । न च पुरगावणशब्दे गकारव्यवधानात् पूर्वपदात्संज्ञायामगः इत्यस्य प्राप्त्यभावात् अत्रापि णत्वं विध्यर्थमिति वाच्यम्, अगः इति हि पञ्चमी । [2]तस्मादित्युत्तरस्येति परिभाषासूत्र-सहकारेण अव्यवहितोत्तरत्वार्थलाभेन गकारान्तात् पूर्वपदात्परस्य णत्वं नेति लभ्यते । पुरगाशब्दस्तु अकारान्तः, न तु गकारान्तः इति तत्र "अगः" इति निषेधाप्राप्त्या पुरगाग्रहणं नियमार्थमेव । पुरगावणमित्यादयः नरकविशेषाणां संज्ञा । वनस्य अग्रेऽग्रेवणम् इत्यत्र "[3]राजदन्तादिषु परम्" इत्यनेन पूर्वनिपातार्हस्य षष्ठ्यन्तस्य परनिपातः, निपातनात् सप्तम्या अलुक् च । विग्रहे सप्तम्यर्थस्य प्राधान्येऽपि समासे प्रातिपदिकार्थमात्रे प्रथमा, सप्तम्यर्थस्य प्रातिपदिकार्थेऽन्तर्भावात् ।

[4]प्रनिरन्तः शरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि । पूर्वसूत्रात् वनमित्यनुवर्तते । तत्र षष्ठ्यर्थे प्रथमा । तथा च सूत्रार्थः—प्र निर्

---

१. पा० सू० ८।४।४ ।
२. पा० सू० १।१।६७ ।
३. पा० सू० २।२।३१ ।
४. पा० सू० ८।४।५ ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

अन्तर् शर इक्षु प्लक्ष आम्र कार्ष्यखदिर-पीयुक्षा इत्येतेभ्यः वनशब्दस्य नस्य णः स्याद् असंज्ञायामपि, अपिना=संज्ञायामपि। उदाहरणम्—प्रवणम्, अन्तर्वणम्, आम्रवणम्, कार्ष्यवणम्। इह पात् परत्वाण् णत्वम्। खदिर-वणम्, पियुक्षावणम् इति। उपर्युक्तानि एतानि नित्यानि, अग्रेविभाषोपदिष्टत्वात्।

विभाषौषधिवनस्पतिभ्यः। एभ्यो वनस्य णत्वं वा स्यात्। अत्र सूत्रे वनस्पतिशब्देन वृक्षसामान्यं विवक्षितम्[१], लुपियुक्तवद्व्यक्तिवचने इति सूत्रे[२] भाष्ये शिरीषवणमित्यत्र शिरीषे वनस्पतित्वस्य व्यवहृतत्वात्। अत्र च वार्तिककारः "द्व्यऽत्र्यज्भ्यामेव" इत्याह। तेन दुर्वावणम्, दुर्वावनम्, शिरीषवणम्, शिरीषवनमिति। देवदारुवनमित्यत्र णत्वं ना; चतुरच्कत्वात्।

अत्र सङ्कोच-वार्तिकम् "इरिकादिभ्यः प्रतिषेधो वक्तव्यः" इति। इरिकादिगणे च पठिताः शब्दाः "इरिका, तिमिर, समीर, कुबेर, हरि, कर्मार" इति। एतेभ्यः परस्य वनशब्दस्य णत्वं नेति भावः। इरिकादिराकृतिगणः।

अह्नोऽदन्तात्[३]। अदन्तपूर्वपदस्थाद् रेफात् परस्य अह्नादेशस्य नस्य णः स्यात् सर्वाह्णः, पूर्वाह्णः। नित्यं सूत्रमिदम्, विभाषाद्वयमध्ये पठितत्वात्।

वाहनमाहितात्[४]। वाहनमित्यत्र षष्ठ्यर्थे प्रथमा। पूर्वसूत्राद् "नो णः" इति पदद्वयमनुवर्तते। वाहने आधीयते वहनाय यत्, न तु स्वयमेवारोढुं शक्नोति तदाहितम्। तथा चार्थः—आरोप्य यदुह्यते तद्वाचिस्थान्निमित्तात्परस्य वाहननकारस्य णत्वं स्यात्। इक्षुवाहणम्। आहितात् किम्? इन्द्रवाहनम्। यदा इन्द्रः स्वयमेवारोहति तदा प्रत्युदाहरणमिदम्। उह्यते येन तद्वाहनमित्यत्र करणे ल्युट्प्रत्ययः, इहैव सूत्रे निपातनाद् वृद्धिः।

पानं देशे[५]। पानमित्यत्र षष्ठ्यर्थे प्रथमा। सूत्रार्थश्च—पूर्वपदस्थान्निमित्तात् परस्य पानस्य नस्य णत्वं स्याद् देशे गम्यमाने। क्षीरं पानं येषान्ते क्षीरपाणा उशीनराः। सुरापाणाः प्राच्याः। पीयत इति पानं कर्मणि ल्युट्।

१. पा० सू० ८।४।६। २. पा० सू० १।२।५२।
३. पा० सू० ८।४।७। ४. पा० सू० ८।४।८।
५. पा० सू० ८।४।९।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

वा भावकरणयोः[१]। पानस्य इत्येव णत्वम् क्षीरपाणम्। क्षीरपानम्। अत्र वार्तिकम्—"वा प्रकरणे गिरिनद्यादीनां वोपसंख्यानम्"। अत्र गणे पठिताः शब्दाः—गिरिनदी, गिरिनख, गिरिनद्ध, गिरिनितम्ब, चक्रनदी, चक्रनितम्ब, तूर्यमान, माषोन, आर्गयन। इति गिरिनद्यादिराकृतिगणः। गिरिणदी-गिरिनदी। चक्रणितम्बा-चक्रनितम्बा।

प्रातिपदिकान्तनुम् विभक्तिषु च[२]। "शेषे विभाषाऽकखादावषान्त उपदेशे" इत्यग्रिमे सूत्रे विभाषापदपाठात् विभाषाद्वयमध्येऽस्य पठितत्वेऽपि इह सूत्रे नित्यत्वं नास्ति, व्याख्यानात्। अतः "वा भावकरणयोः" इत्यस्माद् वेति पदमनुवर्तते। तथा च सूत्रार्थः-पूर्वपदस्थान्निमित्तात्परस्य एषु स्थितस्य नस्य णो वा स्यात्। प्रातिपदिकान्ते उदाहरणम्—माषवापिणौ, माषवापिनौ। माषान् वपते इति विग्रहः "बहुलमाभीक्ष्ण्ये"[३] इत्यनेन ज्ञातावपि सुप्युपपदे णिनिः। उपपदसमासः। वापिन् शब्दस्य कृदन्तत्वेन प्रातिपदिकत्वात् तदन्तस्य नस्य णत्वम्। नुम्—व्रीहिवापाणि, व्रीहिवापानि। व्रीहीन् वपतीति कर्मण्यण्। क्लीबे जसि रूपम्। विभक्तेरुदाहरणम्—माषवापेण, माषवापेन।

अत्र वार्तिककारः—"उत्तरपदं यत्प्रातिपदिकं तदन्तस्यैव णत्वम्" तेनेह न—गर्गाणां भगिनी गर्गभगिनी। अत्र प्रातिपदिकान्त ईकारः। न तु नकारः। अत एव नुम् ग्रहणं कृतम्। अङ्गस्य नुम्बिधानात् तद्भक्तो हि नुम्, न तूत्तरपदस्थः। किञ्च प्रहिण्वमित्यादौ हिवेर्नुमो णत्वार्थमपिनुम्ग्रहणम्। प्रेन्वनमित्यादौ तु क्षुम्नादित्वान्न।

अत्र निषेध-वार्तिकम्—"युवादेर्न" इति। गणपाठश्च—युवन्, पक्व, अहन्, इति युवादिः। (आर्ययूना, क्षत्रिययूना, प्रपकानि, क्षत्रियपक्वानि, दीर्घाह्नी) आकृतिगणोऽयम्।

एकाजुत्तरपदेणः[४]। एकाजुत्तरपदं यस्य तस्मिन् समासे पूर्वपदस्थान्निमित्तात्परस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्य नित्यं णत्वं स्यात्। पूर्वसूत्राण् णः इत्यनुवृत्तेः सिद्धे इह सूत्रे पुनः णग्रहणं स्पष्टार्थम्। पुनर्भूणाम्।

१. पा० सू० ८।४।१०।
२. पा० सू० ८।४।११।
३. पा० सू० ३।१।८१।
४. पा० सू० ८।४।१२।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

कुमति च[1]। प्रातिपदिकान्तनुम्विभक्तिषु इत्यनुवर्तते । नित्यमिदं सूत्रम् । कवर्गवत्युत्तरपदे पूर्वपदस्थान्निमित्तात्परस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्य नित्यं णत्वं स्यादित्यर्थः । उदाहरणञ्चास्य—हरिकामिणौ, हरिकामाणि, हरिकामेण । अत्र केचित्—कवर्गाद्युत्तरपदे णत्वमित्यामनन्ति तन्नोचितम्, क्षुभ्नादिषु चेति निषेधसूत्रे गणे "शराग्नि" इत्यस्यापि निषेधमुखेन पठितत्वात् ।

"उपसर्गादसमासेऽपि णोपदेशस्य"[2]। अत्रोपसर्गपदमुपसर्गस्थे लाक्षणिकम् । सूत्रार्थः—उससर्गस्थान्निमित्तात् परस्य णोपदेशस्य धातोर्नस्य णः स्यात्समासेऽसमासेऽपि । प्रणदति" इत्युदाहरणम् । णद अव्यक्ते शब्दे । अत्र सूत्रे णोपदेशस्य धातोरित्यर्थः कृतः, व्याख्यानात् ।

हिनुमीना[3]। हिनु मीना अनयोः द्वन्द्वात् षष्ठीद्विवचनस्य आर्षो लुक् । रषाभ्यां नो णः इत्यनुवर्तते । उपसर्गादित्यनुवर्तते । उपसर्गस्थान्निमित्तात्परस्य एतयोर्नस्य णः स्याद् इति सूत्रार्थः । प्रहिणोति । हि[4] गतौ वृद्धौ च । प्रमीणाति, प्रमीणोतः मीञ्[5] हिंसायाम् ।

आनि लोट्[6]। लोडिति आनि इति लुप्तषष्ठीकं पदम् । रषाभ्यां नो णः, उपसर्गाद् इति पदान्यनुवर्तन्ते । सूत्रार्थश्च—उपसर्गस्थान्निमित्तात्परस्य लोडादेशस्य आनीत्यस्य नस्य णः स्यात् । उदाहरणम्—प्रभवाणि ।

"नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोति देग्धिषु च"[7]। रषाभ्यां नो णः, उपसर्गाद् इत्यनुवर्तते । सूत्रार्थश्च—उपसर्गस्थान्निमित्तात्परस्य नेर्नस्य णः स्याद् गदादिषु परेषु । उदाहरणम्—प्रणिगदति, प्रणिपतति, प्रणिनदति, इत्यादि ।

शेषे विभाषाऽकखादावषान्त उपदेशे[8]। अत्र अकखादावितिच्छेदः । उपदेशेकादिखादिषान्तवर्जे गदनदादेरन्यस्मिन् धातौ परे उपसर्गस्थान्निमित्तात्परस्य नेर्नस्य णत्वं वा स्यात् । उदाहरणम्—प्रनिभवति प्रणिभवति इति ।

---

१. पा० सू० ८।४।१३ । २. पा० सू० ८।४।१४ ।
३. पा० सू० ८।४।१५ । ४. धा० पा० १२५७ ।
५. धा० पा० १४७६ । ६. पा० सू० ८।४।१६ ।
७. पा० सू० ८।४।१७ । ८. पा० सू० ८।४।१८ ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyder

अनितेः[१]। अन प्राणार्थकोधातुः[२]। उपसर्गस्थान्निमित्तात्परस्य अनितेः नस्य णः स्यात्। प्राणिति।

अन्तः[३]।

अनितेः, रषाभ्यां नोणः इत्यनुवर्तते। पदान्तस्य अनितेः नस्य णत्वं स्यादुपसर्गस्थान्निमित्तात्परश्चेत्। हे प्राण्।

"उभौ साभ्यासस्य"[४] साभ्यासस्य अनितेरुभौ नकारौ णत्वं प्राप्नुतो निमित्ते सति। प्राणिणत्।

"हन्तेरत्पूर्वस्य"[५]। अस्य सूत्रस्य योगविभागः कृतः। "हन्तेः" इत्येको योगः। अत्पूर्वस्य इत्येको योगः। रषाभ्यां नो णः, उपसर्गादित्यनुवर्तते। तात्स्थ्यात्ताच्छब्द्यम्, उपसर्गादिति लभ्यते। तच्च रषयोः प्रत्येकमन्वेति। तथा च सूत्रार्थः—उपसर्गस्थान्निमित्तात् परस्य हन्तेर्नस्य णत्वं स्यात् प्रहण्यात् इत्युदाहरणम्।

ततः "अत्पूर्वस्य" इति। अत्रोपसर्गाद् इति निवृत्तम्, व्याख्यानात्। हन्तेरिति, रषाभ्यां नोणः इत्यनुवर्तते। हन्तेरत्पूर्वस्य नस्य णो लभ्यते। एवं सिद्धे सत्यारम्भो नियमार्थः, तेन—हन्तेरत्पूर्वस्यैव नस्य णत्वम्, नान्यस्य। तेनेह न—प्रघ्नन्ति। अत्र हन्घटकनकास्य अत्पूर्वकत्वाभावान्न णत्वम्।

योगविभागसामर्थ्याद् "अनन्तस्य विधिर्भवति प्रतिषेधो वा"[६] इति न्यायं बाधित्वा "एकाजुत्तरपदे णः"[७] इति णत्वमपि निवर्तते। वृत्रघ्नः, वृत्रघ्ना, इत्युदाहरणम्।

यत्तु वृत्रघ्नः इत्यादौ वैकल्पिकं णत्वं माधवेनोक्तं तद्भाष्यवार्तिकविरुद्धत्वाद्धेयम्। तथा च "अट्कुप्वाङ्नुम्व्यवायेऽपि"[८] इति सूत्रे भाष्ये "कुव्यवाये हादेशेषु प्रतिषेधो वक्तव्यः"[९] किं प्रयोजनम्? वृत्रघ्नः स्रुग्घ्नः, प्राघानि, इति यथा सिद्ध्येरन्। अथ च "हन्तेरत्पूर्वस्य"[१०] इति सूत्रेऽत्पूर्वग्रहणं न

---

१. पा० सू० ८।४।१९।
२. ध० पा० १०७०।
३. पा० सू० ८।४।२०।
४. पा० सू० ८।४।२१।
५. पा० सू० ८।४।२२।
६. पा० ६२।
७. पा० सू० ८।४।१२।
८. पा० सू० ८।४।२।
९. भा० वा० ८।४।२।
१०. पा० सू० ८।४।२२।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

कर्तव्यं भवति। अत्र णत्वप्रकरणे हादेशकुव्यवाये प्रतिषेधविज्ञानात् "प्रातिपदिकान्तनुम्विभक्तिषु च"[१] इति णत्वमपि हादेशकुव्यवाये न भवतीति विज्ञायते। तद्विरोधाद् माधवमतमुपेक्ष्यमिति।

"वमोर्वा"[२] उपसर्गस्थान्निमित्तात्परस्य हन्तेर्नस्य णो वा स्याद् वमयोः परयोः। प्रहण्मि, प्रहन्मि। प्रहण्वः, प्रहन्मः।

"अन्तरदेशे"[३] अन्तःशब्दाद् हन्तेर्नस्य णः स्यात्। उदाहरणम्—अन्तर्हणनम्। देशे तु अन्तर्हननो देशः।

"अयनं च"[४] अन्तर् इत्यनुवर्तते। सूत्रार्थः—अन्तःशब्दात्परस्य अयनस्य नस्य णः स्यात्। अयनमित्यत्र षष्ठ्यर्थे प्रथमा। अन्तरयणम्। अदेश इत्येव, अन्तरयनो देशः।

"छन्दस्यृदवग्रहात्"[५] इदं छान्दसम्। अवगृह्यते=विच्छिद्य पठ्यते इत्यवग्रहः। ऋच्चासाववग्रहश्च ऋदवग्रहस्तस्मात्। ऋकारान्तादवग्रहात् परस्य नस्य णः स्याच्छन्दसि। उदाहरणम्—नृमणः, पितृयाणम्।

"नश्च धातुस्थोरुषुभ्यः"[६] धातौ तिष्ठतीति धातुस्थो रेफः षकारश्च उरु इति स्वरूपग्रहणम्। षु इति कृतषत्वस्य सुञो ग्रहणम्, न, तु सप्तमीबहुवचनस्य, नसिति नासिकादेशस्य सामान्येन ग्रहणं नसादेशस्य चापि। तथा च सूत्रार्थः—धातुस्थान्निमित्तात्परस्य ऊरूशब्दात् षुशब्दाच्च परस्य नस् इत्येतस्य नस्य णः स्यात्, इति। अग्ने रक्षां णः। शिक्षा णो अस्मिन्। ऊरु णंस्कृधि। अभिषु णः। मोषु णः।

"उपसर्गाद् बहुलम्"[७] उपसर्गस्थान्निमित्तात्परस्य नसो नस्य णः स्यात् बहुलम्। प्रगता नासिका यस्यासौ प्रणसः। समासान्तोऽच्प्रत्ययः नसादेशश्च नासिकाशब्दस्य।

"कृत्यचः"[८] उपसर्गस्थान्निमित्तात्परस्य अच उत्तरस्य कृत्स्थस्य नस्य णत्वं स्यात्। उदाहरणम्—प्रयाणीयम्। अचः किम्? प्रमग्नः। अत्र वार्तिकम्—"निर्विण्णस्योपसंख्यानम्" इति। अतः परत्वाभावादप्राप्ते वचनम्। परस्य णत्वं पूर्वस्य ष्टुत्वम् इति। उदाहरणम्—निर्विण्णः।

---

१. पा० सू० ८।४।११। २. पा० सू० ८।४।२३।
३. पा० सू० ८।४।२४। ४. पा० सू० ८।४।२५।
५. पा० सू० ८।४।२६। ६. पा० सू० ८।४।२७।
७. पा० सू० ८।४।२८। ८. पा० सू० ८।४।२८।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

"णेर्विभाषा"[१] उपसर्गस्थान्निमित्तात्परस्य ण्यन्ताद्विहितो यः कृत्तत्स्थस्य नस्य णो वा स्यात्। प्रयापणीयम्। विहितविशेषणं किम्? यका व्यवधाने यथा स्यात्। प्राप्यमाणं पश्य। णत्वे कर्तव्ये दुर् इत्यस्य उपसर्गत्वनिषेधः। तथा च वार्तिकम्—"णत्वे दुर् उपसर्गत्वं न" दुर्यानम्, दुर्यापनम्।

"हलश्चेजुपधात्"[२] हलादेरिजुपधात् परस्य कृन्नस्याचः परस्य णो वा स्यात्। प्रकोपणीयम्, प्रकोपनीयम्, हलः किम्? प्रोहणीयम्। इजुपधात् किम्? प्रवपणीयम्।

"इजादेः सनुमः"[३] "णेर्विभाषा" इति निवृत्तम्। "कृत्यचः" इत्यनुवर्तते। "हलश्चेजुपधात्" इत्यतो "हलः" इत्यनुवर्तते प्रकृतिविशेषणत्वात्तादन्तविधिः। तथा च सूत्रार्थः—सनुमो हलन्ताद् इजुपधात् परस्य कृन्नस्य णः स्यादिति लभ्यते। एवं च प्रेङ्खणीयमित्यादौ "कृत्यचः" इत्यनेन एव सिद्धे नियमार्थमिदम्—सनुमश्चेद् भवति तर्हि इजादेर्हलन्ताद् विहितो यः कृत्तत्स्थस्यैव णत्वमिति सूत्रार्थः। नियमसूत्रस्य फलम्—प्रेन्वनम् इत्यत्र णत्वनिषेधः।

"वा निंसनिक्षनिन्दाम्"[४] एषां नस्य णो वा स्यात् कृतिपरे। उदाहरणम्—प्रणिंसितव्यम्, प्रणिक्षितव्यम्, प्रणिन्दितव्यम्। णत्वाभावपक्षे प्रनिंसितव्यम्, प्रनिक्षितव्यम्, प्रनिन्दितव्यम्।

इतः परं निषेधसूत्राणि व्याख्यायन्ते—

"न भाभूपूकमिगमिप्यायीवेपाम्"[५] एभ्यः कृन्नस्य णो न। प्रभानीयम्, "पुत्र एवेहग्रहणमिष्यते"[६] पुङस्तु प्रपवणीयः सोमः। "ण्यन्तभादीनामुपसंख्यानम्"[७] प्रभापनीयम्, प्रख्यानीयम् इत्यत्र "ख्शाञः शस्य यो वा"[८] इत्यनेन शस्य यकारादेशः, तस्याऽसिद्धत्वान्न णत्वम्।

"षात्पदान्तात्"[९] पदान्तात् परस्य नस्य णो न। निष्पानम्। सर्पिष्पानम्। षात् किम्? निर्णयः। पदान्तात् किम्? पुष्णाति। पदेऽन्तः पदान्तः, इति सप्तमी समासोऽयम। तेनेह न सुसर्पिष्केण।

---

१. पा० सू० ८।४।३०।
२. पा० सू० ८।४।३१।
३. पा० सू० ८।४।३२।
४. पा० सू० ८।४।३३।
५. पा० सू० ८।४।३४।
६. भा० वा० ८।४।३४।
७. भा० वा० ८।४।३४।
८. भा० वा० १५८६।
९. पा० सू० ८।४।३५।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

"नशेः षान्तस्य" षान्तस्य नशेः णत्वं ने[1]ति सूत्रार्थः। उदाहरणमस्य—प्रनष्टा। पूर्वं षकारस्य सत इदानीमादेशवशेन षान्तत्वाभावेऽपि णत्वनिषेध-प्राप्त्यर्थमन्तग्रहणमित्यर्थः। तेन प्रनङ्क्ष्यति इत्यत्र षस्य कत्वे कृतेऽपि साम्प्रतिकाभावेऽपि भूतपूर्वंगतिराश्रीयते" इति नियमान्न णत्वम्।

"पदान्तस्य"[2] पदान्तस्य नस्य णत्वं न स्यात्। रामान्, हरीन्, हे कर्मन्। इति।

"पदव्यवायेऽपि"[3] पदेन निमित्तकार्यिणोः व्यवायेऽपि णत्वं न भवतीति। माषकुम्भवापेन इत्यत्र माषाणां कुम्भः माषकुम्भस्तस्य वापः माषकुम्भ्वा-पस्तेन माषकुम्भवापेन। अत्र निमित्तकार्यिणोः षकारनकारयोः कुम्भपदेन व्यवधानान्न णत्वमित्यर्थः। एवं चतुरङ्गयोगेन। चत्वारि अङ्गानि रथ-गजतुरगपदातिरूपाणि यस्य तच्चतुरङ्गं सैन्यम्, तेन योगश्चतुरङ्गयोगस्तेन चतुरङ्गयोगेन इत्यत्र निमित्तकार्यिणो रेफनकारयोरङ्गपदेन व्यवधानान्न णत्वमिति। उभयत्रापि कुम्भशब्दस्य, अङ्गशब्दस्य च प्रत्ययलक्षणेन अन्त-र्वर्तिनी विभक्तिमाश्रित्य पदत्वं बोध्यम्!

उत्तारपदत्वे चापदादिविधौ प्रतिषेधस्तु नात्र प्रवर्तते। उत्तारखण्डस्य कार्मंभावत्वे सत्येव तत्प्रवृत्तिस्वीकारात्। अत एव "न लुमताङ्गस्य"[4] इत्यत्र "परमवाचा" इत्येवोदाहरणमुक्तं भाष्ये। अत्र हि वाक्शब्दस्य उत्तारपदस्य कुत्वरूपकार्यंभाक्त्वमस्ति इति, तस्यान्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वाभावात् कुत्वं न भवति। अत एव "कुमति[5] च" इति सूत्रे भाष्ये माषाणां कुम्भः माषकुम्भस्तस्य वापो माषकुम्भवापस्तेन माषकुम्भवापेन इत्यत्र "पदव्यवायेऽपि" इति निषेध-प्रवृत्तये "प्रातिपदिकान्त[6]—"इति शात्वप्रवृत्तिरूपन्यस्ता संगच्छते। न चैव सति रम्यविणा इत्यत्र वि इत्युत्तार-खण्डस्य कार्यभावत्वाभावात् "उत्तारपदत्वे चापदादिविधौ प्रतिषेधः"[7] इति प्रत्ययलक्षणनिषेधस्य अप्रवृत्तौ अन्तर्वर्तिविभक्त्याश्रयेण पदत्वात् "पदव्यवा-येऽपि" इति णत्वनिषेधः स्यादिति वाच्यम्, पदे परे यत्पदम्, तेन व्यवाये णत्वं नेत्यर्थस्यैव भाष्यसम्मतत्वात्। रम्यविणा इत्यत्र अन्तर्वर्तिविभक्त्या

---

१. पा० सू० ८।४।३६। २. पा० सू० ८।४।३७।
३. पा० सू० ८।४।३८। ४. पा० सू० १।१।६३।
५. पा० सू० ८।४।१३। ६. पा० सू० ८।४।११।
७. वा० पा० ४८०।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyder

विशब्दस्य पदत्वेऽपि तस्य पदपरकत्वाभावान्न णत्वनिषेधः। एतेन पुनर्भूणामित्यत्रापि णत्वं निर्बाधमिति दिक्।

"क्षुम्नादिषु च"[१] एषु णत्वं न स्यात्। दीर्घाह्नी प्रावृट्। क्षुम्नादिगणपाठश्च—क्षुम्ना, नृगमन, नन्दिन, नन्दन, नगर। एतानि पदानि संज्ञायां प्रयोजयन्ति। हरिनन्दी, हरिनन्दनः, गिरिनगरम्,। नृतिर्मङि प्रयोजयति। नर्तनः नन्दन, गहन, निवेश, निवास, अग्नि, अनूप–एतानि उत्तरपदानि प्रयोजयन्ति। परिवर्तनम्, परिगहनम्, परिनन्दनम्, शरनिवेशः, शरनिवासः शराग्निः, दर्भानूपः। आचार्यादणत्वं च। आचार्यभोगीनः। आकृतिगणोऽयम्।

पाठान्तरम्—क्षुम्ना, तृप्नु, नृनमन, नरनगर, नन्दन,। यङ्नृती। गिरिनदी, गृहगमन, निवेश, निवास, अग्नि, अनूप, आचार्यभोगीन, चतुर्हायन,।

द्वारिकादीनि वनोत्तारपदानि संज्ञायाम्। द्वारिका, तिमिर, समीर, कुबेर, हरि, कर्मार, इति क्षुम्नादि।

विशेषः —सूत्रेष्वदृष्टपदं सूत्रान्तरादनुवर्तनीयं सर्वत्र इति नियमः अत्रायि आश्रीयताम्।

क्षुम्नादिगणे परिवर्तनशब्दः पठितः, तत्र च तकारस्य अट्कुप्वाङ्नुम्सु अदृष्टत्वाद् नकारस्य च निमित्तानिमित्तिनो रेफनकारयोः मध्ये पतितत्वात् तद्व्यवधाने कथं णत्वप्राप्तिरिति विद्वद्भिरनुशील्यताम्।

(सं० वि० ध० वि० सं०, का० हि० वि० वि०)

---

१. पा० सू० ८।४।३९।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

सप्तद्वीपवती पृथ्वी

कैलाशनाथ द्विवेदी

विशालभूमण्डलं विश्वकर्तुः विरचने विस्मयकरं वर्तते। परमोदार-रमणीयाऽस्मिन् परिलक्ष्यते पृथ्वी प्राकृतिकरूपे रम्यतरा। नानानदीनद-वनगिरिसागरसरोवरद्वीपादीनां नैसर्गिकशोभया पृथ्वी सदैव सर्वेभ्यः स्पृहणीया संजाता। समुद्ररशना पृथ्वी प्रथिता सर्वतः सागरसलिलावृतैर-नेकैः रम्यद्वीपैः। एतेषां पृथिव्या द्वीपानां संख्या पृथक्-पृथक् निर्दिष्टा पुरातनपुराणादिसाहित्यग्रन्थेषु। [1]ऋग्वेदेऽष्टममण्डले सागरे द्वीपानामव-स्थितिर्ज्ञायते।

वाल्मीकिरामायणे (किष्किन्धाकाण्डे) [2]जम्बूद्वीपसहितयवसुवर्णरूप्यक-लंकादिनानाद्वीपानामुल्लेखोऽस्ति। कविकुलगुरुः[3] कालिदासः स्वकाव्य-कृतिषु पृथिव्याः विभिन्नसंख्यकद्वीपानामुल्लेखं करोति--

"पुरा सप्तद्वीपामवति वसुधामप्रतिरथः।" अभि० शा० ७।३३

"संग्रामनिर्विष्टसहस्रबाहुरष्टादशद्वीपनिखातयूपः।" रघु० ६।३८

डॉ० वासुदेवशरणोऽग्रवालः, पं० गिरिधरशर्मचतुर्वेदः[4]प्रभृतिविद्वांसः पृथिव्या द्वीपानां चतुःसप्तनवसंख्याश्चापि स्वीकुर्वन्ति। किन्तु पुराणेषु पृथिव्या विराडभौगोलिकविस्तारदृष्ट्या प्रमुखतया सप्तद्वीपा एव प्रति-पादिताः सन्ति। इमे सप्तद्वीपाः सन्ति—

"जम्बूप्लक्षाह्वयौ द्वीपौ शाल्मलिश्चापरो द्विज।
कुशः क्रौञ्चस्तथा शाकः पुष्करश्चैव सप्तमः॥

---

१. ऋग्वेदे ८।२०।४ वि द्वीपानि पापतन् तिष्ठद् दुच्छुनो में।

२. वा० रामायणे, किष्किन्धा० ४०।३०

यत्नवन्तो यवद्वीपं सप्तराज्योपशोभितम्।
सुवर्णरूप्यकद्वीपं सुवर्णाकरमण्डितम्॥

४०।३१ यवद्वीपमतिक्रम्य……। ४१।२३ द्वीपस्तस्यापरे पारे…।

३. द्रष्टव्यो लेखकस्य शोधग्रन्थः "कालिदास की कृतियों में भौगोलिक स्थलों का प्रत्यभिज्ञान" कानपुर, १९६९ (अध्याय ४)।

४. पुराणपरिशीलन, पटना, २०२७ वि०, पृ० ३११।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

एते द्वीपाः समुद्रैस्तु सप्तसप्तभिरावृताः ।
लवणेक्षुसुरासर्पिर्दधिदुग्धजलैः सम् ॥"

विष्णु पु० २।५, ६

पुराणेषु पृथिव्याः सप्तद्वीपानां स्वरूपा भौगोलिकदृष्ट्या वर्णिता भुवनकोशरूपेण । एषामभिधानं प्रमुखवनस्पति-(वृक्ष)-नामाधारेण स्थलसंरचनायां विशिष्टपर्वतादीनां नामाधारेण वा कृतम् । सप्तद्वीपेषु क्षेत्रीयविभाजनदृष्ट्या सप्तभूखण्डानां वर्षाणां, स्थलसंरचनायां सप्तपर्वतानां, प्रवाहप्रणाल्यां सप्तप्रमुखनदीनां, निवासकारिजनजातीनाञ्च पृथक् पृथगुल्लेखः प्राप्यते । कुत्रचित् सप्तद्वीपानां स्वरूपे वर्षनदीपर्वताभिधानेषु परस्परं पुराणान्तर्गतवैभिन्न्यमपि वर्तते ।

(१) **जम्बूद्वीपः** — पृथिव्याः सप्तद्वीपेषु प्रमुखतमोऽस्ति जम्बूद्वीपः । अस्यावस्थितिस्तेषां मध्ये दारसमुद्रे वर्णिताऽस्ति । अखण्डेऽस्य विस्तारे भारतकिम्पुरुषहरिवर्षरम्यक्हिरण्मयोत्तरकुरुभद्राश्वकेतुमालेलावृत्तवर्षाणि, हिमवद्धेमकूटनिषधनीलश्वेतशृंगिपर्वताः, सीतालकनन्दाचक्षुर्भद्रादिनद्यः, देवगन्धर्वयक्षकिन्नरनागदानवमानवजातयश्चोल्लेखनीयाः सन्ति । मध्यवर्तिमेरुपरिसरे जम्बूप्रमुखवृक्षाणामुत्पत्त्या, जम्बूफलरसेन, जम्बूनद्याः प्रवाहेण, क्षेत्रीयमृत्तिकायां जाम्बूनदसुवर्णोत्पत्त्या चाऽयं जम्बूद्वीपमभिधानं गृह्णाति ।

अस्य समीकरणमेशियामहाद्वीपेन सह कर्तुं शक्यते ।

प्लक्षद्वीपः प्रतीयते, प्लक्षद्वीपे प्राकृतिकवनस्पतौ प्लक्ष (लोकभाषायां पाकर इति)—वृक्षाणामधिकतासीत् ! विस्तारेऽयं जम्बूद्वीपाद्द्विगुणः क्षारोदधिसंवृत एवं वर्णितो विष्णुपुराणे—

क्षारोदेन यथा द्वीपो जम्बू संज्ञोऽभिवेष्टितः ।
संवेष्ट्य क्षारमुदधिं प्लक्षद्वीपस्तथा स्थितः ॥

(वि० पु० ४।१) ।

जम्बूद्वीपस्य विस्तारः शतसाहस्रसम्मितः ।
स एव द्विगुणो ब्रह्मन् प्लक्षद्वीप उदाहृतः ॥

(वि० पु० ४।२) ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

प्लक्षद्वीपेश्वरस्य मेधातिथेः शान्तहयशिशिरसुखोदयानन्दशिवक्षेमकसप्त-पुत्राणां नामानुसारेणास्य सप्तभूखण्डानि वर्षाणि, गोमेदश्चन्द्रनारददुन्दुभि-सोमकसुमनोवैभ्राजप्रभृतिप्रमुखपर्वता, अनुतप्ताशिखी-विपाशात्रिदिवाक्लमा-मृतासुकृतासप्तसरितः, पञ्चजनजातयश्चोल्लेखनीयाः सन्ति।

प्लक्षद्वीपस्य प्रत्यभिज्ञानं डॉ० एस० एम० अली[1] महोदयः भूमध्य-सागरपरिवृतक्षेत्रेण सह कृतवान्। एतदसमीचीनमभिमतम्। उत्तरीयामे-रिकामहाद्वीपेन समं समीकरणमस्य समुचितं प्रतिभाति प्राकृतिकवनस्पति-सदृशभौगोलिकतथ्यदृष्ट्या।

(३) शाल्मली द्वीपः—शाल्मली (लोकभाषायां सेमल इति) वृक्ष-समृद्धोऽयं द्वीपः[२] इक्षुरसो दधिसंवृतः एवमुल्लिखितः पुराणे—

> **"शाल्मलेन समुद्रोऽसौ द्वीपेनेक्षुरसोदकः।**
> **विस्ताराद् द्विगुणेनाथ पर्वतः संवृतः स्थितः॥**
> (वि० पु० ४।२४)।

शाल्मलेश्वर वपुष्मतः सप्तपुत्राणां—श्वेतहरितजीमूतरोहितवैद्युतमान-ससुप्रभनामानुसारेणास्य सप्तवर्षाणि, कुमुदोन्नतवलाहकद्रोणकंकमहिषककुन्-मदादिप्रमुखसप्तपर्वंता, योनितोयावितृष्णाचन्द्रामुक्ताविमोचिनीनिवृत्तिसप्त-नद्यश्चोल्लेखनीयाः सन्ति। श्रीमद्भागवतादिपुराणेष्वन्यानि नामानि वर्ष-पर्वतनदीनां प्राप्यन्ते। यथा–सुरोचनसौमनस्यरमणकदेववर्षपरिभद्रवर्षाणि, शतश्रृंगवामदेव-कुन्दमुकुन्दपुष्पवर्मसहस्त्रश्रुतिपर्वताः, अनुमतिसिनीवालीसर-स्वतीकुहूरजनीनन्दाराकानद्यश्च भिन्नाभिधानाः सन्ति।

शाल्मलीद्वीपस्य समीकरणमफ्रीकामहाद्वीपेन समं सर्वथा समीचीन-मस्ति। डॉ० एम० एम० अलीमहाशयोऽपि एवमभिमतं प्रकटयति Geogrphy in the Puranas नाम्नि स्वकीयशोधग्रन्थे।

(४) कुशद्वीपः—प्राकृतिकवनस्पतौ प्रमुखतया प्रादुर्भुतकुशस्तम्बानां[3] संज्ञया विश्रुतोऽयं द्वीपः, शाल्मलीद्वीपाद् द्विगुणः घृतोदकेन समावृतः।

---

१. The Geography in the Puranas, Lucknow, 1964 p. 28.

२. श्रीमद्भागवतपुराणे ५।२०।७ प्लक्षः स्वसमानेनेक्षुरसोदकेनावृतो यथा तथा द्वीपोऽपि शाल्मलीतो द्विगुणविशालः समानेन सुरोदेनावृतः परिवृङ्क्ते॥

३. श्रीमद्भागवते ५।२०।१३-१६।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyder

ज्योतिष्मत उद्भिद्वेणुमद्वैरथलम्बनधृतिप्रभाकरकपिलाख्यसप्तपुत्राणां नामानुसारेण सप्तवर्षाणि, विद्रुमहेमशैलद्युतिमत्पुष्पवत्कुशेशयहरिमन्दराचलाख्यसप्तकुलपर्वताः, धूतपापाशिवापवित्रासम्मतिविद्युदम्भामहीतिसप्तनद्यः, देवगन्धर्वयक्षकिन्नरदेवदानवमानवजातयश्चोल्लेखनीयाः सन्ति कुशद्वीपे।

डॉ० एस० एम० अली–महोदयः कुशद्वीपमरबप्रायद्वीपेन समं समीकरोति, एतदसमीचीनं भौगोलिकतथ्यैः। द्वीपमिमं दक्षिणामेरिकामहाद्वीपेन समं समीकर्तुं शक्यतेऽनुकूलप्राकृतिकवनस्पतिदृष्ट्या।

(५) **क्रौञ्चद्वीपः**—स्थलसंरचनायां प्रमुखक्रौञ्चपर्वताभिधानानुसारेण[1] नामास्य विश्रुतमखिले विश्वस्मिन्। क्रौञ्चद्वीपस्यावस्थितिरेवं वर्तते—

क्रौञ्चद्वीपः समुद्रेण दधिमण्डोदकेन च।
आवृतः सर्वतः क्रौञ्चद्वीपस्तुल्येन मानतः॥

(विष्णु पु० ४।५७)।

द्युतिमतः धृतपृष्ठस्य वा पुत्राणां नामानुसारेण कुशलमन्दगोष्णपीवरान्धकारकमुनिदुन्दुभीतिसप्तवर्षाणि, क्रौञ्चवामनान्धकारकरत्नशैलदिवावृत् पुण्डरीकवद्दुन्दुभीतिसप्तपर्वताः, गौरीकुमुद्वतीसन्ध्यारात्रिमनोजवाक्षान्ति (ख्याति) पुण्डरीकाभिधाना नद्यः, सिद्धचारणजातयश्चोल्लेखनीयाः क्रौञ्चद्वीपे।

भौगोलिकदृष्ट्या क्रौञ्चद्वीपो वर्तमानयोरपमहाद्वीपादभिन्नः प्रतीयते। डाँ० एम० एम० अलीप्रभृतिप्राचीनभूगोलविदः एवमिमं समर्थयन्ति।

(६) **शाकद्वीपः**—शाकप्रधानवनस्पत्या समृद्धः शाकद्वीपः द्वात्रिंशल्लक्षयोजनायामो वर्णितो[2] भागवतकारेण क्षीरोदेन समावृतोऽयं महात्मनः भव्यस्य सप्तपुत्राणां नामानुसारेण जलद-कुमारसुकुमारमरीचक-कुसुमोदमौदाकिमहाद्रुतमेतिसप्तवर्षैः उदयगिरिजलाधाररैवतकश्यामास्तगिर्याम्विकेयकेशरोति सप्तपर्वतैः, सुकुमारीकुमारीनलिनीधेनुकेक्षुवेणुकागभस्तीतिनदीभिः, सिद्धगन्धर्वजनैश्च राराजते।

---

१. श्रीमद्भागवते ५।२०।१८-२२।
२. श्रीमद्भागवतपुराणे, (पंचम स्कन्धे) विंशतितमेऽध्याये २४-२७ अध्यायेषु शाकद्वीपवर्णनम्।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

शाकद्वीपः प्राकृतिकवनस्पतिदृष्ट्या पूर्वीयद्वीपसहितास्ट्रेलियामहाद्वीपादभिन्नः प्रतीयते। डॉ० एस० एम० अलीमहोदयस्य[१] समीकरणमस्य मात्रेण्डोचीनप्रायद्वीपे सीमितत्वात् सर्वथा संकुचितमस्ति। अतः तस्यावधारणामन्यैवास्ति।

(७) पुष्करद्वीपः—पुष्करप्रमुखजलीयवनस्पतियुक्तोऽयं शाकद्वीपाद् द्विगुणः, स्वादूदकेनोदधिना परिवेष्टितो महावीर–(रमणक)-धातकिवर्षान्वितः, मानसोत्तरपर्वतसहितो नदीरहितः, साध्यदेवादिसंसेवितः, सर्वर्तुसुखदः जरारोगादिवर्जितश्च विद्यते।

पुष्करद्वीपस्य समीकरणं भौगोलिकतथ्यदृष्ट्या ध्रुवक्षेत्रीयांटार्कटिकामहाद्वीपेन समं समीचीनमस्ति। डॉ० एस० एम०[२] अली महोदय इममुत्तरपूर्वसाइबेरियाक्षेत्रे एव सीमितं करोति, अतोऽस्य संकुचितं समीकरणमसमीचीनममान्यञ्च।

उपसंहारः—संक्षेपे, कथयितुं शक्यते, यत् सप्तद्वीपवती पृथ्वीवर्णनाऽस्माकं पुराणकाराणां प्रतिभायाः परिकल्पनाशक्तेश्च चूडान्तनिदर्शनम्। भुवनकोशरूपेऽस्यां चमत्कारिभूगोलवर्णनमस्माकं संस्कृतेर्व्यापकज्ञान-विज्ञानद्वारमुद्घाटयति। अतोऽस्यानुसन्धानदृष्ट्या गम्भीराध्ययनं करणीयम्, येनाविज्ञाता अन्धकारमग्नाः सप्तद्वीपाः सर्वथा प्रकाशिताः परिचिताश्च भवेयुः।

संस्कृत-प्राध्यापकः, जनतास्नातकोत्तरमहावि०
अजीतमल (इटावा)

---

१. श्रीमद्भागवतपुराणे (पंचम स्कन्धे) विंशतितमेऽध्याये २६-३२ अध्यायेषु पुष्करद्वीपवर्णनम्।

२. The Geography in the Puranas, Lucknow, 1964.

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyder

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

सहार्थश्च साहित्यम्

बाल-शास्त्री

'पुत्रेण सह आगतः पिता', 'पुत्रेण सह स्थूलः', 'पुत्रेण सह पितुर्गौः', 'पुत्रेण सह नागतः' इत्यादौ सहार्थप्रतियोगिभूतो योऽप्रधानरूपोऽर्थः, तद्वाचकात् शब्दात् तृतीया भवतीत्यर्थकेन 'सहयुक्तेऽप्रधाने' २।३।१९ इति पाणिनिसूत्रेण पुत्रपदात्तृतीया विधीयते।

समानक्रियावत्वेन, समानगुणवत्वेन, समानद्रव्यवत्वेन परस्पर विशेष्य-विशेषणभावमनापन्नयोः कयोश्चिदर्थयोः प्रतिपादनप्रसंगे प्रयुज्यते खलु सह शब्दः। तदुक्तं श्रीहरदत्तमिश्रैः पदमञ्जर्याम्—'क्रियागुणद्रव्यैः द्वयोः सम्बन्धे सति सहशब्दस्य प्रयोगो भवतीति।

तत्र 'पुत्रेण सह आगतः पिता' इत्यादौ पुत्रसाहित्यवान् आगतः पिता इति बोधात् सहार्थः साहित्यम् इत्यवगम्यते। उभयोरपि पितापुत्रयोः समान-कालिक-सजातीय-क्रिया-गुण-द्रव्याणाम् एकतमनिरूपितकर्तृत्वादिसम्बन्धवत्वे सत्येव पुत्रनिरूपितस्य साहित्यस्य पितरि सम्भवेन, एतादृशस्थले आगतः, स्थूलः, गौः इत्यादिपदैरुपस्थापितपितृसम्बन्धितत्तत्क्रिया-गुण-द्रव्यसजातीयानां तत्तत्क्रिया-गुण-द्रव्याणां यथायथं पुत्रेण सह सम्बन्धः साहित्योपपत्तये अवश्यमास्थेयः। तथा च यस्मिन् काले येन येन खलु सम्बन्धेन यस्याः क्रियायाः, यस्य गुणस्य, यस्य वा द्रव्यस्य पित्रादिभिः अन्वयो भवति, तस्मिन्नेव काले तेनैव सम्बन्धेन तत्सजातीयक्रियागुणद्रव्याणां पुत्रादिभिरन्वये एव साहित्यमुपपन्नं भवति, नान्यथा।

तत्र 'पिता आगतः', 'पिता स्थूलः', 'पितृर्गौः' इत्येवं पितृसम्बन्धि-क्रिया-गुण-द्रव्याणाम् आगतादिपदैः शक्त्या उपस्थापितत्वेन शब्दजन्यप्रतीतिविष-यत्वात्तेषां शाब्दत्वम्। एतादृशशाब्दक्रियाद्यन्वयित्वेनैव च पित्रादीनां प्रधानत्वम्। पुत्रसम्बन्धिक्रिया-गुण-द्रव्याणमुपलब्धिस्तु सहार्थानुपपत्त्या अर्थापत्तिप्रमाणेनैव, न तु शब्दशक्त्या। तद्बोधकशब्दान्तराभावात्। तथा चार्थापत्त्या प्रतीयमानक्रियाद्यन्वयित्वेन पुत्रादेरप्रधानत्वम्। अप्रधानत्वाच्च पुत्रपदादेव तृतीया न तु पितृपदादपि, तस्य प्रधानार्थबोधकत्वात्। एवं 'वीरौ राजपुरुषौ सहागच्छतः' इत्यत्र वीरपदादपि न तृतीया, तदर्थस्य राजपुरुषार्थे विशेषणभावापन्नत्वात्।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

तदेवं स्वसमभिव्याहृत-क्रिया-गुण-द्रव्याद्यन्यतमबोधकशब्दजन्योपस्थिति-विषयीभूततत्तदर्थसमानकालिकतत्तत्क्रिया-गुण-द्रव्यान्यतमान्वयित्वं साहित्यम् इति पर्यवसन्नम् ।

तथा हि पुत्रेण सह आगतः पिता इत्यत्र स्वसहपदसमभिव्याहृतागतपदजन्या या पुत्रनिष्ठागमनक्रियारूपार्थविषयिणी उपस्थितिः, तादृशोपस्थितिविषयीभूता या पुत्रवृत्यागमनसमानकालिका पितृनिष्ठा आगमनक्रिया, तादृशक्रियान्वयित्वं पितरीति साहित्यार्थस्य लक्ष्ये समन्वयः ।

सहार्थयोगस्थले साहित्यानुयोगिनि पित्रादौ येन सम्बन्धेन आगतादिपदोपस्थापितानां क्रियागुणद्रव्यादीनामन्वयो भवति तेनैव खलु क्रियाकर्तृभावाधाराधेयभाव-स्वस्वामिभावादिसम्बन्धेन साहित्यप्रतियोगिनि पुत्रादावपि साहित्यपदार्थघटकानां क्रियागुणद्रव्यादीनामन्वय आवश्यकः । क्रियादिप्रतियोगिकपुत्राद्यनुयोगिकश्च तादृशः स सम्बन्धः पुत्रादिपदोत्तरतृतीयं या वाच्यः । अस्याः सहयुक्तेऽप्रधाने इतिसूत्रविहितायास्तृतीयायाः षष्ठ्यपवादकत्वेन सम्बन्धार्थकत्वस्यैवौचित्यात् ।

तथा च 'पुत्रेण सहागतः पिता' इत्यत्र कर्तृत्वम्, 'दध्ना सहौदनं भुङ्क्ते', 'दध्ना सह भुज्यते ओदनः' इत्यादौ कर्मत्वम्, 'असिना सह दण्डेन हतश्चौरः' इत्यत्र करणत्वम्, 'ऋत्विग्भिः सह दीयते आचार्याय दक्षिणा' इत्यत्र सम्प्रदानत्वम् 'उज्जयिन्या सह वाराणस्यां राजन्ते विद्वांसः', इत्यत्राधारत्वम्, 'पुत्रेण सह स्थूलः पिता' इत्यत्र अधिकरणत्वम्, 'पुत्रेण सह पितुर्धनम्' इत्यत्र स्वस्वामिभावः सम्बन्धः तृतीयया बोध्यते । यतो हि पुत्रेण सह आगतः पिता इत्यत्र पुत्रकर्तृकागमनसमानकालिकागमनकर्तृत्वस्य पितरि, दध्ना सह भुज्यन्ते ओदना इत्यत्र दधिकर्मकभुजिक्रियासमानकालिकभुजिक्रियाकर्मत्वस्य ओदनेषु मानाद् उक्तेष्वेतेषु सम्बन्धेषु अन्यतमेन केनचित्सम्बन्धेनैव आगत-स्थूल-धनादिपदोपस्थापितानामर्थानां पित्रादावन्वयात् । तथा चोक्तं हरदत्तमिश्रैः—'एतत्तृतीयार्थस्तु क्रियावाचकादिशब्दसत्त्वे प्रतीयमानतादृशक्रियान्वयित्वमेव । यत्र तु गुण-द्रव्ययोरुपस्थितिः, तत्र सहशब्दस्य प्रयोगबलात्प्रतीयमानतत्तत्पदार्थसम्बन्धित्वमेव'—इति ।

तदेवं 'पुत्रेण सह आगतः पिता' इत्यत्र प्रकृत्यर्थस्य पुत्रपदार्थस्य आधेयतासम्बन्धेन तृतीयार्थे कर्तृत्वे अन्वयः । तादृशपुत्रान्वितकर्तृत्वस्य आगमनसमानकालिकागमनक्रियान्वयित्वरूपसहार्थघटकीभूते आगमने निरूपकत्वसम्बन्धेन अन्वयः । सहार्थस्य च तादृशक्रियान्वयित्वरूपस्य कर्तृत्वस्य

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

आश्रयत्वसम्बन्धेन पितरि, तादृशे पितरि एव क्तरूपकृत्प्रत्ययान्तार्थस्य आगमनकर्तुरभेदेनान्वयः।

तथा च 'आधेयतासम्बन्धेन पुत्रविशिष्टं यत्कर्तृत्वं, तन्निरूपकं यदागमनम्, तत्समानकालिकं यत् पितृनिष्ठमागमनम्, तन्निरूपितं यत्कर्तृत्वं तदाश्रय आगमनकर्त्रभिन्नः पिता' इति शाब्दबोधः। 'पुत्रेण सह स्थूलः पिता' इत्यत्र पुत्रनिष्ठं यत्स्थौल्यं, तादृशस्थौल्यसमानकालिकं यत्स्थौल्यं, तादृशस्थौल्यवान् पिता इति', 'पुत्रेण सह पितुर्धनम्' इत्यत्र च 'पुत्रस्वामिकत्व समानकालिकस्वामित्वाश्रयो धनम्' इति शाब्दबोधः।

न चैवम् 'आगमनकर्तृतावान् आगमनकर्त्रभिन्नः' पिता इति बोधे उद्देश्यतावच्छेदक-विधेययोरैक्याद् घटो घट इतिवन्निराकाङ्क्षत्वं स्यात्। किं च सहशब्देनैव तत्तद्गमनादिक्रियाकर्तृत्वस्य बोधसंभवे वाक्ये तत्क्रियाबोधकागतपदप्रयोगस्यापि वैयर्थ्यमापद्येत।

तत्तत्क्रियासमानकालिकत्वमात्रस्य सहार्थत्वे, तस्य च आगतादिपदोपस्थापितक्रियायामेवान्वयेन आगमनादिक्रियाबोधकशब्दसहितादेव सहशब्दाद् आगमनसमानकालिकागमनक्रियेत्यादिविशिष्टार्थलाभ इति नोक्तदोषद्वयमित्यपि नोचितम्। तथा सति सहार्थस्य क्रियासापेक्षत्वेन सापेक्षसमर्थवदिति सिद्धान्तात् सपुत्र इत्यत्र पुत्रपदार्थनिरपेक्षेण सहार्थवाचकसहशब्देन समासो न स्यात्। बहुव्रीहौ अन्यपदार्थस्यैव प्राधान्येन सहार्थस्य प्राधान्याभावात् प्रधानस्य सापेक्षत्वेऽपि वृत्तिर्भवतीत्यनेनापि नात्र निस्तार इति चेदत्रोच्यते।

अत्र खलु सर्वत्र आगमनादिक्रियासमानकालिकागमनादिक्रियैव सहशब्दार्थरूपं साहित्यम्। तस्य च यथायथं कर्तृत्वादिसम्बन्धेन प्रथमान्तार्थे पित्रादावन्वयः। तत्रैव च प्रथमान्तार्थे पित्रादौ आश्रयतासम्बन्धेन आगतादिपदबोध्यस्य आगमनकर्तृत्वादेरपि अन्वयः। सहपदार्थान्तर्गतविशेषणीभूतागमनादौ च पुत्रादेरपि कर्तृत्वादिनैव अन्वयः। कर्तृत्वसम्बन्धेन पुत्रकर्तृकागमनसमानकालिकागमनविशिष्ट आगमनकर्त्रभिन्नः पिता इति बोधः।

तथा चात्र मते कर्तृतासम्बन्धेन आगमनादिवैशिष्ट्यरूपोद्देश्यतावच्छेदकस्य विधेयभूतादागमनादिकर्तृत्वतः स्फुटं भिन्नत्वेन उद्देश्यतावच्छेदकविधेययोरैक्यापत्तिरूपो नात्र दोषः, न वा सापेक्षत्वप्रयुक्ता सपुत्रः इत्यत्र समासानुपपत्तिः। नापि च आगतादिक्रियापदप्रयोगवैयर्थ्यम्, सहशब्दस्य सम-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

भिव्याहृतपदप्रतिपाद्यक्रियादिप्रतिपादकत्वस्य स्वभावसिद्धतया तादृशक्रियादि-बोधकपदप्रयोगं विना तत्प्रतिपादनासंभवात् ।

केचित्तु 'सम्बन्धिसमानकालिकपदार्थसम्बन्धित्वमेव साहित्यापरपर्य्यायः सहपदार्थकः । पुत्रादिसम्बन्धी यः पदाथ आगमनादिरूपः, तत्समानकालिको यः पित्रादिनिष्ठ आगमनादिपदार्थः, तत्सम्बन्धित्वं पित्रादाविति पुत्रसाहित्यं पितरि सम्पन्नम् । आगमनादिप्रतियोगिकपित्राद्यनुयोगिकः सम्बन्धश्चात्र यथा-यथं कर्त्तृत्व-कर्मत्वादिकमेव। पुत्रादिपदोत्तरं तृतीयार्थश्चापि सहशब्दार्था-न्वयबलात् प्रतीयमानागतादिक्रियानिरूपितं कर्तृत्वादिकमेव। पिण्डम्, गृहम्, इत्यादौ प्रतीयमानभक्षणप्रवेशादिक्रियानिरूपितकर्मत्वादेव द्वितीयाविभक्तेरुप-पत्त्या प्रतीयमानक्रियासम्बन्धस्यापि कारकविभक्तिप्रयोजकत्वमित्यस्य क्लृप्त-त्वात् । अत एव 'शिष्येण सह आगतः' इत्यादौ कर्तृतृतीयैव सिद्धम् इत्या-शयकं 'सहयुक्ते २।३।१९' इति सूत्रस्थं भाष्यं संगच्छते ।

तथा च पुत्रसम्बन्धिसमानकालिकपदार्थसम्बन्धी पिता इति प्राथमिके बोधे जाते पुत्रसम्बन्धं विना एव प्रतीतिविषयभूते आगमने पुत्रसम्बन्धा-भावात् पितरि पुत्रसम्बन्धिसमानकालिकपदार्थसम्बन्धित्वानुपपत्त्या पुत्रस्यापि पश्चान्मानस आगमनादिसम्बन्धबोधः आवश्यकः इति पुत्रपदार्थस्य तृतीया-विभक्तिबोधितस्वनिष्ठकर्त्तृत्वादिनिरूपकत्वसन्बन्धेन सहार्थघटके आगमनादि-पदार्थभूते सम्बन्धिनि अन्वयः । 'दध्ना सह भुङ्क्ते ओदनम्' इत्यत्र च प्रतीयमानगलबिलाधःसंयोगानुकलव्यापाररूपभुजिक्रियानिरूपितकर्मत्ववतो दध्नः तृतोयार्थस्वनिष्ठकर्मतानिरूपकत्वसम्बन्धेन सहार्थघटकीभूते भुजि-क्रियारूपे सम्बन्धिनि अन्वये सति स्वनिष्ठकर्मतानिरूपकत्वसम्बन्धेन दधि-विशिष्टा या भुजिक्रिया गलंबिलाधःसंयोगरूपा फलभृता, तत्समानकालिका या फलभूता भुजिक्रिया तद्विशिष्टत्वं स्वनिरूपितकर्मत्वसम्बन्धेन ओदने इति दधिनिरूपितं साहित्यम् ओदने प्रतिष्ठितम्' इत्याहुः ।

भट्टः श्रीनागेशस्तु 'समभिव्याहृतपदार्थसमकालिकत्वरूपं साहित्यम्, तत्समनियतम् अखण्डोपाधिरूपं वा सहशब्दार्थमाह । तन्मतेपि तृतीयार्थस्तु क्रियाबोधकपदसमभिव्याहारे सहार्थबलात्प्रतीयमानतत्तत्क्रियानिरूपितं कर्तृत्व-कर्मत्वादिकम् सम्बन्ध एव । द्रव्यगुणार्थबोधकपदसमभिव्याहारे च सहार्थबलात्प्रतीयमानतत्तत्पदार्थनिरूपितः स्वस्वामिभावादिरेव सम्बन्धः । सपुत्रः इत्यत्र तु समासघटकस्य सहशब्दस्य धर्मिपरत्वम् । अत एव सपुत्रः पिता आगतः इत्येवं तस्य पित्रादिपदेन समानाधिकरण्योपपत्तिः । तस्य धर्मि-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

परत्वादेव सपुत्रः इत्यत्र 'तेन सहेति २।२।२८' इति सूत्रान्तरेण बहुव्रीहिसमास-विधानं संगच्छते। साहित्यवतः सहशब्दादेवोपस्थितत्वेन तस्यान्यपदार्थत्व-भावाद् 'अनेकमन्य २।२।२४' इतिसूत्राप्रवृत्तेः। तथा च समुदायार्थतादृश-क्रियादेरन्तर्भावान्नासामर्थ्यम्। पुत्रेण सह स्थूलः, इत्यत्र च व्युत्पत्ति-वैचित्र्यात् स्थूलपदार्थैकदेशेऽपि स्थौल्यादौ सहार्थस्य स्थौल्यसमानकालिक-त्वस्यान्वयः। तथा च पुत्रवृत्तिस्थौल्यसमानकालिकस्थौल्यवान् इति बोधः' इत्याह।

'सहैव दशभिः पुत्रैर्भारं वहति गर्दभी' इत्यत्र सह शब्दो विद्यमानत्व-वाची। दशसंख्याकपुत्राणां विद्यमानत्वेपीति तदर्थः। एतादृशार्थकसह-शब्दयोगेऽपि सहयुक्ते इति सूत्रेण तृतीया भवति, विनिगमनाविरहात्। अत्र सहशब्दो लुप्तसप्तम्यन्तः। सतिसप्तमी च सा। अपिशब्दाध्याहारे च तावत्संख्याकपुत्राणां विद्यमानत्वे सत्यपीत्यर्थो लभ्यते इत्यन्ये। अत्र केचन विद्यमानेति पदमध्याहृत्य विद्यतिक्रियाप्रयुक्तेन साहित्येन तृतीयां विभक्तिं निर्वहन्ति। सकर्मकः, सलोमकः इत्यादौ तु विद्यमानरूपार्थवाचो नतु विद्य-मानत्ववाची सहशब्दः। सह=विद्यमानं कर्म यस्येत्यर्थे 'अनेकमन्य २।२।२४' इति बहुव्रीहौ 'शेषाद्विभाषा ५।४।१५४' इति कप्रत्ययः।

माषावापोत्तरं तत्रैव क्षेत्रे तिलवापे तत्र 'तिलैः सह माषान् वपन्ति स्म' इत्यादिप्रयोगदर्शनात् समभिव्याहृतपदार्थसमानकालिकत्वस्य इव समभिव्या-हृतसमानदैशिकत्वस्यापि सहार्थत्वमास्थेयम्।

तदेवं उभयोरपि सहार्थयोरित्थं संग्रहः—स्वसमभिव्याहृतशब्दजन्योप-स्थितिविषयक्रियादिसमानाधिकरणक्रियाद्यन्वयित्वं साहित्यम्। समानाधि-करण्यं च कालिक-दैशिकैत्यन्यतरप्रत्यासत्या।

परममान्यगुरवोऽस्मद्वृद्धप्रपितामहश्रीस्नेहिरामशास्त्रिचरणास्तु स्वसम-भिव्याहृतशब्दबोध्यक्रियादिविशिष्टक्रियादिमत्वं साहित्यं प्राहुः। वैशिष्ट्यं चात्र स्वसजातीयत्व-स्वविशिष्टत्व-एतदुभयसम्बन्धेन। सम्बन्धघटकं वैशि-ष्ट्यं च स्वसमानकालिकत्व स्वसमानदेशवृत्तित्व – इत्येतदन्यतरसम्बन्धेन बोध्यम्।

न 'प्रासोष्ट शत्रुघ्नमुदारचेष्टमेका सुमित्रा सह लक्ष्मणेन' इति पद्यस्य का गतिः। शत्रुघ्नलक्ष्मणप्रसवयोः समानकालिकत्वविरहेण तत्र सहार्थस्यान्व-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

यासंभवादिति चेन्न। एतादृशस्थले स्थूलकालघटितसमानकालिकत्वस्य स्वीकारेणादोषात् । अत एव–

शिशोर्मातरि गर्भिण्यां चूण्डाकर्म न कारयेत् ।
सहोपनीत्या कुर्याच्चेत्तदा दोषो न विद्यते ॥

इति स्मृतिग्रन्थोप्युपद्यते। अत्र दिनस्य सहशव्दार्थे अन्तर्भावः। अन्यथा चूडाकर्मणः अनन्तरमेव उपनयनसंस्कारस्य कर्तव्यत्वात्तायोः नियतपूर्वापरोभावेन घटिकादिरूपैककालत्वविरहात्सहार्थानुपपत्त्या असंगत्यापत्तेः।

न चैवं पुत्रागमनकालात् पूर्वमेव समागते पितरि पुत्रेण सह आगतः पिता इति वाक्यस्यापत्तिः, पुत्रेण सह न समागतः इति वाक्यस्य च अनापत्तिः, दिवसादिरूपस्थूलकालेन समानकालिकत्वस्य संभवादिति तु नाशंकनीयम्। व्यवहारबलादेतादृशस्थले क्षणत्वादिनैव कालस्य सहशब्दार्थे अन्तर्भाव इत्यस्य स्वीकरणीयत्वादिति संक्षेपः।

रीडर, संस्कृत-विभाग
सागर-विश्वविद्यालय, मध्यप्रदेश

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

विकृतिसमानवचनकत्वमाख्यातस्य

देवनारायणः झा

प्रकृतिविकृतिभावस्थले विवदमाना विद्वांसो बह्वीर्युक्तीः प्रदर्श्य स्वकीयं मतं पुष्णन्ति। तत्रेयं विचारणा जार्गति यद् आख्यातस्थले आख्यातार्थः कर्मत्वं कृतिर्वा यत्रान्वेति तत्रैवाख्यातार्थसंख्याया अन्वयो जायते। अत एव आख्यातार्थविशेष्यवाचकपदसमानवचनकत्वमाख्यातस्येति राद्धान्तः। यथा चैत्रः पचति इत्यत्राख्यातार्थकृतेश्चैत्रेऽन्वयाद् आख्यातार्थकृतिविशेष्यवाचकं यच्चैत्रपदतत्समानवचनकत्वमाख्यातस्य। यदा कर्मणि प्रत्ययः क्रियते तदा कर्मत्वस्याख्यातार्थाभिन्नतया कर्मत्ववाचकपदसमानवचनकत्वमाख्यातस्य। यथा चैत्रेण तण्डुलः पच्यते इत्यत्र कर्मत्वस्य तण्डुलेनान्वयात् तत्समानवचनकत्वमाख्यातस्य भवतीति साधुः।

प्रकृतिविकृतिभावस्थले प्रकृतेर्विकृतेश्चोभयोरपि कर्तृत्वात् प्रकृतिवाचकसमानवचनकत्वमाख्यातस्य उत बिकृतिवाचकसमानवचनकत्वमाख्यातस्येति संशयः समुदेति। तद्विचारणाय अत्र कमपि विचारं प्रस्तौमि। प्रकृतिविकृतिविचारचर्चाप्रसङ्गे किं तावद् विकृतित्वमिति चेत्तर्हि प्रकृतिविशिष्टत्वं विकृतित्वम्। वैशिष्ट्यञ्च स्वभिन्नत्वस्वारम्भकावयवारभ्यत्वमेतदुभयसम्बन्धेन। स्वस्मिन्नपि स्वविकृतित्वारणाय स्वभिन्नत्वनिवेशः। प्रकृतौ विकृतित्ववारणाय स्वारम्भकावयवारभ्यत्वमिति। ततश्च—

विभज्य मेरुर्न यदर्थिसात्कृतः, न सिन्धुरुत्सर्गजलव्ययैर्मरुः।
अमानि तत्तेन निजायशोयुगं द्विफालबद्धाश्चिकुराः शिरःस्थितम्॥
(नै० १।१६)

अपि च,

कलशे निजहेतुदण्डजः किमु चक्रभ्रमकारितागुणः।
स तदुच्चकुचौ भवन् प्रभाझरेण चक्रभ्रममातनोति यत्॥
(नै० २।३१)

इत्यत्र नैषधीये पद्येऽपि विकृतिसमानवचनकत्वमाख्यातस्य भवतीति बुध्यते। तथाहि—तेन राज्ञा नलेन द्विफालबद्धाश्चिकुराः शिरः स्थितं निजायशोयुगम्

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

अमानि इत्यन्वयः। अत्र तावत् चिकुरभागद्वये निजायशो युगस्यारोप इति मन्तव्यः। ततश्चात्र निजायशो युगस्य एकवचनतया कर्मणि प्रयुक्तस्य अमानीति लुङन्तस्यैकवचनस्य सार्थक्यं सञ्जायते। अन्यथा प्रकृतिसमानवचनकत्वमाख्यातस्येति स्वीकारे 'अमानिषत' इत्येव स्यात् न तु अमानीति। अतश्चात्र निजायशोयुगस्य विकृतित्वम्, चिकुरा इत्यस्य प्रकृतित्वमवगम्यते। अपरत्र द्वितीयपद्ये 'स तदुच्चकुचौ भवन्' इत्यत्र प्रकृतिसमानवचनकत्वमाख्यातस्येति श्रीहर्षस्योदाहरणे विचिकित्सा विद्योतते। तथा हि स कलशस्तस्या भैम्या उच्चकुचौ भवन् प्रभाझरेण दीप्तिसमूहेन चक्रभ्रमं करोतीत्यन्वय। तथा चात्र कलशस्य प्रकृतित्वं कुचद्वयस्य च विकृतित्वं सुप्रसिद्धम्। कलशे कुचद्वयमारोपितमस्ति तह्यत्रापि विकृतिसमानवचनकत्वेनैव भाव्यं न तु प्रकृतिसमानवचनकत्वेन। तथा च कुचौ भवन्तौ इत्येवं स्यात् न तु कुचौ भवन्निति। इत्थञ्चात्र हर्षस्य पद्यद्वये पूर्वापरसंगतिकरणाय भाष्यकारः—"सुवर्णः कयाचिदाकृत्या युक्तं पिण्डो भवति। पिण्डिकाकृतिमुपमृद्य रुचकाः क्रियन्ते। रुचकाकृतिमुपमृद्य कटकाः क्रियन्ते। कटकाकृतिमुपमृद्य स्वस्तिकाः क्रियन्ते। पुनरावृत्तः स्वर्णपिण्डः पुनरपरयाकृत्या युक्तः खदिराङ्गारसवर्णे कुण्डले भवतः। आकृतिशव्देन संस्थानविशेषस्तु न गृह्यते। तथा च भाष्यदिशा विकृतिसमानवचनकत्वमाख्यातस्येति सिद्ध्यति। ततश्च नैषधीयपद्ये पूर्वत्र साधुत्वमपरत्रासाधुत्वं सुस्पष्टमेव प्रतिभाति। कैयटस्तु मौनमेवालम्बते। भाष्यमतं विवृण्वता नागेशेनोक्तं यदाकृतिपदं व्यङ्ग्यव्यञ्जकभावपरमिति। अपि च तत्रैव प्रतिपादितं यद् "भाष्ये खदिराङ्गारसवर्णे कुण्डले भवतः इति प्रयोगाद् इदमगतं भवति यद् अच्व्यन्तस्थले विकृत्यनुसारिणी क्रिया भवतीति। तथापि नैषधीयस्य द्वितीयस्य पद्यस्यासंगतिर्दुर्वारैव। तद्वारणाय यदि अच्व्यन्तस्थले विकृतिसमानाश्रयत्वमाख्यातस्येति नियमाकारः स्यात्तर्हि उभयत्र संगतिः स्यात्। किन्तु तदेव न पश्यामः। च्विभिन्नस्थले विकृत्यनुसारिणी क्रिया स्यात्तर्हि यथैको वृक्षः पञ्च नौका भवतीति प्रयोगो व्यावुध्येत। अत्र वृक्षः पञ्च नौका भवन्तीत्येव स्यात् न तु भवतीति वाच्यम्। च्विविषये संधीभवन्ति ब्राह्मणः तन्तवः पटोभवन्तीत्यत्र प्रतिसंख्याश्रयत्वं वचनस्य विद्योतते न तु विकृतिसमानाश्रयत्वम्। अच्व्यन्तस्थले विकृतिसमानवचनकत्वमेवाश्रयितव्यम्। तदेव वरं प्रतिभाति। तथा सति निजायशायुगस्य विकृतित्वं निरावाधम्। अपरत्र स तदुत्रकुत्रौ भवन्नित्यत्रापि प्रकृतिसमानवचनकत्वमाख्यातस्येति

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

साफल्यमुपगच्छति। मन्ये भाष्यकारोऽपि अत्रैव तात्पर्यं रक्षति। न च यथैको वृक्षः पञ्च नौका भवतीत्यत्र का गतिस्तत्र तु प्रकृत्याश्रयत्वमेवाख्यातस्य जागर्तीति वाच्यम्। तत्रापि यथैको वृक्षः पञ्च नौका भवन्तीति प्रयोगस्य सुवचत्वात्।

यत्तु नागेशेनाऽवादि यद् अच्व्यन्तस्थले कामाचारो भवतीति दिशा प्रकृतिविकृतिसमानवचनकत्वमाख्यातस्येत्युभयमपि साधु। तथा च निजायशोयुगस्य कुचौ भवन्नित्यस्य यथैको वृक्षः पञ्च नौका भवति इत्यस्य च साधुत्वमस्त्येवेति न काचन क्षतिरिति नन्नादरणीयम्। तथाविधे कामचारे स्वीकारे सति अपरस्यापि कामचारस्य जागरूकत्वेन प्रकृतिविकृत्युभयसमानवचनकत्वमाख्यातस्य जायतान्नाम इत्यस्यापि सुवचत्वात्।

"वाक्ये सम्पद्यते कर्ता संघश्च्यन्तस्य कथ्यते।
वृत्तौ संघीभवन्तीति ब्राह्मणानां स्वतन्त्रता॥"

इत्युक्तवता भर्तृहरिणाऽपि नागेशमतं पोषयता कामचारत्वमेव प्रकटीकृतम्। तथाहि अभूततद्भावे कृभ्वस्तिविवक्षायां सम्पद्य कर्तरि च्विर्विधीयते। यथा असङ्घो भवतीति सङ्घगतैकत्वाश्रयस्य वचनस्य च दर्शनात् सङ्घः कर्तरि वृत्तौ तूच्यते। संघीभवन्ति ब्राह्मणाः इति अत्र प्रकृतिभूतब्राह्मणगतबहुवचनदर्शनात् प्रकृतेः कर्तृत्वावसायः। तदेव प्रयोगभेदेन प्ररूढं प्रकृतिविकारयोः कर्तृत्वमुन्नेयम् इति हेलराजः। पुनश्च भर्तृहरिः —

अत्वं सम्पद्यते यस्त्वं न तस्मिन् युष्मदाश्रया।
प्रकृतिः पुरुषस्यास्ति प्राकृतः स विधीयते॥

इति पद्यमुपन्यस्य "अत्वं त्वं सम्पद्यते त्वद् भवति" इति (वाक्यपदीयम्, म० भा० १।४।१०८) भाष्यकारोक्तलिङ्गानुसारेणात्रप्रकृतेः कर्तृत्वं साधितवान्। न चात्र युष्मदर्थनिमित्तको मध्यमः पुरुषो दृश्यते। अपि तु 'त्वद् भवति' इत्यत्र अयुष्मदर्थरूपप्रकृतिगतप्रथमपुरुषदर्शनात् प्रकृतेरेव कर्तृत्वमिति धेयम्। तथा च प्रकृतिविकारयोरपि कर्तृत्वं स्वीकरणीयमिति वाक्यपदीयकारः। तदपि न रोचते। यतो हि अत्वं त्वं सम्पद्यत इत्यत्र प्रकृतिविकृतिभावो नास्ति। विकृतिलक्षणस्य तत्राप्रवेशात्। न च स्वभिन्नत्वं तत्राप्यस्त्येवेति वाच्यम्। स्वभिन्नत्वस्य सत्त्वेऽपि विशेष्यां-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

शस्य स्वारम्भकावयवारभ्यत्वस्य तत्राप्रवेशात् । अत्वं त्वं सम्पद्यत इत्यत्र विकृतित्वं नास्त्येव । अत एव भगवता भाष्यकारेण त्वं सम्पद्यसे 'भवसि' इति नोक्तम्, विकृतित्वाभावात् । तथा च विकृतिसमानवचनकत्वमाख्यातस्येति भाष्यकारमतमक्षतमेव ।

वैयाकरणभूषणसारस्य प्रभाव्याख्याकारस्तु काष्ठं सुवर्णञ्च प्रकृतिः भस्म कुण्डलञ्च विकार इति प्रकृतिविकृतिभावस्तु भस्मानि कुण्डले च वर्तते । एवं यादृशं विकारात् पूर्वमवयवसंस्थानं सुवर्णे आसीत् तयोर्विजातीयमवसंस्थानवैशिष्ट्यं कुण्डले जातम् । तथा च प्रतीयमानप्रकृतिविकृतिभावकत्वे सति पूर्वकालिकावयवसंस्थानविजातीयावयवसंस्थानविशिष्टत्वमिति लक्षणं फलितम् । काशिकाकारस्तु काष्ठसुवर्णयोरेव विकृतित्वम्, भस्मकुण्डलयोस्तु प्रकृतित्वम् । एकत्रोच्छेदरूपो विकारः । द्वितीये आकारविशेषणात्मकः । दर्पणकारस्तु आख्यातस्य विकृतिसमानवचकत्वप्रसंगे "गृहणाति वाचकः संख्यां प्रकृतेर्विकृतेर्नहि" इत्यनुशासनसिद्ध विकृतिसङ्ख्यान्वयबुद्धिं प्रति प्रकृतिसंख्यान्वयपदत्वेनागृह्यमाणाख्यातजन्योपस्थितेर्हेतुत्वकल्पनया निरसनीय इति ब्रूते । यत्तु केनचिदुक्तं दर्पणव्याख्याम् एत्वावच्छिन्ने द्वित्वावच्छिन्नारोपस्थले 'एको द्वौ ज्ञायते' इत्यत्रारोत्यविशेष्यवाचकसमानवचनमाख्यातस्य । प्रयुज्यते च कवयः 'एकोऽपि त्रय इव भाति कन्दुकोऽयम्' इति । न च तत्रापि भान्ति इत्येव पाठः । कथमन्यथा "अमानि तत्तेन निजायशोयुगं द्विफालबद्धाश्चिकुराः शिरःस्थितम्" इत्यत्रारोप्य निजायशोयुगसमानवचनम् 'अमानि' इत्याख्यातं प्रयुक्तं श्रीहर्षेणेति वाच्यम् । अत्रापि पूर्वार्द्धसमर्थितायशोयुगस्य वास्तवत्वेन तस्मिन् फलद्वयबद्धचिकुराणामेव राज्ञ आरोप्यत्वेन कवेरुत्प्रेक्षिततत्वात् । अत एव न तत्राविमृष्टविधेयांशतादोषावकाश इत्याहुः । अत्र ब्रूमो यद् चिकुरा एव विधेयत्वेन यदि कविभिविवक्षिताः सन्ति तर्हि तत्र अमानि षत इति भवितव्यं न तु अमानोति । च्व्यन्तव्यतिरिक्तस्थले विकृतिसमानवचमकत्वनिर्वाहात् अत्रापि बहुबचनैव भाव्यं न तु एकवचनेनेति ।

अपि च खपुष्पायमाणस्य सुमेरोर्विभागीकरणस्य जलव्ययैर्मरूकरणस्य समुद्रस्य चामूर्तत्वेनावास्तवतया कथं तत्र राज्ञश्चिकुराणामेवारोप्यत्वं कविभिरुत्प्रेक्षितमिति न जाने । वस्तुतस्तु सीमन्तस्योभयभागे स्थिताः केशाः न भवन्ति किन्तु अकीर्तिद्वयमेव । अतः कीर्तिद्वयस्यैवारोप्यत्वेन विधेयतया

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

तत्समानवचनकत्वमाख्यातस्यैव न्याय्यत्वात्। 'अमानि' इति एकवचनं साध्विति मन्तव्यम्। विधेयविमर्शदोषवारणाय चिकुराणां विधेयत्ववचनमकिञ्चित्करं प्रतिभाति। विधेयाविमर्शलक्षणदोषस्तु यत्र विधेयांशः प्राधान्येनानिर्दिष्टो भवति तत्र विधेयाविमर्शो दोषः। प्राधान्यञ्चात्र विधिप्रतीतियोगात्। सा च कुत्र विद्यते कुत्र न वेतीत्यत्र विद्वदनुभव एव प्रमाणम् 'अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत्' इति नियमविपरीतनिर्देशोऽयं दोष आगत इति प्रसिद्धिः। तथा चानुवाद्यम् उद्देश्यम् प्राप्तस्य धर्मान्तरप्राप्तये कथनमुद्देशः। विधेयंसाध्यम्। एवं हि अप्राप्तस्य प्राप्तये कथनं विधानम् उद्देशः। उद्देश्यविधेययोः पृथग्निर्देश एवोद्देश्यविधेयभावप्रतीतिः। यदुक्तं तन्त्रवार्तिके—

"यच्छब्दयोगः प्राथम्यं सिद्धत्वं चाप्यनूद्यता।
तच्छब्दयोग औत्तर्यं साध्यत्वं च विधेयता॥"

तथा चेदं प्रतिभाति यद् यच्छब्दप्रतिपाद्यं सिद्धत्वेन प्रतीयमानमनुघमुद्देश्यम्। तदादिशब्दप्रतिपाद्यमुद्देश्यसम्बन्धितया अपूर्वबोधविषयीभूतं विधेयम्। यथा यः क्रियावान् स पण्डितः इत्यादौ क्रियावन्तमुद्दिश्याभेदेन पण्डितः स्वरूपसम्बन्धेन पण्डितत्वं वा विधीयते। यत्र कुत्रापि यत्तच्छब्दौ न प्रयुज्येते तत्रापि गम्येते ताविति न तत्रापि दोषः। तथा चात्र पद्ये तेन नलेन द्वाभ्यां फालाभ्यां बद्धाश्चिकुरा एव स्वीयमयशोयुगमन्यत इति वाक्ये विधेयस्य निजायशोयुगस्य तच्छब्दप्रतिपाद्यत्वेन स्फुटमेव विधेयताप्रतीतिः। उद्देश्यस्य तु चिकुरा इत्यस्य यच्छब्दप्रतिपाद्यत्वाभावेन गम्या प्रतीतिरित्यभ्युपगम्यते। तथा च तेन शिरसि स्थिताः केशा एव तत् निजायशोयुगममानि यत् दानाम्बुप्रक्षेपैः सिन्धुः निर्जलप्रदेशः न कृतः, हेमाद्रिर्विभज्य अर्थिभ्यो देय न कृत इति तत् अपकीर्तिद्वयं मेरुविभागसिन्धुजलव्ययाकरणजनितमिति मेने। अयशसः पापरूपत्वात् कृष्णवर्णनं कविसमयसिद्धम् यथा—

मालिन्यं व्योम्नि पापे यशसि धवलता वर्ण्यते हासकीर्त्योः
रक्तौ च क्रोधरागौ सरिदुदधिगतं पङ्कजेन्दीवरादि।
तोयाधारेऽखिलेऽपि प्रसरति च मरालादिकः पक्षिसंघो
ज्योत्स्ना पेया चकोरैर्जलधरसमये मानसं यान्ति हंसाः॥

इति कविसमयप्रसिद्धिः। तर्हि विचार्यताम् अत्रोद्देश्यविधेयरूपं कर्मद्वयम्।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

एकस्योद्देश्यत्वमपरस्य विधेयत्वं स्फुटमेव। न च विनिगमनाभावात् पूर्वस्योद्देश्यत्वमपरस्य विधेयत्वमिति वाच्यम्। तच्छाब्दयोगाव्यवहितोत्तरत्वं नैव साध्यत्वस्य व्यवस्थितिरिति भट्टसिद्धान्तमुररीकृत्य अयशोयुगस्यैव विधेयत्वाभ्युपगमेन विधेयाविमर्शदोषस्य दुरुद्धरतया विकृतिसमानवचनकत्वभाख्यातस्य चकास्तीति। अत्र तु मल्लिनाथेनोक्तदिशा व्यस्तरूपकालंकारः समर्थ्यते। तथाहि 'तद्रूपकमभेदो य उपमानोपमेययोः'' इति लक्षणमकारि मम्मटेन रूपकस्य। तथा चोपमानोपमेययोर्यः अभेदारोपस्तद्रूपकमिति फलितम्। उपमानत्वञ्च उपमानोपमेयोभयनिष्ठसाधारणधर्मवत्त्वेनेषदितरपरिच्छेदकत्वम्। तद्धर्मवत्तया परिच्छेद्यत्वञ्चोपमेयत्वम्। तथा चात्र इदमवगतं भवति यद्रूपके धर्मबाहुल्यादेवोपस्थितयोरुपमानोपमेययोरभेदारोपः मङ्गच्छते। एवञ्च यः साधारणधर्मप्रतियोगिक उपमानोपमेयोभयानुयोगिकः सम्बन्धः स साधर्म्यमित्युच्यते। समानो धर्म एव सादृश्यम् इति फलितार्थः एवञ्च यथावस्थिते उपमेये सादृश्यातिशयमहिम्ना सारोपाख्यलक्षणया उपमानस्याभेदारोपो रूपकालंकार इति पर्यवासितार्थः। तथा च रूपके आरोप्यमाणत्वेन विशेष्यतया उपमानपदार्थ एव उपमेयमन्तर्हृत्य क्रियायां सम्बध्नातीति लक्ष्मीटीकाकारः। तर्हि हर्षपद्ये निजायशोयुगस्योपमानत्वं चिकुराणामुपमेयत्वं द्योतितं भवति। अत एव अमानीति कियया अयशोयुगस्यैव सम्बन्धः, न तु चिकुरैः सह तस्योपमेयत्वात्। एवं स्थिते राज्ञश्चिकुरा एव आरोपविषयतया वास्तविकाः। चिकुराणां मूर्तत्वात्। अयशायुगस्योपमानतावास्तविकी। ततश्चात्र केशेषु काष्र्ण्यसाम्यादयशोयुगरूपणमिति व्यस्तरूपकमिति ब्रुवतो मल्लिनाथस्य मतमेव ज्यायः प्रतिभाति। युक्तञ्चैतत् पश्यामोऽमानीति प्रथमपुरुषैकवचनम्। नात्र रूपकालंकारोऽपितु ''द्विफालबद्धान् केशान्नात्र बिभर्ति, किन्तु शिरः स्थितमयशोयुगमेतदित्यपह्नुतिरलङ्कार इति साहित्यविद्याधरी। तत्तु नादर्तव्यम्। प्रकृतं यन्निषिध्यान्यत् साध्यते सा त्वपह्नुतिः इति लक्षणं कृतवता मम्मटेन उपमेयमसत्यं कृत्वोपमानं सत्यतया यत् स्थाप्यते सा तु अपह्नुतिरिति व्याख्यातम्। किन्तु असत्यतया ज्ञापनं शब्देनार्थतो वा भवेदिति तु नोक्तम्। उदाहरणत्रये पूर्वत्र निषेधवाचकशब्दस्यैव प्रयोगः कृतः। एकत्र कलङ्को नैवायम्। अपरत्र भृङ्गच्छलेन, अन्यत्र परिणमतोत्यनेन कपटार्थकपरिणामार्थकश्च शब्दो गृहीतः। न च तथा अत्र हर्षीये पद्ये प्रतिभाति। अतः अपह्नुतिरलंकारोऽत्र नास्त्येवेति। अतश्च नात्रापह्नुतिर्यदपह्नुतौ 'नेदं मुखं किन्तु चन्द्रः' इत्यत्र

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

मुखत्वचन्द्रत्वयोर्विरोधो व्यक्तो भवति। रूपके 'मुखं चन्द्रः' इत्यत्र मुखत्व-चन्द्रत्वयोरेकाधिकरणवृत्तिताप्रतीतेरविरोध एव सञ्जायते। अत एव भ्रान्तिमत्यपि विरोधवारणे भवतीति मार्गः। एवञ्चोपमेयतावच्छेदकनिषेधसामानाधिकरण्येनारोप्यमाणमुपमानतादात्म्यमपह्नुतिः। न ह्यत्र पद्ये शब्दतोऽर्थतो वा चिकुरत्वनिषेधपुरःसरं निजायशोयुगत्वरूपस्योपमानतावच्छेदकस्य तादात्म्यारोपः। रूपके तु तयोः सामानाधिकरण्यप्रत्ययात् स विरोधो निवर्तते इति जगन्नाथोक्तदिशाप्यपह्नुतिरलंकारस्य चर्चाप्यत्र नास्ति। यत्तु केनचिदवादि तत्तु गजनिमीलिकैवेत्यलम्मान्यानां कटाक्षनिक्षेपेण। यच्च पदवाक्यरत्नाकरटीकाकृता प्रत्यपादि चिकुराणामवास्तवत्वं निजायशोयुगस्य वास्तवत्वम्, तत् तु चिन्त्यमेव। प्रत्यक्षप्रमाणजन्यत्वं वास्तवत्वं, शब्दात्मकप्रमाणजन्यनिश्चयगोचरवत्त्वमवास्तवत्वमिति रूपकालंकारे पण्डितराजः। ततश्च चिकुराणां वास्तवत्वं निजायशोयुगस्यैवावास्तवत्वेन तस्यैव आरोपार्हत्वं यतो हि पद्यघटकीभूते पूर्वार्द्धेऽतिशयोक्तिरूपेण असम्भावितवर्णनयार्थस्यातात्त्विकतया तज्जन्यस्यायशोयुगस्याप्यवास्तवत्वेन तस्यैवारोप्यत्वमिति युक्तमुत्पश्यामः। उक्तञ्च मम्मटेन निगीर्याध्यवसानं तु प्रकृतस्य परेण यत्। प्रस्तुतस्य यदन्यत्वं यथार्थोक्तौ च कल्पनम्। अर्थात् यदि शब्देन चेच्छब्देन वा यदि शब्दार्थस्य उक्तौ सत्यां कल्पनम् असंभविनोऽर्थस्य कल्पनं सा तृतीयातिशयोक्तिर्भवति। एवं स्थिते विभज्य मेरुर्न यदर्थिसात्कृत इत्यत्र यदि शब्देनासंभविनोऽर्थस्य यत् कल्पनं तदेवातिशयोक्तिपरिचायकम्। तथा च हर्षोक्तकाव्यप्रयोगमहिम्ना आख्यातस्यारोप्यवाचकपदसमानवचनकत्वं सिद्ध्यतीति समीचीनमेव प्रतिभाति। यदपि च व्युत्पत्तिवादे "न चैवम्" अमानि तत्तेन निजायशोयुगं द्विफालबद्धाश्चिकुराः शिरःस्थितम् इत्यत्र कथमारोपविशेष्यवाचकपदविरुद्धवचनत्वम् 'अमानि' इति क्रियापदस्येति वाच्यम्। तत्रायशोद्वयस्य वास्तवत्वेन चिकुरभागद्वयस्य राज्ञ आरोप्यत्वेन कवेरुत्प्रेक्षितत्वात्। आख्यातार्थविशेष्यतान्वयविशेष्यत्वेनाऽयशोयुगस्यैव विवक्षितत्वात्। अत्रायमभिप्रायः 'अमानि तत्तेन' इत्यत्रारोपविषयत्वं चिकुराणां नास्ति किन्त्वयशोयुगस्यैवारोपविषयता विद्यते तथा चायशोयुगे द्विफालबद्धचिकुरभागद्वयत्वमारोप्यते, कविनारोपविषयस्यायशोयुगस्यैवाख्यातार्थविशेष्यतान्वये विशेष्यत्वेन विवक्षितत्वात् तद्वाचकाऽयशोयुगपदस्य चैकवचनान्तत्वात् 'अमानी'ति क्रियापदस्यैकवचनान्तत्वं युक्तमिति तदपि अलङ्कारशास्त्रबोधानाकलिततदभि-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

धायकत्वेन चिन्त्यमेव। उभययोर्मध्ये कस्य कुत्रारोष इति विचार्यमाणे शिरः स्थितामिति विशेषणान्वयस्वारस्येन शिरःस्थितायशोयुगत्वस्यैवारोप्यमाणत्वेन कवेरभिप्रेतत्वात् तत्समानवचनकत्वमाख्यातस्य 'अमानि' इति सिद्ध्यति।

अत एव एकोऽपि त्रय इव भाति कन्दुकोऽयम् इत्यत्रापि आरोप्यविशेष्यवाचकसमानवचनकत्वमाख्यातस्येति लभ्यते। एवञ्च प्रकृतिविकृतिस्थले अभेदारोपस्थले च विकृत्यारोप्यमाणसमानवचनकत्वमाख्यातस्य। च्व्यन्तस्थले प्रकृतिसमानवचनकत्वमाख्यातस्याश्रयणीयम् तदेव ज्याय इति शम्।

दरभङ्गा-विश्वविद्यालये

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

द्वौ कालिदासौ—नाटककारश्च काव्यकारश्च

रमाशङ्करतिवारी

(क)

"एकेन जीयते हन्त कालिदासेन केनचित्।
शृङ्गारे ललितोद्गारे कालिदासत्रयी किमु ॥"

'कालीदासत्रयी' इति पदेन त्रयः कालिदासा अभिप्रेता राजशेखरेण। नवकालिदासाः, तदापि, विज्ञापिताः टी० एस० नारायण शास्त्रीमहोदयेन वर्तमानशताब्दस्य प्रारम्भिकचरणेषु। तेषां प्रथमत्रयः सन्ति एवम् (१) उज्जयिन्या हर्षविक्रमादित्यस्य राज्ञः (ईसापूर्वषष्ठशताब्दे) सभारत्नं मातृगुप्तापरनामधेयः कालिदासो येन विरचितानि शकुन्तल-प्रभृतिनाटकानि एवम् सेतुबन्धम् नाम महाकाव्यम्। (२) मालवसंवत्-संस्थापकविक्रमार्कनामकमालवनरेशस्य (ईसा-पूर्व ५७ वर्षे) सभारत्नं मेघारुद्रापरनामधेयः कालिदासो येन प्रणीतानि रघुवंशप्रमुखाणि त्रीणि काव्यानि। (३) कामकोटिपातनस्थमूलशङ्करस्य (४७० ईसवीयवर्षे) शिष्यः कोटिजीतापरनामधेयः कालिदासो येन विरचितानि ऋतुसंहारम्, श्यामलादण्डकम्, नवरत्नमालाप्रभृतिकाव्यानि च। तर्कयामो वयं यत् राजशेखरेण समुद्दिष्टाः त्रयः कालिदासाः सन्ति। इमे त्रयो येषां रचनासमवायः समाविशति रघुवंशादिकाव्यानि, शाकुन्तलादिनाटकानि एवम् ऋतुसंहारम्। वर्तमाने कालेतु एते सर्वे ग्रन्था एकस्यैव कालिदासस्य, इति सर्वस्वीकृतमान्यता प्रचरति। वयमपि, अस्मदीये 'महाकवि कालिदास' इत्याख्ये हिन्दीग्रन्थे (चौखम्बाप्रकाशिते) स्वीकुर्मः इदं प्रमेयम्। परन्तु नूतनकाले अस्माकं मान्यता भजते परिवर्तनम्। अथ च उपधारयामो यत्तु रघुवंशादिकाव्यानि सन्ति एकस्य कालिदासस्य रचनाः तथा शाकुन्तलादिनाटकानि अन्यकालिदासस्य रचनाः सन्ति। ऋतुसंहारमधिकृत्य मन्यामहे यदिदं विरचितं केनचन तृतीयकालिदासेन साधारणप्रतिभासम्पन्नेन यस्य परम्परा नो प्रचचाल अग्रे। यदि संवादो दृश्यते यत्रतत्र कतिपयपदान्यधिकृत्य ऋतुसंहारे स अन्यकाव्येषु च, तन्नो किमपि प्रमाणम् तेषां रचयितुरैक्यस्य। ध्वनिकारः स्वीकरोति सम्भावनां संवादानां सत्कवीनाम् (ध्वन्या०, ४।११)। अपि च

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

शब्दार्थहरणमपि विधीयते समकालीनैः अथवा पश्चात्कालीनैः कविभिः (काव्यमीमांसायाम्)। विवक्षास्ति यत् शब्दार्थसादृश्याधारे विभिन्न-काव्यनाटकानां रचयितॄणां साम्यं नार्हति मान्यताम्। ऋतुसंहार-विषये इयं मान्यता न सारगर्भा यत् काव्यमिद प्रसिद्धकविकालिदासस्य प्रारम्भिकी कृतिः, प्रदर्शयन्ती युवककवेरल्पविकसितकवित्वशक्तिम् या गता कृत्रिम-विकासमुत्तरकाले। प्राचीनकविपरम्परायां नैके विद्यन्ते येषां रचनात्मक-विकासो नो शक्नोति निरूपयितुम्। अस्माकं धारणास्ति यत् पुराकाले तानि काव्यानि एवं कस्यापि कवेः प्रपेदिरो संरक्षणं भूभृतां यानि प्रदिशन्ति तेषां कवित्वोत्कर्षं प्रशिक्षितसहृदयसमाजे। अनेन, यदि महाकवि-कालिदासस्य कवित्वविकासो नार्हति निरूपयितुमृतुसहारं वर्जयित्वा, तर्हि नो चित्रम्।

अस्मदीया नूतना मान्यतास्ति यन्नाटककारः कालिदासः प्राग्भावी वर्तते काव्यकारकालिदासात्, अथ च प्राग्विक्रमादित्यनामधारिनरेशस्य ईसापूर्व प्रथमशताब्दे तस्य संरक्षणम्। काव्यकारकालिदासमधिकृत्य, मन्यामहे यदयं कविकुलचक्रचूडामणिः महाकविकालिदासो ववृते ईसवीयपञ्चम-शताब्दस्यान्तिमचरणेषु। नाश्नुते स्म कस्यचन प्रतापिभूभृतः परिपोषणम्। प्रारम्भे विदाङ्कुर्वन्तु विद्वांसो यत् संवादाः संबद्धनाटकेषु च संबद्धकाव्येषु च नार्हन्ति मन्तुं निर्णयिकाः तेषां रचनाकारैक्यस्य। तर्कयामो, एतद्वि-परीतम्, यत् यदि समानसन्दर्भेषु नाटककारस्य च काव्यकारस्य चाकलनं विशिष्यते अन्योन्यम्, तर्हि तत्प्रमाणं मन्येत तयोर्वैशिष्ट्यस्य।

(ख)

कालिदासस्य, एकस्यैव कालिदासस्य, आविर्भावकाले विश्रुतविद्वांसो मतद्वयं प्रस्तुवन्ति प्रथमेन प्रस्थाप्य कालिदास ईसापूर्वप्रथमशताब्दे तथा द्वितीयेन गुप्तकाले, न्यस्य। समग्रपुरातात्त्विकैतिहासिकसाक्ष्यसंकलनं विफलीभवति प्रयोक्तुं समभावेन नाटककारविषये, अथ च काव्यकार-विषये एककाले। साहित्यिकसाक्ष्यपुञ्जः, सामान्यतः, चरितार्थ्यते ईसा-पूर्वशताब्दपक्षे एवं धार्मिकसांस्कृतिकसाक्ष्यवैपुल्यं नियोजनीयं गुप्तकाल-पक्षपरिपोषणे।

पूर्वोक्त-शास्त्रिणः कालनिर्धारणं नो स्वीक्रियतेऽस्माभिः। यतोहि नाटककारकालिदासस्य समयो नार्हति ६०० ई० पूर्वनिर्धारणम्। माल-विकाग्निमित्रस्य नायकोऽग्निमित्रोऽभवति शुङ्गवंशीयोऽग्निमित्र इति

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

विषये न कार्या विप्रतिपत्तिः शुङ्गवंशीयः अन्तिमो राजा देवभूतिः व्यापादितोऽमात्येन वासुदेवेन, स्थापितवान् कण्ववंशं मगधदेशे। शुङ्गाश्च कण्वाश्च उभौ ब्राह्मणा आसन्। शुङ्गानां महत्त्वं समाकलितं भारतेतिहासे समधिकृत्य ब्राह्मणधर्मस्य पुनरुज्जीवनं यदा बौद्धधर्मः समश्नुते स्म लोकप्रियताम्। शुङ्गनरेशस्य घोषणा यत् "यो ददाति मे एकं श्रमणशिरः, तस्मै प्रदास्यामि दीनारशतम्" इति विश्रुता। तस्यैव तनयोऽग्निमित्रो नायकपदे प्रस्थापितो नाटककारकालिदासेन। इदं संसूचयति नाटककारस्य कालिदासमीपताम् अग्निमित्रस्य। नाटके राजनीतिकविवरणानि प्ररोचयन्ति विदुषः मानयितुं यदग्निमित्रो भवति शुङ्गवंशोयो राजैव। अग्निमित्रो नो बभूव किमपि रामायणीय वा महाभारतीयं वा प्रसिद्धपात्रं यस्य चरितं समावर्जयेत् गुप्तकालीनसामाजिकान्। अपि च, अग्निमित्रस्य मालविकायाश्च प्रणयवृत्तं नो प्रसिद्धिं प्राप्तं यथोदयनवासवदत्तयोः प्रणयकथा जनमानसे इति मन्यामहे यन्नाटककारः कालिदासो भजते अग्निमित्रस्य सामीप्यं।

अस्मिन् प्रसङ्गेऽग्निमित्रकालिदासयोर्मैत्रीप्रवादो नास्तिप्रामाणिकम् यतो हि नाटके चित्रितस्याग्निमंत्रस्य चरितं नो प्रशस्तिगर्भम्। अत एव तर्कयामो यत् नाटकमिदं व्यलेखि कालिदासेन शुङ्गानां पननकाले, न तु तेषां शासनकाले। अत्रानुमानमिद स्वीकरणीयं यत् मालविकाग्निमित्रादिनाटकानि विरचितानि शुङ्गानां कण्वानां च सन्धिकाले। तथोक्तं पूर्वम् उभये ब्राह्मणाः संरक्षकाश्च वैदिकधर्मसंस्कृत्योः। निश्चप्रचमेव कण्वो भवति वैदिक ऋषिः। एवम् महाभारतस्य शाकुन्तलोपाख्यानं साधयति नाटककारस्य कलात्मकप्रेरणा। तदपि, सन्निपातो महाभारतोयवृत्तस्य कण्वानामभ्युदयस्य च प्ररोचयति स्म नाटककारं शाकुन्तलप्रणयनाय, इति कल्पनं न स्वोकरणीयम्। अतः अग्निमित्रस्य साक्ष्यमधिकृत्य, नाटककारकालिदासस्यास्तित्वं माननीयम् ईसापूर्व-प्रथमशताब्दे।

प्रामाणिकमेव—शाहाबादे (उ० प्र०) प्राप्तं मृत्तिकाप्रतीकम्। तत्रसिंहशावकस्य दन्ता केनचन बालकेन गण्यन्ते सङ्केतयति तत् शाकुन्तले वर्णितमेवंविधवृत्तं यत्र सर्वदमनः गणयति सिंहशावकस्य दन्तान् क्रीडायाम्। स्व० मिराशीमहोदयस्य अभिज्ञानं तस्य प्रतिमार्पितबालकस्य केनचन यक्षेण प्रत्याख्यातमन्यविद्वद्भिस्तु ये संयोजयन्ति प्रतीकमिदं शुङ्गकालेन। तथ्यमिदमपि प्रयुणक्ति नाटककारमीसापूर्व—प्रथमशताब्देन।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

अपि च, जनश्रुतिः शृङ्खलयति कालिदासं केनचन विक्रमादित्यनामधेयेन नरेशेन। नवरत्नप्रवादः प्रत्याख्यातोऽधुना। तदपि शाकुन्तलस्य कतिपयप्रतिषु "रसभावदीक्षागुरोः विक्रमादित्यस्य भूयिष्ठा परिषत्" इति कथनमुपलभ्यते। अनेन प्रस्तुतजनश्रुतिर्भजते परिपोषणम। तदा प्रश्नः समुल्लसति अस्य विक्रमादित्यस्य अभिज्ञानविषये। अयं विक्रमादित्यो भवेत् एवंविधो नरेशः शासको वा यः संयोजयितव्यः नाटककारकालिदासेन च समभावेन। पुनश्च, स भवेत् विक्रमसंवत्सरस्य संस्थापकोऽपि। अद्यावधि अभिज्ञानमेतादृशविक्रमादित्यस्य सिध्यति कठिनं कर्म, मिषतां प्रचुरोदग्रप्रयत्नानामैतिहासिकानाम्। अस्मन्मते तु द्वौ कालिदासौ, नाटकप्रणेता च काव्यप्रणेता च, वर्जयित्वा ऋतुसंहारस्य प्रणेतारम् अध्यगच्छताम् प्रसिद्धिः पुराकाले यत् प्रमाणीक्रियते राजशेखरेण। अथ च तस्योल्लेखः समर्हति ध्यानं विदुषाम्। स्पष्टमिदं इमौ कालिदासौ नो ववृताते एककाले हि अवश्यम्। अत एवानयोर्हि समानमेव विक्रमादित्यनामधारिनृपस्यसंरक्षणम्, इति स्वीकर्त्तव्यमादौ। प्रतिष्ठितपदवी ऐतिहासिकानाम्। कालिदाससमस्यासंलग्नानां विदुषां च नो कदापि चिन्तयामास सम्भावनां कालिदासद्वयस्यसाम्प्रतम्।

इदानीम्, गाथासप्तशतीति ग्रन्थस्योल्लेखः कस्यचन विक्रमादित्यस्य यः प्रददौ लक्षं स्वभृत्याय, सुप्रीतः तस्य संवाहनश्रमेण, नोपेक्षणीयः। ग्रन्थः संकलितः सातवाहननरेशेन हालेन ईसवीय—७० वर्षे। अथ च, यद्यपि केषाञ्चन पण्डितानां निरूपणं मान्येत यत् संवर्धनं प्रचचाल अस्य संकलनात्मककाव्यस्य परवर्तिशताब्देषु अपि, गाथार्पितो विक्रमादित्यो भवति चन्द्रगुप्तद्वितीयविक्रमादित्यः, स एव भारतीयेतिहासे समर्थः प्रदातुं लक्षं नैजपरिचारकाद्वयायेति। अत्र कथासरित्सागरे सोमदेवस्य, विरचिते गुणाढ्यकृतबृहत्कथाम् समास्थाय, वृत्तां, वर्णितं परमारवंशिमहेन्द्रादित्यस्य तनयस्य विक्रमादित्यस्य, समर्हति समीक्षणम्। तदनुसारेण, विक्रमादित्योऽयमुन्मूलितवान् शवरान् ये प्रारब्धवन्तः समाक्रमितुं भारतस्य सोम्न ईसवीयपूर्ववर्षेषु। अनेन वैदिकधर्मः पुनः प्रतिष्ठामुपनीतः तथा च महाकालमन्दिरम् उज्जयिन्यां निर्मितम्। सोमदेवः प्रशंसति अस्य विक्रमादित्यस्य गौरवमधोविधम्—

"सोऽपि तद् विक्रमादित्योराज्यमासाद्य पैतृकम्।
नभो भास्वानिवारेभे राजा प्रतपितुं क्रमात्॥"

(कथा०—२८।५९, ६०, ६१)

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

अतएव, गाथाया विक्रमादित्योऽस्ति, कथाया विक्रमादित्य एव; येन संस्थापितो 'मालवगणस्थिति'—नामकः संवत्सरः शकानां गौरवपूर्णपराज यस्योपलक्ष्ये यः प्रसिद्धि प्राप्तः परवर्तिकाले विक्रमनामधेयेन। विसेण्टस्मिथ एवम् एडगर्टन इमौ पाश्चात्त्येतिहासविदौ उररीकुरुतः सम्भावनां विद्यमानत्वेस्य विक्रमादित्यनामधारिनृपस्य ईसापूर्व-प्रथमशताब्दे। मेरुतुङ्गाचार्यविरचित-जैनपद्यावल्याम् उल्लिखितो विक्रमादित्योऽपि उपन्यस्तः ४७०-तमे वर्षे महावीरस्य निर्वाणस्य ५२७-ईसापूर्वम्। अनेन विक्रमादित्यस्य संस्थितिः (५२७-४७०) ईसापूर्व-५७ तमे वर्षे सिद्धि गच्छति। नो ईहामहे परीक्षितुं विवादवैपुल्यं विक्रमसंवत्सरमास्थाय। अस्मत्प्रयोजनाय इत्यलम् यत् नैके विद्वांसः स्वीकुर्वन्ति प्रवर्तनमस्य संवत्सरस्य विक्रमादित्यनामधेयेन केनचन भूभृताऽथवा "गणमुख्येन" ईसापूर्व-५७ वर्षे। वाकणकरमहोदयेन स्वीक्रियत ऐतिहासिकमस्तित्वं कृतसंवत्सरस्य प्रवर्त्तकस्य। चन्द्रगुप्तद्वितीय-विक्रमादित्यस्य संबन्धो वैक्रमसंवत्सरेण प्रत्याख्यातः विद्वाद्भिर्नैकप्रमाणै। शकानामाक्रमणमधिकृत्य गर्गसंहितायाः युगपुराणे निबद्धं आक्रमणस्य वर्णनं संसूचयति शकानाम् अवस्कन्दान् ईसापूर्वप्रथमशताब्देहि, एवम् इयं संभावना नार्हति प्रत्याख्यातुं यत् ते पराजिताः अपमानपूर्वकम् मालवीयैः यैः स्थापितः विक्रमसंवत्सरः प्रसिद्धि प्राप्तं उज्जयिन्या शासकविक्रमादित्यनाम्ना। अयमेव विक्रमादित्यः अभूत् "शकारि" कालात्यये।

अस्माकं धारणा वर्तते—यन्नाटककारः कालिदासो ववृत आश्रितोऽस्यैव विक्रमादित्यस्य यस्य भूयिष्ठा परिषत् जगाम शोभावैपुल्यं कलारसभावव्यवसायिनामुपस्थित्या। अयमेव कालिदासः प्रणीतवान् नाटकानि, केवलं नाटकानि, प्रसादायितुं तस्य "रसभावदीक्षागुरुं" प्रतिपालकम्। कालिदासोऽयं विशिष्टः तस्य सनाममहाकवेः येन रघुवंशप्रभृतिकाव्यानि विरचितानि परवर्तिकाले। उभौ कालिदासौ वर्त्तेते शिवोपासकौ, इति तर्कः न साधयति कालिदासैक्यम्। मध्यकालेषु सूरदासनामधारिणो दशाधिक रचयितारः उपलभ्यन्ते भारतीयवाङ्मये कृष्णोपासकाः। किन्तु, इदं नार्हति निरूपयितुं यत्ते एक एव सूरदासः। इह प्रसङ्गे, इदमापं स्मरणीयं यत् परमभागवताः वैष्णवाः गुप्तनरेशाः प्रदद्युः राजकीयं प्रश्रयं शैवकवये. इति मतमस्मदीयम्।

नाटककारकालिदासस्य वर्तमानता ईसापूर्वप्रथमशताब्दे आसादयति विश्वसनीयताम् एकेनापरेण तथ्येन। शाकुन्तलस्य षष्ठाङ्के "कार्यसैकत·

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

लीनहंसमिथुना" इत्यादि श्लोकः सिध्यति सुव्यक्तं प्रतिध्वनिः निम्नोल्लिखितगाथायाः प्राप्तायाः गाथासप्तशत्याम्—

"पाअडिअं सोहग्गंल्लम्बाए उअह गोट्ठमज्झम्मि ।
दुट्ठवसहस्स सिंगे अक्खिउडं कंडुअंतीए" ॥
(गाथा०, ५।६०)

संस्कृतच्छाया अधोविधम्—

"प्रकटितं सौभाग्यं गवा पश्यत गोष्ठमध्ये ।
दुष्टवृषभस्य शृङ्ऽक्षिपुटं कण्डूयन्त्या" ॥

अत्र महाकविकालिदासो नो प्रदर्शयति कामपि अभिरुचिं प्राकृतकाव्ये यदा नाटककारः प्रणुदितः सुव्यक्तम् अनया गाथया संकलितया गाथासप्तशत्याम् या सम्पादिता ईसवीयसंवत्सरस्य आद्यचरणे। नाटककारो ज्ञातवान् इमां 'गाहाम्' तत्संकलनपूर्वे 'गाहासत्तसई'-ग्रन्थे सातवाहनहालेन ।

अस्मिन् प्रसंगे मालविकाग्निमित्रस्य प्रस्तावनायां पारिपार्श्वकस्य "प्रथितयशसां भास-सौमिल्लक-कविपुत्रादीनां प्रबन्धान्" इति कथनं विचारणीयम् । अनेन प्रतीयते यद्भासादिनाटककाराः प्राप्तवन्तः प्रचुरलोकप्रियतां तदानीम् । अथच रङ्गमञ्चीये संसारे नवोदितप्रतिभकालिदासोऽभूत् अपेक्षया अल्पप्रथितः । भासस्य आविर्भावकालो निरूप्यते कैश्चिद् विद्वद्भिः ईसापूर्वचतुर्थपञ्चमशताब्दे । अस्मन्मते भासो नाटककारकालिदासात् शतसार्धशतवर्षैः एव पूर्वं समास्थाय तस्य लोकप्रियतां प्रसिद्धिं च ईसापूर्वप्रारम्भिकशताब्दे । कतिपया नवीनशोधका मन्यन्ते भासं च कालिदासं च (नाटककारं कालिदासमपि) समकालीनौ निरूपयन्तो भासस्य कालज्येष्ठतां केवलमष्टादशविंशवर्षैरेव । इयं मान्यता अस्वीकरणीयेति सुव्यक्तम् । प्रथमतो, भासस्य नाट्यवचनपद्धतिर्विशिष्यते कालिदासात् प्रस्तावनादिविषये । द्वितीयतो, भासस्य प्राकृतं प्राचीनतरं कालिदासस्य प्राकृतापक्षेया । तृतीयतो, भासस्य नाटकेषु अभिनयविधानानामुल्लङ्घनं दृश्यते यदा इयं स्थितिः नो वर्तते कालिदासीयनाटकेषु । गुप्तकालस्य सुसंस्कृतपरिस्कृतबुद्धिसामाजिका रोचयन्ते स्म उल्लङ्घनं नाट्यशास्त्रीयविधानानाम्' इति माननीयम् ।

अनेन, नाटककारो कालिदासो ववृते समीपतरं भासस्य कालिकदृष्ट्या शतसार्धशतवर्षैरेवेत्ति विश्वस्तव्यम् । उपरिविवेचितानि अन्यानि प्रमाणानि

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

उपन्यस्यन्ति नाटककारम् प्रथमशताब्दे भासस्य ई० पू० कालज्येष्ठतापि परिपुष्णाति इमं विश्वासम् ।

(ग)

अन्तःसाक्ष्याण्यपि समुपलभ्यन्ते यानि प्रदर्शयन्ति नाटककारकालिदासस्य वैशिष्ट्यं एवं प्राग्भावितां महाकविकालिदासात् । नाटकेषु सम्पादिता विवाहाः सन्ति गान्धर्वविवाहा यदा काव्येषु प्राप्ता विवाहा भवन्ति प्राजापत्यविवाहाः । अत्रोल्लेखनीयो यत् स्वयंवरो नार्हति गान्धर्वविवाहाभिधानं, यतो हि शास्त्रीयव्यवस्थानुसारेण, कन्यया सह दैहिकसंयोगोऽथवा मैथुनं समुपद्यते गान्धर्वपरिणये[1]। इन्दुमत्याः स्वयंवरः सिध्यति केवलं माध्यमं अजेन्दुमत्योः परिणये यो भवति मूलतः प्राजापत्य। शास्त्रीयविधानानुसारेण । अपिच, उत्तराधिकारादिविधानानि अवलम्ब्य ये उलनेत्वाः प्राप्तव्याः, नाटकेषु, ते प्रचलिता बभूवुः, यथा निर्दिष्टाः पण्डितैः, ईसापूर्वकाले हि । शाकुन्तलस्य षष्ठाङ्के गुम्फितं वर्णनं वणिग्धनमित्रस्य मरणस्य तथा तस्योत्तराधिकारिणो विषये संसूचयति यद् विधवाः स्त्रियो नो समाशुः अधिकारम्, अधिकर्तुमुत्तरेण पत्युः सम्पत्तिम् । इयं स्थितिर्निवृते ईसापूर्णशताब्देषु यदा मनुवसिष्ठापस्तम्बानां स्मृतयः प्रचलिताः आसन् । रघुवंशे अग्निवर्णस्य आपन्नासत्त्वा विधवा महिषी भवती राज्यारूढा तस्य निधनानन्तरम् । इयं स्थितिः समर्थिता परवर्तिकालीन-याज्ञवल्क्यबृहस्पत्यादिस्मृतिकारैः । शाकुन्तलस्य षष्ठाङ्के एव, अङ्गुलीयकचौर्याय मृत्युदण्डः कथितः । विक्रमोर्वशीयस्य पञ्चमाङ्केऽपिमृत्युदण्डो निगदितः रत्नचौर्याय । मन्वादिप्रारम्भिकस्मृतिकारैः रत्नादि-तास्कर्याय मृत्युदण्ड एव परिकल्पितः, यदा पश्चाद्भाविस्मृतिकाराः कल्पयन्ति आर्थिकदण्डमपि विकल्पत्वेन । अथ, यदुक्तं पूर्वम्, एवंविध-शास्त्रीयप्रावधानानि समास्थाय, माननीयोऽयं यन्नाटककारः कालिदासो विशिष्टः तथा प्राग्भावी काव्यकारकालिदासात् ।

एकमन्यं तथ्यमपि समाकर्षति अस्माकं ध्यानम् । नाटककारकालिदासस्य सौन्दर्यव्यञ्जनाध्ययने वयं लभामहे कतिपयान् बिन्दून् ये विज्ञापयन्ति तस्य दृष्टिवैभिन्न्य काव्यकारकालिदासात् । निम्नलिखिता बिन्दवोनिभालनीयाः —

(१) रघुवंशे पञ्चमसर्गे सूतपुत्राः, प्रबोधयन्ति प्रातः राजकुमारमजम् । तदा कविः प्रशंसति तस्य मनोहराणि "पक्ष्माणि" (५।७६)। किन्तुः

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

विक्रमोर्वशीये, यदा दैत्यानामातङ्कग्रस्ता निमीलितनयना उर्वशी प्रबोध्यते पुरुरवसा, तदा नाटककारः केवलं प्राह—"तदेदुन्मीलय चक्षुरायतं निशावसाने नलिनीव प्रङ्कजम्"। तस्य दृष्टिर्नो संयाति तरुण्याः पक्ष्माणि यद्यपि समाधिकं मनोहारित्वं विद्यते स्त्रीणां पक्ष्ममु। (२) काव्यकारो वर्णयति नायिकानां दशनकेशादीन् (रघु–६।३७; कुमार०–५।१०; ५।३५; १।४७; १।५३; पूर्वमेघे—३५, ५१, ५४; उत्तरमेघे—२, २२, ३२, ३७, ४६ इत्यादि)। नाटकेषु दशनानामुल्लेखोऽनुपलब्धः। यदा मेघदूते, यक्षिण्याः "शिखरदशनाः" समायान्ति कवेः स्मृतिपथं तस्या अनुपस्थितौ एव, तदा नाटककारः समाकृष्येत समधिकं तस्या नायिकानां दशनदीप्त्या, विशेषतः तासामालापकाले तु। किन्तु, नेयं स्थितिः नाटकेषु। (३) नाटकेषु 'ललित' इति पदं नो प्रयुक्तं (प्रायः) नारीसौन्दर्यप्रसङ्गेषु यदा एतस्य प्रयोगः समुपलभ्यते काव्येषु प्रायः समानसन्दर्भेषु (रघु०—११।३८; कुमार०—२।६४; उत्तर०—१ इत्यादि)। (४) 'चारु' इति पदं बहुधा प्रयुक्तं स्त्रीसौन्दर्यव्यञ्जनायाम् (रघु०—६।१४; कुमार०—३।७; १।३९; "प्रियेषु सौभाग्यफला हि चारुता", ५।१, इत्यादि +), किन्तु नाटकेषु पदमिदमप्राप्तं एषु प्रसङ्गेषु। (५) काव्यकारः प्रशंसति शरीरयष्टिं तस्य नायिकानाम् (रघु०—६।६५; ६।८१ इत्यादि) यदा नाटकेषु देहयष्टिर्नो समाकर्षयति नाटककारम् यद्यपि "अव्याजमनोहराणां" नायिकानां (नाटकानाम्)। देहयष्टिर्भवेत् समधिकं समाकर्षिका। (६) काव्यकारो भृशं रोचयते 'दीपं', 'प्रदीपं' वा उपमानत्वेन नारीणां दैहिकद्युतेः (रघु०—६।६७; ७।८९; १०।६८; १२।१; कुमार०—३।४८; १।१०; १।२८ इत्यादि)। नाटककारेण उपमानमिदं नो प्रयुक्तम्। एतद्विपरीतम्, शकुन्तलाया दिव्यसौन्दर्यदीप्तिः व्यज्यते विद्युत्स्फुरणेन—"न प्रभातरलं ज्योति रुदेति वसुधातलात्"।

उपरिनिबन्धतबिन्दवः प्रकाशन्ते यदृच्छया प्राथमिकाध्ययनादेव नाटकानां काव्यानां च सौन्दर्यव्यञ्जनादृष्ट्या। गहनतरमध्ययनं समानसन्दर्भाणां प्रकाशयिष्यति समधिकान् बिन्दून् ये विज्ञापयेयुः पार्थक्यं नाटककारस्य काव्यकारात्।

(घ)

नेदं सत्यं यत् बौद्धधर्मस्य पतनं शुङ्गानां कण्वानां चोत्कर्षकाले बभूव किन्तु तर्कयामो यद् वैदिकधर्मः समासादयति पुनरुज्जीवनमनयो राज-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

वंशयोरभ्युदयकाले, समूर्ध्वं बौद्धधर्मस्य चूडान्तोत्कर्षप्राप्तेः पूर्ववर्तनकाले, एवञ्च ब्राह्मणीयसंस्कृतिधर्मौ आसाताम् वर्धमानौ परवर्तियुगेषु, लभमानौ उत्कर्षातिशयं गुप्तानां राज्यकाले। सुतराम् उभौ कालिदासौ भवत उपस्त-म्भकौ वैदिकधर्मसंस्कृत्योस्तत्तद्युगानुरूपेण।

शाकुन्तलस्य नान्द्याम्, "प्रत्याक्षाभिः प्रपन्नः" इति कथनेन—यथा संकेतितं पण्डितबलदेवोपाध्यायेन—नाटककारो विचेष्टते परोक्षतः निरा-करणाय तत्कालीनस्याविश्वासस्य वैदिकदेवेषु प्रादुर्भूतस्य बौद्धानां प्रभा-वेण। षष्ठाङ्के पुरुषो नाम पात्रं निगदति—"अपि यज्ञेषु पशुमारणप्रवृत्त-श्रोत्रियस्य हृदयं नो करुणाप्लुतम्? "इति, इदमस्ति सूक्ष्मपरोक्षं चेष्टितं समर्थनस्य वैदिकयागानाम्। एवमेव, नाटककारेण परिश्लिष्यते परिव्राजिका कौशिकी राजप्रासादप्रणयप्रसङ्गेषु, इति संसूचयति सूक्ष्मं तस्य अप्रीतिकरं भावं श्रमणसंस्कृतिं प्रति। विवक्षास्ति यत् नाटककारः प्रादुर्बभूव तद्पुरो यदा वैदिकधर्मपुनरुत्थानप्रक्रमे शिष्टसमाजस्य आस्था भजते स्म अल्पाल्पं ह्रासं श्रमणसंस्कृतौ।

रघुवंशादिकाव्यानां लेखके कालिदासे ब्राह्मणधर्म-कृते न कोऽपि सङ्कोचः, न कोऽपि मानसिकोपसंहृतिः ('मेण्टल रिजर्वेशन'), न कापि व्यपदेशकध्वनिः ('अपौलेजोटिक टोन') वा। अनेन, तेन कीर्त्यते ब्राह्मण-धर्मसंस्कृत्योर्गौरवं उन्मुक्तभावेन। तथ्यमिदं विज्ञापयति उभयोः कालि-दासयोः संस्थितिः भिन्नयुगीनेति।

(ङ)

अग्रे, नाटककारस्य च प्रबन्धकारस्य च काव्यचैतन्यमपि परस्परं पृथ-गेव। पौर्विकस्यान्तर्बोधो मूलतो "रोमाण्टिकम् यदा पाश्चात्त्य काव्यबोधो मूलतः क्लासिकलः"—यद्यपि उभौ सामान्यतः समाकृष्टौ शृङ्गारकाम-नीयकेन। पौर्विकस्य चित्ताभोगो संयुज्यते कल्पनायाः कोमलप्रणयलोकेन यदा पाश्चात्त्यस्य मनः संस्थितिः प्ररोचयति तं वितनितुं तस्य प्रणयबोधं भारतीयसंस्कृतेः चिराचरितपरिधौ एव। नाटककारोऽङ्गीकुरुते हृदयस्य मृदुवृत्तीनामधिशासनम्[२] यदा प्रबन्धकारः स्थापयति शालीनतायाः प्रति-बन्धं तासामुपरि। एकः समर्पितः प्रणयं प्रति यदा अपरः कामयते विनिग्रहीतुं प्रेम्णः स्वच्छन्दतां मर्यादाया निगडेन। एकस्य जिजीविषा प्रयच्छति महा-त्म्यं रागस्य यदा अपरस्य संलग्नास्ति सांस्कृतिकमूल्यैः। नाटककारस्य

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

सौन्दर्यभावनायां वायव्यं सौक्ष्म्यं विद्यते यदा प्रबन्धकारस्य रामणीयकचैतन्ये विलासलभ्यस्थौल्यस्य झङ्कृतयः श्रूयमाणाः। कुमारसंभवे पार्वत्या नखशिखवर्णनं तथा मेघदूते यक्षिण्यः सौन्दर्यकीर्तनं प्रमाणयति तथ्यमिदम्। वैलक्षण्यमिदं विधीयते केवलं सापेक्ष्यभावेन, अन्यथा काव्यकारकालिदासोऽपि सिध्येत् अधिकसूक्ष्मः सौन्दर्यवर्णने परवर्तिप्रबन्धकाराणां तुलनायाम्।

नाटकानां नायिकाः प्रायेण "अव्याजमनोहराः", "अव्याजसुन्दर्यः"। मालविकाग्निमित्रे, प्राथमिकी प्रतिक्रिया अग्निमित्रस्य मालविकायाः प्रथमदर्शनेऽस्ति इयं यत् सा कमनीयतरा चित्रार्पितमूर्तेः एवञ्च चित्रकारोऽभूत् "शिथिलसमाधिः" चित्रालेखनकाले। परवर्तिकथनेष्वापि सान्द्रताया अभावो वर्तते। अग्रे मालविकाया एकः "पोजः" (अङ्गभङ्गीविशेषः) चित्रितो यस्मिन् अपि मांसलता नो विद्यते स्फुटम्। अन्येषु परवर्तिचित्रेषु स्थूलता नो सुविविक्ता, मिषतां नितम्बादीनां कथनस्य। अपि च, मालविकास्ति मुग्धा एवं रुष्यति यद् राजा नो ब्रवीति तां चित्रे। मालविकाग्निमित्रयोर्हस्तसञ्चालनमपि संघटते यत् संसूचयति प्रणयस्य महावेगम्। "प्रथमदर्शने प्रेम्णो जनिः", इति सिध्यति नाटककारकालिदासस्य बोधः। इयं स्थितिर्नो वर्तते प्रबन्धकारस्य जीवनबोधे। कुमारसंभवे, शङ्करो नो प्रलुभ्यते पार्वतयाः रूपवैभवेन प्रथमदर्शने न च शशाक विधातुं हस्तादिसंचालनं तया सह पश्चादपि यदा स बभूव अतिप्रसन्नस्तस्याः प्रेम्णो निर्व्यलीकतया, अविचलायमानतया। तत्र प्रबन्धकारोऽभूत् सावधानो यतो भारतीयमर्यादा नो खण्ड्येत।

विक्रमोर्वशीयेऽपि पूर्वोक्तनाटकस्यैव स्थितिः। दैत्यपाशान्मुक्तायाः, भयेन निमीलितनयनाया, रथे निश्चेष्टमुत्तानशयाया उर्वश्या विग्रहमवेक्ष्य वा प्रतिक्रिया उपजायते पुरूरवसो हृदये, इति निभालनीयम्—"तदेदुन्मीलय चक्षुरायत निशावसाने नलिनीव पङ्कजम्" इति अस्याः पङ्क्तेः मधुरिमा विवृतः अस्माभिः 'महाकविकालिदास' इत्याख्येऽस्माकं ग्रन्थे। स्थूलमांसलसौन्दर्यम् उर्वश्या नो प्रलोभयति राजानम्। "अस्याः सर्गविधौ" इत्यादि पश्चात्कथनेऽपि, उर्वश्या नयनरमणीयाङ्गिका प्रभैव तं प्रावर्जयति। "रोमाण्ठिका" दृष्टिस्तत्त्वतस्सौक्ष्म्यप्रिया" कल्पनाजुष्टा च।

शकुन्तलाया रूपसौष्टवचित्रणेऽपि, नाटककारस्य 'रोमाण्टिको' बोधः संयाति प्रौज्ज्वल्यम्। "सरसिजतनुविदधं शैवलेनापि रम्यम्" इत्यादेः

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

आरभ्य नाटककारः परिश्लिष्यतेऽर्थान्तरस्य व्यामोहे—"किमिव हि मधुराणां मण्डनं नाकृतीनाम्" इति एवम् "न प्रभातरल ज्योतिरुदेति वसुधातलात्" इति कथने स उड्डीयते कल्पनारमणीयः व्योम्नि, विच्छिन्नः पृथिवीतलात्। रोमाण्टिकचेतनायाः प्रकर्षोऽधिगम्यते यदा दुष्यन्त उदीरयति—"अनाघ्रातं पुष्पम्" इत्यादि कल्पना मनोहारिवाक्यम्। यदि नामान्ततोगत्वा शकुन्तला दुष्यन्तौ भवतः संयुक्तौ निर्मलीकृतदाम्पत्यरत्युत्कर्षे, तर्हि तदापि सिध्यति रोमाण्टिकचित्ताभोगस्यैवादर्शजुष्टं प्रतिफलम् न तु चरमविकासः मर्यादाबद्धस्य गार्हस्थ्यसंवितदाम्पत्यप्रेम्णः।

अपि च, दुष्यन्तस्य सहसोद्गारः कण्वाश्रमवासिनि—कन्यकानां रूपदर्शने—"दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः" इति सेत्स्यति विदेशिद्रव्यं प्रबन्धकारस्य सौन्दर्यबोधाय तथैव यथा "निनिन्द रूपं हृदयेन पार्वती, प्रियेषु सौभाग्यफला हि चारुता" इति कथनं नार्हति निरूपयितुं कल्पयितुं वा नाटककारस्य जीवन-बोधाय।

अस्मिन् प्रसङ्गे एकस्य विदुषः टिप्पणी "विवृतजघनां को विहातुं समर्थः" इत्यास्याय अर्हति अस्मदीयं स्पष्टीकरणम्। तर्कयति स यत् कथनमिदं व्यनक्ति रोमाण्टिकं चैतन्यम्। विदाङ्कुर्वन्तु एवविधा विद्वांसो यत् पङ्क्तिरियमुत्सृजति गन्धमश्लीलतायाः। रोमाण्टिका चेतना नो विज्ञापयति अश्लीलताम्। एतद्विपरीतम्, सा संसूचयति कल्पनाया उड्डयनं "प्रायेण" येषु तलेषु यत्र यात्रार्थ्यं निराद्रियमाणं सिध्यति। सा प्रसीदति "विस्मये"। प्रेम्णः प्रसङ्गेषु यत्रापि संयोगकामना बलीयसी, तत्रापि संगोपनं येन विस्मयतत्त्वं न हन्यते विदधाति रोमाण्टिकस्य अधिभूतम्। अश्लीलता शक्नोति प्रवेदुट रोमाण्टिकचैतन्यं, क्लासिकलचैतन्येऽपि समभावेन। दमयन्त्याः नखशिख-वर्णने यदा कविः प्रशंसति तस्या योनेराकारं पिप्पलपत्रसंनिभं, तदा स हिनर्स्ति सुरुचितत्त्वम्। अत एव, "विवृतजघनां को विहातुं समर्थः" इति कथनमधिकृत्य, काव्यकारः कालिदासो नो प्रभवति वक्तुं रोमाण्टिकमनोभूमिसेवितः।

काव्यशास्त्रियदृष्टिमवालम्ब्यापि, एको महत्त्वपूर्णं वैशिष्ट्यं दृश्यते अनयोः रचयित्रोः। नाटककारो प्रतिबद्धो मनसा रसव्यञ्जनया। नाटकत्रये श्रृङ्गाररसकल्लोलिनी प्रवहमाणा आद्योपान्तम्। अत्र "नाट्यमेव रसाः। रससमुदायो हि नाट्यम्" इति अभिनवगुप्तस्य कथनं चरितार्थ्यते। रघुवंशादिप्रबन्धेषु कवेर्दृष्टिर्नो समर्पिता रसव्यञ्जनां प्रति। अज-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

विलापो रतिविलापश्च ग्रहणीयौ ह्यपवादरूपेण। रघुवंशस्य कतिपयेषु प्रसङ्गेषु, वीररसव्यञ्जना शक्यते मानयितुम्, किन्तु तत्रापि रसस्योल्बणं परिपोषणं प्रतिबाध्यते, कवेर्वैदर्भीरीतिप्रियतया। अग्निवर्णस्य शृङ्गारवर्णनं जनयति वैरस्यम्, न तु सौरस्यम्। कुमारसम्भवे, पार्वती—नखशिखकीर्तनम् उपलालयति शृङ्गारं नूनम्, किन्तु आलम्बनमात्रस्य वर्णनं नो प्रभवति प्रस्फुटयितुं रसस्य माधुर्यं सुविविक्तम्। शिवपार्वत्योः संभोगवर्णनं समश्नुते परिपोषं निःसन्दिग्धम्। किन्तु तत्र अतिशेयविजृम्भणं हि संयति सुरुचिम् सहृदयानाम्। (प्रसङ्गानुरोधेनेदमर्हति वक्तुं यत् रोमाण्टिका मनोवृत्तिः प्रोज्झति, वर्जयति सुविविक्तं, अनावृतं कथनं रतिप्रसङ्गस्य।) तथापि, प्रकीर्णचित्रणानामेतेषामाधारे इमे काव्ये नार्हतः स्वीकर्तुं रसप्रधानरचने। मन्यामहे यत् भामहप्रमुखा आचार्याः स्वीचक्रुः रसनिबन्धनं गौणरूपेण हि महाकाव्येषु, समाश्रित्य एतादृशकाव्यानि एव।

अत्र मेघदूतमधिकृत्यापि विवक्षामो यत् तन्माधुर्यं नान्वेषणीयं विप्रलम्भरसमवलम्ब्य। यथा विवेचितमस्माभिः अन्यत्र[3], रहस्यं तस्य सार्वभौमाकर्षणस्य अधिगम्यते मूलतः तस्मिन्समृद्धनिबन्धने विलासबिम्बानां दीप्तिमयानां मनोहारिमालिकायाः। महाकविकालिदासो मूलतो "वर्णनानिपुणः" कविः। अतः, साहित्यशास्त्रीयदृष्ट्या, नाटककारस्य पार्थक्यं स्पष्टमेवभ्राजते काव्यकारात्।

भूभृतां शौर्यकथनेऽपि एकं प्रधानं वैशिष्ट्यमभिलक्ष्यते। शिवतनयस्य स्कन्दस्य नियोजनं उपमानत्वेन तस्य नरेशानां विक्रमवर्णने प्रतीयते सर्वातिशायिनी प्रियता महाकवेः कालिदासस्य (रघु०—२।७५, ३।५५, ६।४, ७।१, ११।८३, १४।२२, १७।७; पूर्वमेघे, ४७-४८)। नाटककारः कालिदासः सर्वथा अनभिज्ञः स्कन्देन। तत्सूचयति तस्य प्राग्भावितां कविकालिदासस्य। किञ्च, नाटककारस्य नृपतयो वर्तन्ते सुस्पष्टं सहाया इन्द्रस्य देवासुरसङ्ग्रामे किन्तु, काव्यकारस्य नरेशा नो संयुक्ता विविक्तम् अनेन प्रसंगेन।

(च)

एकमपरं तथ्यमपि विचारणीयं कालिदासद्वयस्य विविक्तीकरणविषये। "अस्ति कश्चिद्वाग्विशेषः" इति संलग्ना जनश्रुतिरपि नावहेलनीया, अपितु, अर्थगर्भा। कुमारसंभवम्, मेघदूतम्, रघुवंशम् च इति काव्यानि प्रणीतानि

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

समनुसृत्य प्रथमाक्षरं क्रमशः पदत्रयस्य इति मान्यता स्वीकर्त्तव्या। अत्र न कोऽपि सङ्केतो नाटकानां विषये। अपि च, "दीपशिखा कालिदासः" इदं कथनं प्रचलितं पण्डितसमाजे यदा व्यवच्छेदयति रघुवंशादिरचयितारम् अन्य-समनामरचनाकारेभ्यः, तदा इदं व्यवच्छेदयति तं नाटककारकालिदासादपि। अन्ततः, किमपि पदमन्यं मार्गणीयमुपलभ्यञ्च शाकुन्तले—श्रेष्ठतरे कलात्मकदृष्ट्या रघुवंशात्—येन कालिदासः पृथक्करणीयः सिध्येत् अन्यान्यसमनामरचनाकारेभ्यस्तु।

(छ)

उपरिगतस्य विवेचनस्यालोके, नाटककारकालिदासस्य पार्थक्यं काव्यकारकालिदासात् सिध्यति अस्मन्मते। अद्यावधि "हिमालयीय" प्रयासा वर्तन्ते, क्रियमाणा विनिश्चेतुं कालिदासस्य संस्थिति-तिथिम् ऐतिहासिक-पुरातात्त्विकाभिलेखादीनां प्रमाणानि समन्विष्य एवम् प्रक्रियायामस्याम् संबद्धग्रन्थानां सम्यक् निरीक्षणमुपक्ष्यते, अथ चापि राजशेखरस्य कथनं कालिदासत्रयोमधिकृत्य आस्ते अवमानितम्। परिणामतः समग्रसंकलितं साक्ष्यवैपुल्यं विफलीभवति समाधातुं कालिदासीयां प्रहेलिकाम्। नो ईहामहे अत्र विवेक्तुं धर्मज्योतिः शास्त्रादि-विषयक-प्रमाणानि यानि प्रभवन्ति प्रभवन्ति विन्यसितुं कालिदासं, एकं कालिदासं, गुप्तानां शासनकाले अथवा ईसापूर्वप्रथमशताब्दे। रघुदिग्विजयवर्णनेऽपि पण्डितैः संकेतितो यत् एवंविध-दिग्विजयकीर्तनं उपलभ्यते रामायणे, महाभारते एवं पुराणेषु अपि। व्यूलरमहोदयेन समुदृष्टं यत् कवित्वप्रधाने रघुदिग्विजयवर्णने उल्लिखिताः हूणादयः सर्वा जातयः प्राप्नुवन्ति कीर्तनं महाभारतादि-ग्रन्थेषु 'ललितविस्तरे' हूणानामुल्लेखो लभ्यते। गौतमबुद्धस्य शिक्षगस्य प्रसङ्गे नानालिपीनां बाल्ये। परन्तु यथोक्तमस्माकं ग्रन्थे पूर्वचर्चिते, मन्यामहे, कविकालिदासो निबध्नाति ऐतिहासिकघटना तद्युगस्य हूणानां पराजयमधिकृत्य, अथच यदि स नो निगदति शकानां विषये, तर्हि इदं माननीयं यत् शकानामवस्कन्दा नो उपपद्यन्ते स्म तद्युगेषु केनचन प्रभावोत्पादकेन प्रकारेण।

अथ काव्यकारकालिदासस्य प्रादुर्भावकालः समर्हति स्थिरीकर्तुम्। अत्रविषयेऽश्वघोषः समायाति अस्माकं ध्यानपथम्। अत्रापि प्रचुरविवादो दृश्यते अश्वघषकालिदासयोः प्राग्भाविताविषये, पश्चाद्भाविताविषये च। अश्वघोषो वर्तते प्राग्भावी कविकालिदासस्य। अन्यत्र विद्यतेऽस्माकं बृह-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

न्निरूपणम् येन नी ईहामहे परिक्षितुं प्रमेयमिदम् इहस्थले[४]। अस्मन्मते त्त तिथिक्रमः संबद्धरचनाकाराणां विषये वर्तते एवम्-भासः; ततः नाटककारः कालिदासः; ततोऽश्वघोषः; ततः काव्यकारकालिदासः।

इदानीम्, प्रश्नः समुपस्थीयते महाकविकालिदासस्य स्थितिकालविषये। "गुप्" धातुप्रयोगमवलम्ब्य यः प्रयासः क्रियते संयोजयितुं कविशेखरं गुप्तानां शासनेन, स प्रत्याख्यातः बिद्वद्भिः। अग्रे च, 'कुमारसंभव'-काव्यमास्थाय विहितः प्रयासोऽपि संयोक्तं कविवर्यं गुप्तनरेशैः सिध्यति रिक्तगर्भः। रामायणे बालकाण्डे सप्तत्रिंशे सर्गे, कार्त्तिकेयस्योत्पत्तिर्वर्ण्यते। अन्ते विश्वामित्रेण निगद्यते—

"एष ते राम गङ्गाया विस्तरोऽभिहितो मया।
कुमारसम्भवश्चैव धन्यः पुण्यस्तथैव च" ॥

मन्यामहे यत् कुमारसम्भवस्य कथा गृह्यते कविसत्तमेन रामायणात्, तर्हि 'कुमारसम्भवम्' इति नामधेयमपि गृहीतं तेन उपर्युद्धृतश्लोकादेव। न कोऽपि संबन्धोऽर्हति स्थापयितुं स्वेच्छया गुप्तनरेशकुमारगुप्तेन अथवा तस्य जन्मना। इदमपि ध्यातव्यं यत् कविकालिदासः संगृह्णाति प्रेरणं पुष्कलं रामायणात्, किन्तु नो किमपि प्रत्यक्षं प्रमाणं लभ्यते नाटककारकालिदासस्य प्राप्तप्रेरणत्वस्य आदिकविना।

(ज)

अस्मन्मते यथा मालविकाग्निमित्रे अग्निमित्रस्य नायकत्वं संसूचयति नाटककारकालिदासस्य संस्थितिकालं, तथैव रघुवंशे अग्निवर्णस्य वृत्तग्रथनमपि सङ्केतयति कविकालिदासस्य स्थितिकालम्। सूर्यवंशीयनेरशानां परम्परायाम् अग्निवर्णो विद्यते रामायणादिकाव्येषु अपि, किन्तु तत्र तस्य एवंविधं विलासितागर्भं चरितं नो निबद्धम्। यद्यपि नैके पण्डितपुङ्गवा उपधारयन्ति यत् कालिदासो विरचितवान् रघुवंशम् पञ्चविंशति-षड्विंशति सर्गेषु येषामन्तिमषट्सप्तसर्गा विलुप्ता येन-केन-प्रकारेण, तस्य आदर्शा मान्यताश्च उपनिबन्धनं संययु वर्तमानोपलब्धेषु एकोनविंशतिसर्गेष्वेव यस्मात् स विरामं जग्राह सूर्यवंशकीर्त्तने अग्रे। अग्निवर्णस्य चरितकीर्त्तने महाकविः संचेतयति स्म नैजयुगीनं कमपि नरपतिं शासकं वा विरमितुं तस्य मर्यादावाञ्छितविलासभोगात्। कालिदासेन ग्रथितमग्निवर्णस्य कामुकताजुष्टचरितं कल्पनाबलेन, प्रमेयमिदं नो स्वीकरणीयमस्माभिः। अग्निवर्णस्य प्रतिरूपम् अथवा प्राग्रूपम् समर्हति अन्वेषणम्।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

परवर्तिगुप्तानामपि न कोऽपि नृपतिः समुपलभ्यते यः सिध्येत् अग्निवर्णस्य पूर्वरूपम् कामुकलम्पटत्वे। अत्र स्वर्गीयमिराशीमहोदयैः कथितम्—"विश्रुतचरितस्य आधारे दण्डिनः 'दशकुमारचरिते,' एको वाकाटकराजाकर्षति अस्मद्ध्यानम्। ववृते वैदर्भनरेशहरिषेणस्योत्तराधिकारी तथा चातिशयदुर्व्यसनलिप्तः। स व्यापादिती 'वनवासी'प्रदेशस्य कदम्बैः[५]। अपि अग्निवर्णस्य विलासवृत्तं प्रतिबिम्बयति अस्यैव दुर्बलनृपस्य निर्मर्यादवृत्ताम् ?

महाकविर्नो प्रक्षिपति कमपि सङ्केतं तस्याभोगस्य कस्यचन चक्रवर्तिमहीपालस्य प्रत्यक्षपरिपोषणस्य। पुनश्च, तर्कयामो यत् वर्णनं विलासितानिमग्नत्वस्य अग्निवर्णश्रृङ्गारकीर्तनसंनिभस्य नो संभवेत् तत्कविना यः समश्नुते कस्यचन राज्ञः संरक्षणम्। न कोऽपि नरपालो रोचयेत् तीव्रसमीक्षणं राज्ञाम् प्रेमजीवनस्य, यद्यपि तद्वर्णनं नो संलगेत् प्रत्यक्षता तेनैव। स्कन्दगुप्तोऽभूत् गुप्तवंशस्य अवतरमः प्रतापिसम्राड् येन हूणाश्च पुष्यमित्राश्च पराजिताः प्रत्यग्रम्। तदनन्तरम्, गुप्तानां गौरवरविः अस्तंगतः सर्वकालाय। यदा कविर्नियोजयति स्कन्दुमपमानत्वेन तस्य नरेशानां शौर्यं व्यञ्जनाय, तदा सोऽनुस्मरति गुप्तवंशीयं स्कन्दगुप्तमपि यस्य दुर्धर्षपराक्रमकथा ववृते तत्कालीनजनमानसो यया कविरपि समाकृष्टः। वाकाटकानां राज्यस्य विघटनं समपद्यत ५५०-ईसवीयवर्षं यावत्। स्कन्दगुप्तस्य निधनतिथिः वर्तते ४७०-ईसवीयवषे प्रति। अनेन तर्कयितव्यम् यत् कविकालिदासः प्रततान तस्य रचनार्धमितां अनयो स्तिथ्योरन्तराले। कालिदासस्य प्रथमोल्लेखः। समुपलभ्यते ऐहोल-शिलालेखे (६३४-ईसवीयवर्षे) "स कविताश्रितकालिदासभारवि-कविकीर्तिं" इति। कालिदासोऽयं महाकविकालिदास एव, न तु नाटककारः कालिदासो निश्चप्रचमेव यतोहि स उपन्यस्तोऽत्र 'बृहत्त्रयी' इत्याख्यस्य काव्य–"स्कूल"स्य। इदानीम्, अनुमानमिदमर्हति कर्तुं यत् शतसार्धशतवर्षाणि व्यतीतानि कालिदासस्य प्राप्तौ शिलालेखीयसम्मानम्।

अथ उपरिगतविवेचनमास्थायानुमेयमिदं यत् महाकवेः संस्थितिकालो बभूव पञ्चमशताब्दस्य उत्तरार्धः अथवा षष्ठशताब्दस्य पूवार्धः।

यथोक्तं पूर्वम्, अयं महाकविः नो बुभुजे कस्यचन भूभृतः संरक्षणम्। स कीर्तयामास राजतन्त्रगौरवमुन्मुक्तकण्ठेन। एवम् प्रदर्शयामास दारुणमनुबन्धं अनियन्त्रितविलासितायाः। तथापि, राजतन्त्रगुणगानं नो प्रमाणयति

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

कवेः कस्यापि इतिहासप्रथितस्य प्रतापिनरपते राज्याश्रयभोगित्वम्। राजतन्त्रमासीत् तद्युगीनं राजनीतिकं यथार्थम् येन मार्गेणैव राष्ट्रस्य समुत्थानं प्राकल्प्यत सम्भवम्। पुनश्च, ब्राह्मणसंस्कृतिः भवति प्रमुखतया राजतन्त्रसम्पोषिका। अतएव, नो चित्रम् यदि कविकुलगुरुः "दीपशिखा" कालिदासः प्रगायति तेजोगर्भवैभवं सूर्यवंशिमहीपालानां ये प्रपूरयन्ति राजधर्मान् भारतीयसंस्कृतौ प्रतिष्ठितप्रोज्ज्वलादर्शानामाभिरूप्ये—

"त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम्।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्॥
शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।
वार्द्धक्ये मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्"॥

किन्तु, यतो हि संस्थितिः कस्यापि महाकवेः स्वतन्त्ररूपेण अकल्पनीया पुराकाले, अत इदं माननीयं यत् महाकविः बुभुजे समाश्रयं कस्यचन सामन्तस्य यो बभूव काव्यकलानुरागी। एवम् दधौ समानुभूतिगर्भां मनीषां तस्य लोकादर्शान् प्रति। अथ चापि यः प्ररोचितवान् तस्य काव्यप्रणयनम्[१]॥

२०, लक्ष्मणपुरी कालोनी, फैजाबाद (उ० प्र०)

---

१. विसंवादोऽन्यथादृशाम्—नाटकेषु महाकाव्ययोश्च समानविषयेषु समानो विमर्शः समाना च शब्दावली नाटककारो महाकाव्यकारश्चैक इति प्रमाणयति। अत्र अभिज्ञानस्यां द्वितीयाङ्के 'मेरुछेदकृशोदरम्' रघुवंशस्य नवमे सर्गे 'परिचयं च ललक्ष्यनि निपातने', इत्यादि साम्यं बिभ्रतः कवेरैक्यं द्योतयति।—सम्पादक

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

मम कविता

रेवाप्रसादद्विवेदो

कविरस्मि न वेति नैव वेद्मि, कवितां किन्तु न नो खिलीकरोमि ।
सरितापि कदाचिदुह्यते नौरपटौ सत्यपि नाविकस्य सूनौ ॥१॥

सखिभिर्यदि दर्पणः पुरस्तान्निहितः, किन्तु करोमि, लज्जयापि ।
मम रूपमहं निरूपयामि, प्रतिबिम्बेष्वनुमाय बिम्बलेखाम् ॥२॥

अभिधान्वययोः क्रमद्वयं यत्, कविकर्मण्यभिधानुजायतेऽत्र ।
रसिकस्य तु संविदि प्रकाशानभिधा प्राग्भजते ततोऽन्वयादिः ॥३॥

प्रददाति यदाभिधा तु काव्यं, द्विजतां तत्र तदाभिवीक्ष्य तुष्टा ।
यदि नृत्यति शारदा कृतार्था, कविता कालकलान्ववायसूता ॥४॥

कलना ननु कालमुत्प्रसूते, कलनैवातनुते कलां, तदीया—।
तनयद्वितयीयमेव रम्या, कविताकामदुघां कवौ प्रसूते ॥५॥

कलया निरपेक्ष्यकालबुद्ध्या, नटनं शून्यकलेवरे क्रियेत ।
निरपेक्ष्यकलाभिरूपलक्ष्मीरथ कालोऽपि करालतां श्रयेत ॥६॥

कलया सुभगम्भविष्णुरार्यैः, कवितार्थत्वमुपैति काल एव ।
अथ कालविलासतर्पितान्तःकरणा सापि कलैव हन्त काली ॥७॥

अनयोरनुलोमताम्रदिष्ठं, प्रतिलोमत्वकरालितं च सिद्धैः ।
मिथुनीभवनं महाकवीन्द्रप्रतिभा - क्रीडनकीचिकीर्ष्यतेऽद्धा ॥८॥

असकौ हि कला सनातनीया, कवितायां निभृतं विनिर्मितायाम् ।
यदि तत्र समीक्षका वधानं दधते वास्तवमस्य मे लभन्ते ॥९॥

न हि पर्युषितं न वाप्यपक्वं, परिपाकाभिमुखीनमेव किन्तु ।
कवितायितुमुत्सहेत तत्त्वं, प्रतिबिम्बेन कषायितं निजस्य ॥१०॥

न हि बाष्पमथो न लोचनानामरुणत्वं कवितावधूं जुषेताम् ।
द्रुतिरेव तु सांविदी सखीत्वं, प्रतिपद्येत रसप्रभोग-पुत्री ॥११॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

इति भूमिकया कवित्वदुर्गं, प्रविविक्षोर्यदि वा प्रविष्टकस्य।
अनपायशुभा वचःप्रवृत्तिर्यदभून्मे ननु तामिहोद्दिशामि ॥१२॥

सीताचरितनाम्नो महाकाव्यस्याग्रजा अनुजाश्च येऽस्मदीयाः काव्यबन्धास्तेषां संभवतितरां नवधा प्रविभागः। (१) देवभक्तिमयमाध्यात्मिकम्, (२) चराचरात्मकं विश्वमात्रं विषयीकृत्य परिपाकमुपगतं विश्वजनीनपदाभिधेयम्, (३) भारतवर्षनामकं स्वकीयं राष्ट्रमधिकृत्य निष्पन्नं राष्ट्रियम्, (४) स्वराष्ट्रगतं मानवसमाजमुपश्लिष्यत् सामाजिकम्, (५) षाट्कौशिकीं पाञ्चभौतिकीं च व्यष्टिमन्वाचक्षाणं वैयक्तिकं, (६) महाजनसमादरात्मकम्, (७) समस्यापूरणात्मकम्, (८) मुक्तकात्मकं, (९) शास्त्रकारिकारूपञ्चेति काव्यजातमिदं सहस्रचतुष्टयादन्यूनेन नानाविधवृत्तवितानसंदृब्धेन पद्यबन्धेन प्राप्तपरिणाममधोलिखितनामभिः संपाद्य स्वयमेव नागराक्षरैर्विलिख्य रक्षितमस्माभिः —

१. **भक्तिमयेषु** 'प्रणयः, दीपोऽस्मि, मातः, प्रतीक्षा, माधुरी, भासां विलासा' इत्येतानि जगदम्बिकास्तुतिमयानि स्तोत्राणि, 'चतुर्दशी, अष्टमूर्त्तिस्तव' इति शिवस्तुतिमये, 'मारुतिः' इति मारुतिस्तुतिमयम्, गोरक्षनाथाष्टकमिति गोरक्षनाथस्तुतिमयं, 'प्रणामा' इति गुरुचरणस्तुतिमयं श्रीरेवाभद्रपीठमिति च नर्मदास्तोत्रमयं तत्। एतेषु २६६ पद्यानि भवन्ति।

२. **विश्वजनीनेषु** शान्तिपाठः, मातर्मेदिनि ! बुध्यस्व मानव ! (रे देश रे दयित), पूतिका, समेयिवान् प्रभात इति पञ्च रचना आद्रियन्ते १४४ पद्यात्मिकीः। एतासु प्रथमा 'द्यौः शान्तिरि'-ति वेदगतं शान्तिपाठमनुहरन् क्रियमाणो लौकिकः शान्तिपाठः, भारतराष्ट्रस्यास्य सीमाप्रदेषु प्रचलन्तं नरसंहारमुपलक्ष्य। द्वितीयस्यां तृतीयस्यां च रचनायां विज्ञानयुगे प्राप्तानां लाभानामिव हानीनामपि समाकलनम्, मानवचेतनाया उद्बोधनञ्च, चतुर्थ्यां गृध्रध्वाङ्क्षसंवादात्मकेनोपन्यासेन राजनयिकैः क्रियमाणस्य संस्कृतिविखण्डनस्य चित्रणम्, अन्तिमायां च भगवान् शिवः परमाणुप्रलयप्रशमायानुनीयते।

३. **भारतराष्ट्र-सम्बद्धेषु** पद्यबन्धेषु 'सरसी, उपरोधः, शतं प्रणामाः, न्यग्रोधः, पाकविपाकः, अहिंसादौहदिकम्, पाणिसरोजम्, ३१-१०-८४ (इन्दिराबलिदानदिनम्)' चेति अष्टौ बन्धाः। एषु सरसीतिनामनि शतके हंसपद्मयोः संवादः, यत्र ग्रीष्मे मानसं सरो यियासुना हंसेन तत्रैव गन्तुमुपरुद्धः पद्मो मातृभूमिरूपायां सरस्यामेव देहपातं समर्थयति, शाङ्करेण

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

दर्शनेन प्रत्याचष्टे च वैभाषिकं दर्शनम्। उपरोधनाम्नि बन्धे सूकरशावस्तन्मातरं पृच्छति 'धनिकानां दुहितरः शुनीसूनून् वक्षसि स्थापयन्ति किमिति न मामिति। तत्रोत्तरं सर्वेषु गुणान्तरेषु जाग्रत्स्वपि गुणद्वयं तत्र नास्तीति न तस्य तावानादरो यावाँस्तादृग्गुणद्वययुक्तानां शुनीसूनूनाम्। तच्च गुणद्वयं 'पक्षे भषितं च पुच्छचलितं चे'-ति। न्यग्रोधे न्यग्रोधो भारतवर्षरूपः। तत्र पश्चिमदेशात् आगतस्य अन्त्रहस्तस्य दक्षिणाभिमुखमासोनस्य च गृध्रस्य परिचयः। पाकविपाक इत्यत्र भारतेषु पाकस्तानेन कृतस्य द्वितीयस्याक्रमणस्य बीभत्सताया धिक्कारः, अहिंसादौहृदिकमिति च पञ्चाशत्तमे यीशुसम्वत्सरे रचिते खण्डकाव्ये भारतविभाजनसमये बालकेषु, नारीषु च शत्रुकृताया अत्याचार—परम्पराया स्वभावोक्तिमयमुपनिबन्धनम्। पाणिसरोजनाम्नि इन्दिरादेव्या निर्वाचनचिह्नस्य पाणिसरोजस्य, ३१-१०-८४ इत्यस्यां च रचनायां प्रियदर्शिन्या इन्दिरादेव्या नृशंसतमायां हत्यायां परिदेवनमासूत्रितम्। 'शतं प्रणामा' इत्यस्मिन् गीतिबन्धे पुनस्ताशकन्दनगरे शरीरं त्यक्तवतः प्रधानमन्त्रिणः श्रीमतो लालबहादुरशास्त्रिण आन्तरिकस्य द्वन्द्वस्य दार्शनिकं चित्रणं भवति। एतेषु ३१९ पद्यानि भवन्ति।

४. **सामाजिकेषु** पद्यबन्धेषु 'प्रलापाः, पत्राय तस्मै नमः, कृष्णं धनम्, निसर्गः' इत्येते चत्वारो बन्धाः। एतेषु प्रलापे पञ्चाधिकानि शतं पद्यानि, भर्त्सना चार्थिक्या विषमतायाः साम्प्रतं समाजे सर्वत्र व्याप्तायाः। अस्त्यत्र जीवस्य दुर्दशाया आलेखनं, निराचिकीर्षायाश्च प्रोद्घोषणम्। 'पत्राय तस्मै नम' इत्यस्यां रचनायां समाचारपत्रेषु समृद्धानां दौरात्म्यस्य नग्नतमं निरूपणमुपश्लोकितम्। 'कृष्णं धनमि'-त्यत्र 'कालाधन'-'Black money' नाम्ना व्यपदिष्टायाः प्रच्छन्नमर्जितायाश्चौर्यैपयिक्याः संपदः सामर्थ्यस्य श्लेषाश्रितं वर्णनं चमत्काराय कल्पते। 'निसर्ग'-नाम्नि एकपञ्चाशत्पद्यात्मके पद्यबन्धे मयूरविडालव्यतिकरव्याजेन मात्सर्यस्य प्रतिहिंसायाः तितिक्षायाश्च निरूपणं भवति। चतुर्ष्वप्येतेष्वाहत्य १७८ पद्यानि भवन्ति।

५. **वैयक्तिकेषु** एकान्तगतान् व्यतिकरानाश्रित्य 'शय्या, संजल्पः, कस्त्वं काम, निशीथशयितम्' इत्येताश्चतस्र रचनाः ३४ पद्यानि बिभ्रति, येषु स्वगतकल्पस्य वचोविधानस्य माध्यमेन शृङ्गारगतानां सूक्ष्मसूक्ष्माणां घटनानां परिभोगाणां च लभ्यते साहसपूर्णं कवनम्। मनोगताननुशीतिदंशानाश्रित्य रचिता रचनाः 'प्रतिबिम्बम्, कुक्षे, भावा' इति तिस्रः। आसु

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

प्रथमे व्यक्तिविशेषस्य प्रवृत्तिषु ये पारस्परिका वैषम्यकष्मला विरोधास्तेषां त्रिंशता द्रुतविलम्बितैरनुशयाशंसा, सैव 'कुक्षे' इत्यत्र गीतिमये बन्धे, 'भावा' इत्यत्र च विषयान् प्रति रागवैराग्याभ्यामामृष्टा या दोलाधिरूढिस्तस्या विषादप्रसाददिग्धं व्याख्यानमुपश्लिष्यते। सप्ततिरत्र पद्यानाम्।

'शतपत्रम्, मधु, मृत्यो, अव्यक्तम्' इत्येतासु चतसृष्वाद्यायां 'कविता-तत्त्व'माश्रित्य पद्यानां पञ्चाधिकेन शतेन काव्यस्य स्वरूपं, कारणं, विषयाः, प्रयोजनानि, माहात्म्यमन्यान्यपि चैवंविधानि तत्त्वानि कवित्वपूर्णाभि-रौपच्छन्दसिकाभिरुक्तिभिरुपनिबद्धानि। 'मधु' नामनि लघीयसि पद्यबन्धे 'मधु क्षरन्ति सिन्धव' इत्यादिभिर्वैदिकैर्वचोविन्यासैः सुधाया अग्रजस्य यस्य मधुतत्त्वस्य माहात्म्यं गीयते तदेवाधिकृत्य षट् पद्यानि प्रस्तूयन्ते। 'मृत्यो' इति काव्ये चतुष्पञ्चशता पद्यैर्नचिकेतसा प्रस्तुतानां प्रश्नानामुत्तराणि निबद्धानि। सेयं गभीरतमाशया दार्शनिकी रचना। अव्यक्तमित्यत्र साम्प्र-तिके युगे कलासु, प्राचीने च युगे दर्शनेष्विव तन्त्रेषु या अस्फुटार्थसंकेत-प्रायता तां विषयीकृत्य स्फुटानि पद्यानि संगृहीतानि। तदिदं तार्किकं क्षेत्रं कवितायाः। अत्र १५६ पद्यानि भवन्ति प्रायेण।

प्रवर्त्तमानं परिवर्त्तमानं च यत् संवत्सरचक्रं साम्प्रतं प्रकृतिपदेन नेचर-पदेन परिभाष्यते तदिदमाश्रित्य 'किमिति स्मितं मुखे ते' इति अतिमुक्ता-लतिकाविभूतौ रचिता गीतिमयी बंहीयसी पेशलतराशया च स्वयंवरसभा। रातरानीति नाम्ना व्यपदिश्यमानां लतामधिकृत्य कृतेयं पेशलतमाशया सप्तत्रिंशत्पुष्पिताग्रात्मिकापरा रचना, सुदर्शननाम्ना प्रसिद्धमौषधक्षुपमा-श्रित्य कमलवैभवतिरस्कारिणीर्वाचोयुक्तीरादधती पञ्चदशशार्दूलविक्रीडिता-दिपद्यात्मिका ललितललिता काव्यमयी हृदयस्योच्छ्वसितिः, शरदिति च नूतनतमा शरदृतोः वर्णना। १२० भवन्ति नामात्र पद्यानि।

अष्टादशभी रथोद्धताभिस्तीर्थराजप्रयागगतस्य सितासितसंमिश्रस्य बिम्बनमनितरसाधारणमेव सनातनीयेषु कविकर्मसु।

शिशरत्रिलोकीति या रचना तत्र शिशिरे कृषीवलयुवकस्य यत् सौभाग्यं तस्य शृङ्गारातिशयपेशलं बिम्बनम्। भवन्त्यत्र १२ पद्यानि। एवमनुच्छेदे-ऽस्मिन्नाहत्य ३८४ पद्यानि भवन्ति। एतेषु १–५ पञ्चसु वर्गेषु पद्यानां संख्या १३२७ प्राया भवति।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

६. **समादरात्मके** वर्गे 'कालिदासः, तुलसीदासः, माखनलालश्चतुर्वेद इत्येवंविधान् कवीन्द्रान्, शृङ्गेरी–काञ्ची–काशी–द्वारका–बदरिका–पीठाधीश्वराञ्जगद्गुरुशङ्कराचार्य्यान्, करपात्रस्वामिनः, अखण्डानन्दसरस्वतीपादान्, आनन्दमयीमातृपादान् ब्रह्मचारिश्रीलक्ष्मणचैतन्यान्, गोस्वामिनोऽतुलकृष्णान्, कविराजान् गोपीनाथान्, चतुर्वेदिनो म० म० श्रीगिरिधरशर्म्मणः, पण्डितराजश्रीरघुनाथशर्म्मणः, पं०राजश्रीराजेश्वरद्रविडशास्त्रिणः, पं०राजश्रीपट्टाभिरामशास्त्रिणः, पंडितराजश्रीबदरोनाथशुक्लान्, पं०रामकुबेरमालवीयान्, डॉ०बलरामजाखडान्, श्रीमतउमाकान्तमिश्रान्, डाक्टरमण्डनमिश्रान्, डॉक्टरकालूलालश्रीमालिनः, डॉ० गोपालत्रिपाठिनः, डाक्टररघुनाथसिंहान्, डाक्टरविभूतिनारायणसिंहनाम्नः काशीराजमहोदयान् नेपालाधीश्वरान् श्रीवीरेन्द्रविक्रमसिंहान्, श्रीमतीरिन्दिरागान्धिमहोदयाः, श्रीमतो देवकान्तवरुवामहोदयान्, श्रीमतो जगजीवनराममहाभागान्, श्रीमतः पं० कुञ्जीलालदूबेमहोदयान्, श्रीमतः सत्यदेववर्म्मणः, कविशिरोमणोन् रामरूपपाठकान्, पं०श्रीबलदेवोपाध्यायान्, डॉ० रामज्युपाध्यायान्, अन्यानि च सुबहूनि मित्राण्याश्रित्य तेषामभिनन्दनेषु रचितानि पद्यमयानि पत्राणि प्रायेण ७० भवन्ति, येषां श्लोकानां संख्या ४०० इत्येतान् अङ्कानतिशेते ।

७. **समस्यापूर्त्तिषु** ३२ समस्याः १७६ च पद्यानि भवन्ति ।

८. **मुक्तकेषु** अन्योक्तिप्रमुखेषु पद्येषु १३५ संख्या भवति । सेयमपरा सप्तशती ।

९. **शास्त्रकारिकासु** काव्यालङ्कारकारिकायां २५९ कारिकाः, नाट्यानुशासने ११२ कारिकाः, भरतदर्शने ११२ कारिकाः, इतराश्चैकविंशतिप्रायास्ता आदाय ५६० कारिका भवन्ति । तानीमानि ७००+५६०+१३२७=२५८७ पद्यानि । सीताचरिते ८०० पद्यानि, यूथिकायां १२५ पद्यानि, सप्तर्षिकाङ्ग्रेसे २९३ पद्यानि, शोधनिबन्धमङ्गलोपसंहारेषु ५० पद्यानि, गुरुभ्यो मित्रेभ्यश्च लिखितेषु पत्रेषु प्रायेण २०० पद्यानीति प्रायेण १४०० पद्यानि भवन्ति । २५८७+१४००=३९८७ इत्येवं पद्यानां संख्या साहस्रीचतुष्टयीमुपयाति । पद्यप्राभृतनामकमन्यदप्येकं ५१ पद्यात्मकं शृङ्गारकाव्यम् । तदित्थं संख्येयं ४०३८ अङ्कानतिवर्त्तत ।

'त्रिपादी, कस्य दोषः, कोऽह'-मिति तिस्रो लघुकथाः । ता एता गद्यात्मिकाः । तिस्रोऽपीमा आकाशवाण्या प्रसारितपूर्वाः ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

यदिदं मामकीनं साहित्यमत्र प्रायेण १७६१ पद्यात्मकमेव साहित्यं साम्प्रतं यावत् मुद्रित-प्रकाशितम्। अवशिष्टं तु प्रकाशनाय स्पष्टं विलिख्य रक्षितम्।

कालेन कलायाः, कलया च कालस्य यः समवायः यश्च कश्चन काल-कलामतीत्य संप्रवर्त्तमानो ज्योतिर्मयः समाधिलोकः साहित्यसामग्रीयं तत्रो-भयत्रापि समवधत्ते। अत एव संस्कृतेति प्राचीनतमया भाषया निबध्यमा-नमपीदं नित्यप्रत्यग्रमेवानुभूयेत। अत्रोदाहरणानि—

प्रणयोनाम प्रीतिपूर्विकाऽभ्यर्थना तथाचामरकोषः 'प्रणयास्त्वमी विस्रम्भयाञ्चाप्रेमाण' इति। प्रयोगाश्च 'कामार्त्ता हि प्रणयकृपणाश्चतेना-ऽचेतनेषु' इति 'तद् भूतनाथानुग! नार्हसि त्वं सम्बन्धिनो मे प्रणयं विहन्तुमित्यादयः। अत्रापि प्रणयनाम्नि २५ पद्यात्मके काव्यबन्धे पन्नगानां माता सुरसा प्रार्थ्यते—

सर्वं भक्षय पन्नगप्रसविनि! त्वं निर्भयं निर्दयं
नीरन्ध्रं च ततो न चेतसि शुचो लेशोऽपि जागर्त्ति कि।
यत् त्वं रामसहायकं कपिवरं ग्रासीचिकीर्षस्यसा-
वेवाशा सुरसे! दहत्यपि चितिं ग्राव्णां शुचा द्राविणाम्॥

दीपोऽस्मीति सूक्तौ जगज्जननी संबोध्यते—

मातर्नास्मि शुकोऽनुवादकलया धन्यो, न वा पुण्ड्रको
निष्ठ्यूतोऽप्यतिमात्रमात्मरहितो मौनव्रतैकस्पृहः।
नास्म्येवामृतरश्मिरेव जडताक्लिष्टां सुधां धारयन्
नागोऽप्यस्मि न वा द्विजिह्वविरुदो, दीपोऽस्मि ते ज्वालितः॥

अयमस्ति भगवतो गोरक्षेश्वरस्य महिमा—

छिन्ते कालुष्यराशिं निबिडमुपचितं यत्प्रसादोऽवसादं
भिन्ते तत्तत्क्रियासु प्रतिफलविधुरास्वाशु रिङ्क्ते च कुण्ठाम्।
क्षुन्ते दैन्यानि विङ्क्ते कुनियतिमुदितां किञ्च भुङ्क्ते विपाकाँ-
स्ताँस्ताँस्तान् योगिराजान् नमति वसुमती द्यौश्च गोरक्षनाथान्॥

'मातर्मेदिनीति रचनायां मेदिनी पृच्छ्यते—

मातर्मेदिनि! सत्वरं वद वद प्रोद्वास्य मन्दाक्षकं
को वा प्रस्तुत-रामरावणमहायुद्धेऽधुना जित्वरः।
ब्रूहि ब्रूहि युधिष्ठिरोऽथ कुशली दुर्योधनो वा वद
त्वं वा कासि कृतान्तकष्टनियतिः कुन्ती न किं त्वं वद॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

'समेयिवान् प्रभात' इति रचनायां सृष्टिसंहारको भगवान् शिवो ऽनुनीयते—

भगवन् स्फुरतीव ते तृतीयं नयनं संवृणु तत् कृपासुधाब्धे ।
स्मर एष न चापलं विधत्ते प्रमथस्ते परमाणुसंज्ञकोऽयम् ॥

अत्रैव निरीश्वरा विज्ञानदर्शनाश्च दार्शनिकाः पृच्छ्यन्ते—

अयि दार्शनिका ! यदि त्रिलोक्यां परमेशप्रतियोगिकोऽस्त्यभावः ।
तदिमां परमाणुरत्नशय्यां रचयध्वे नु कृते परस्य कस्य ॥

कवितामधिकृत्य निष्पन्नायां 'शतपत्र'-मिति रचनायां कवितैव हि सर्वेषां दर्शनानां मूलमिति भावे पद्यम्—

कविता-शतपत्र-चञ्चरीकी चितिरेषा किरतीह यान् परागान् ।
प्रतिभान्ति त एव तत्र तत्र बहुधा दर्शनमौक्तिकानि भूत्वा ॥९१॥

अत्रैवापर उद्गाराः—

कविता हृदयस्य वाक्यशेषः कथितेऽनुक्ततया प्रकाशमानः ।
कविता कथिता कथा पुराणी, न पुराणी, न नवाऽथवाऽप्सराः सा ॥६४॥
कविता प्रणयाग्निना द्रुतस्य हृदयस्यास्य मधुक्षरा विपञ्ची ।
स्वत एव विवर्त्ततेऽर्थभावाद् वचसां यत्र ऋतम्भरा प्रवृत्तिः ॥१०३॥
कविता जमदग्निकामधेनुर्न पुनः कापि सहस्रबाहुगर्धा ।
कविताऽस्थिचयो दधीचिदत्तो न पुनर्यः किल दुन्दुभिप्रक्लृप्तः ॥४५॥

मधुविद्यायामन्तिमं पद्यम्—

शिव एष भवान् हि पुष्पधन्वा, मधुमत् पुष्पम्, अथो मधु त्वमेव ।
प्रलयश्च तदात्मता च तत्त्वं कवितामात्रशरण्यभिन्नताकम् ॥

'प्रलाप'नाम्नि शतके जीवो लक्ष्मीमनुरुणद्धि—

अयि लक्ष्मि ! यदञ्जनं त्वदीये नयनाब्जे श्रियमातनोति, पश्य ।
तदिदं खलु येन संप्रसूतं स हि दीपोऽप्यहमेव पूर्णपात्रः ॥१५॥

'कृष्णं धनमि'-ति कृतौ भरतवाक्यमेवंरूपम्—

श्रीकृष्णाय धनाय सर्वधनिनां प्रेष्ठाय रे श्रेष्ठिनः
सर्वे यूयमिमे त्रिसन्ध्यमुपदीकुर्युः प्रणामाञ्जलीन् ।
तद्वै केवलमव्ययं धनमिदंकाले समुद्रस्य ये
मन्थास्तेषु तदेव कूर्मति, तदेवाद्रीयते, नेत्रति ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

'शय्यायां' शय्यैव संबोध्यते—

शय्ये ! तत् सरघाशतं मधुमयं छत्रं तदन्तस्तले
छिद्राणामयुतं रहोजगति मेऽन्यद् यच्च पाथेयकम् ।
त्वं जानासि समस्तमेव तदिदं, प्रत्यक्षतस्त्वेषको-
ऽहं हंहो परिसंस्कृतः स्थिरमतिप्रस्थानवाग्मी नटः ॥

समस्यापूर्त्तिषु 'चन्द्रः प्रवालप्रभ' इति समस्यायाः पूर्त्तिः—

देव्याः कुङ्कुमपौनरुक्त्यललिते बन्धूकलक्ष्मीस्पृशि
स्मेरे स्फारिणि सत्कपोलफलके संक्रान्तबिम्बोत्तमः ।
सौभाग्यं स्थिरयेत नः पुररिपोश्चूडाङ्गणक्रीडनासक्तः
कश्चन चुम्बनव्यतिकरे चन्द्रः प्रवालप्रभः ॥ इति ।

श्रीरेवाभद्रपीठनाम्नि काव्ये बहुविधानि भावचित्राणि प्रारम्भत एव सुलभानि । स्वाराज्यस्य स्वरूपं कारणं चैवमुपनिबध्येते—

वन्दे श्रीनर्मदाम्बां सलिलपुलिनयोः सारसद्वन्द्वगीतां
चक्रश्रीप्रीतिलीलां रसयति भगवान् यत्र साधं भवान्या ।
वन्दे चास्यैव शिष्यं प्रभवति परशौ यस्य दण्डाधिकारे
सुस्था गौर्मानवीया सुभगयति सुखं स्वाः प्रजाः स्वै रसौघै ॥१॥

अत्र पूर्वं भोपालपार्श्वे बुधनीतहसीले शाहगञ्ज-थाना-क्षेत्रे च विद्यमानो नन्दनगरनाम्ना प्रसिद्धो नादनेरनामा सांप्रतिको ग्रामो वर्णितः, ततो नर्मदाया अयं जनपदः, ततश्च माहात्म्यातिशयः । तत्र नारीसौभाग्योत्कर्षे पद्यम्—

एकत्र प्रतिमापरं प्रवहति श्रीनर्मदाया जलं
यत्रान्यत्र च तादृशं हि सुभगाव्रातस्य सत् सौभगम् ।
किं कस्मादधिकायतामिह युगे कस्माच्च किं न्यूनता–
मञ्चेदत्र भवो मनोभव इति द्वन्द्वोऽप्यलीको हि यत् ॥१५॥

अत्रैव नर्मदासमीराणां वर्णनम्—

रेवावारिपवित्रितास्तटतरुक्षुद्रामधुश्च्योतिनः
स्पृष्टोदुम्बरडम्बरारुणफलक्षाराम्बवश्चापि यम् ।
सेवन्ते खलु मारुताः खल-कृषि-व्याकोष-हेवाकिनो
नित्यं तं ननु नादनेर-विरुदं ग्रामं नुमः श्रद्धया ॥३८॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

स्तुतिपद्येषु केचिदद्भुता भावाः। स्मरवपुषि कृशानुलंग्नः, तदिदं ज्वलिति। माता नर्मदा शिवयोश्चित्ते करुणामुत्पादयति ततश्च नर्मदाप्रपातैस्ताविमौ सहस्रधाराक्षेत्रे भेडाधाटपार्श्वे च अग्निशमनयन्त्रव्रातमुखोज्झितैरासारैरिव शमयितुमुद्यतौ भवतः। तथा च स्रग्धरा—

माहिष्मत्यां सहस्रार्जुनकरविपिनादुल्लसन्ती ततश्च
साहस्रीमाश्रयन्ती हिमकरविशदां स्रोतसां तेऽम्ब या श्रीः।
भेर्याघातोपकण्ठे स्फटिकगिरिशिलाषण्डवक्षःप्रपात-
स्फीतात्मा या च ताभ्यां स्मरवपुरनिलं शामयेते शिवौ नः ॥९१॥

नर्मदा महाप्रलयेऽपि न नश्यति। सेयं ब्रह्मणो मुखे समुद्भिद्यमाना नैका दन्तद्वयीरालोचयते, करोति च तस्य जातकर्मतः सपिण्डनं यावत् सर्वान् संस्कारान्—

नान्दीश्राद्धविधींस्तनोषि विधये त्वं, त्वं हि मौञ्जीविधे-
रूदर्ध्वं तन्मुखचत्वरे क्रमयसे छन्दस्वतीं भारतीम्।
तस्मै त्वं हि चपेटया दिशसि वै वेदान् गतायुष्यसौ
त्वं ह्यत्रोर्ध्वविधीन् करोषि, विधये त्वं केवला बान्धवः ॥१०५॥

नर्मदैव काश्यां विश्वेश्वरबाणतया प्रतिष्ठाप्यत इति किं वाच्यं तन्महिम्नः—

एतावन्मात्रमम्ब त्वयि निखिलमरुद्वन्द्यतायै प्रकामं
पर्याप्तं वै प्रमाणं यदसि भगवती काशिकायां तदीशा।
त्वद्गौरीकुण्डगर्भे लसति य उपलस्तन्मयीं त्वां हि मातः
काश्यां श्रीविश्वनाथो गमयति पदवीमात्मनः संप्रसीद ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

शक्तितत्त्व-समीक्षा

एन्० आर० श्रीनिवासन्

अखिलमानवानामनुभवसिद्धं यत् वह्नेरेव दाहजनकत्वं न तु जलस्य, अयस्कान्तस्यैव अयस आकर्षकत्वं, मूषिकाद्यनाघ्रातबीजस्यैव अङ्कुरोत्पादकत्वं, घटपदस्यैव घटरूपार्थबोधकत्वं न पटपदस्येति। अनेन वह्न्यादीनां दाहाद्युत्पत्त्यसाधारणशक्तिर्वर्तत इति निर्विवादम्।

इदं च शक्तिः किं रूपा? तत्सत्त्वे किं प्रमाणम्? सा किं द्रव्यादि सप्तपदार्थेषु अन्तर्भूता उतातिरिक्ता वेति विषये शास्त्रकारा बहवो बहुधा विवदन्ते।

तत्र नैयायिका मण्यादि प्रतिबन्धकसत्त्वे वह्निना दाहो न जायते तदभावे च दाहो जायते, अतः प्रतिबन्धकाभावरूपकारणत्वात्मिका शक्तिः, सा चाभावेऽन्तर्भवतीति संगिरन्ते।

मीमांसका वैदान्तिनश्च स्वानुभवं तथा आगमं च प्रमाणीकुर्वन्तः भावात्मिका शक्तिः, सा चातिरिक्तेति निरूपयन्ति।

अस्मिन् निबन्धे प्राधान्येन नैयायिकोक्तदूषणान्यनूद्य तन्निरासपूर्वकं मीमांसकमतेन शक्तिः स्थाप्यते।

शक्तिर्नाम-सर्वकारणानां कारणत्वनिर्वाहः कश्चित् धर्मविशेषः। तत्र प्रमाणमनुमानमागमश्च। अनुमानं तु—मण्यादि समवहितवह्निनिष्ठदाहोपधायकत्वाभावः।

[1]दाहकारणतावच्छेदकाभावप्रयुक्तः, सहकार्या भावाप्रयुक्तत्वे सति दाहोपधायकत्वाभावत्वात्, यत्र सहकार्यभावाप्रयुक्तत्वे सति यत्कार्योपधायकत्वाभावत्वं तत्र तत्कार्यकारणतावच्छेदकाभावप्रयुक्तत्वं यथा दण्डादिनिष्ठपटाद्युपधायकवाभाव इति[2]।

---

१. शक्तेः कारणतारूपत्वे दाहकारणत्वाभावप्रयुक्तत्वं साध्यमितिः, विभावनीयम्।

२. अस्मिन् अनुमाने दाहकारणतावच्छेदकाभावप्रतियोगितया सिद्धो धर्म एव शक्तिः।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

वह्निः[1] दाहानुकूलाद्विष्ठातीन्द्रियधर्मसमवायी दाहजनकत्वात् अदृष्टवादात्मवत् इति वा।

आगमस्तु—

शक्तयस्सर्वभावानामचिन्त्यज्ञानगोचराः ।
यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः।
भवन्ति तपतां श्रेष्ठ पावकस्य यथोष्णता ।

इत्यादि ।

सा च शक्तिस्त्रिविधा—सहजशक्तिः, आधेयशक्तिः पदशक्तिश्चेति। तत्र वह्न्यादिषु दाहाद्यनुकूला या शक्तिः सा सहजशक्तिः। व्रीहीन् प्रोक्षतीत्यादिषु प्रोक्षणादिना व्रीह्यादिषु कश्चन संस्कारातिशय आधीयत इति स एव आधेयशक्तिरिति। पदशक्तिर्नाम—पदेन पदार्थाविगत्यनुकूलः सम्बन्धः पदपदार्थनिष्ठः।

वह्निना पूर्वरूपध्वंसात्मको दाहो जन्यत इति दाहकारणत्वं वह्नेः प्रतीयते। तत्र वह्नेः वह्नित्वेन कारणत्वं न वक्तुं शक्यते मणिसमवाधानकाले दाहाजननात् अन्वयव्यभिचारात् वह्नित्वस्य कारणतावच्छेदकत्वं न संभवति अतोऽव्यभिचरितः कारणतावच्छेदकधर्मः कश्चिदवश्यमभ्युपेय इति स एव शक्तिरित्यभिधीयते। एवं शक्तिमत्त्वेन वह्नेः कारणत्वस्वीकारे मणिसमव-

---

१. अतीन्द्रियधर्मपदेन शक्तिर्विवक्षिता। भर्जनकपालस्य वह्निवृत्त्यनुद्भूतरूपमादाय सिद्धसाधनं स्यादित्यतो दाहानुकूलेति साध्ये विशेषणं, तादृशानुद्भूतरूपस्य दाहानुकूलत्वाभावात् न तदादाय दोषः। अतीन्द्रियेत्यनुक्तौ वह्निगतोष्णस्पर्शस्य दाहानुकूलत्वात् तमादाय सिद्धसाधनं स्यादिति तद्वारणात अतीन्द्रियेति। वह्निगतोष्णस्पर्शस्य बहिरिन्द्रिय-(त्वक्) ग्राह्यत्वात् नातीन्द्रियत्वमिति न दोषः। कार्यसामान्ये अदृष्टस्य स्वाश्रयसंयोगसंबन्धेन हेतुत्वात् तत्संबन्धेन संयोगस्यापि हेतुत्वात् तमादायसिद्धसाधनं स्यादिति तद्वारणाय अद्विष्ठेति विशेषणं, संयोगस्य उभयवृत्तित्वात् अद्विष्ठत्वाभावात् नोपादातुं स शक्य इति न दोषः। अत्र आत्मनो दाहजनकत्वाभावात् तस्य दृष्टान्तत्वं यद्यप्यसंगतं, तथापि कार्यमात्रे कर्तुरेव कारणत्वमिति मताभिप्रायेण। अथ वा जनकत्वं प्रयोजकत्वं-कार्यमात्रं प्रति कृतिः कारणं तादृक्कृतिकारणत्वमात्मन आश्रयतयेति परंपरया दाहजनकत्वमात्मनोऽभिप्रेत्योक्तं।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

धानदशायां वह्निनिष्ठा दाहजनकतावच्छेदिका शक्तिर्मणिना प्रतिबद्धेति न व्यभिचारः।

अत्र नैयायिका मण्यादिसमवधानकाले मण्यादिरूपप्रतिबन्धकसद्भावेन प्रतिबन्धकाभावरूपकारणविरहादेव न वह्निना दाह इति प्रतिपादयन्ति तन्मतमित्थं निरस्यते मीमांसकैः।

अभावस्य कारणत्वनिरासः

अभावस्य तुच्छत्वात् घटादि(भाव)कार्यकारणभूतेषु दण्डचक्रादिषु कारणत्वस्य भावत्वव्याप्तत्वात् अभावे भावत्वविरहेण तद्व्याप्यकारणत्वमपि न घटत इति प्रतिबन्धकाभावो न कारणम्।

अन्वयव्यतिरेकव्यभिचाराभ्यां कारणत्वनिरासः

अथ मण्याद्यभावे सति वह्निना दाहो जायते मण्यादि समवधानकाले दाहो न जायत इति अन्वयव्यतिरेकानुविधानरूपकारणतानिश्चयहेतोः मण्यादिप्रतिबन्धकाभावेऽपि सत्त्वेन तस्य हेतुत्वमभ्युपेयमेवेति चेत्,

अभावस्तु प्रागभावः, प्रध्वंसाभावः, संसर्गाभावः अन्योन्याभावश्चेति चतुर्विधः। तत्र अन्योन्याभावस्य केवलान्वयितया मणिरूपप्रतिबन्धककाले तद्भेदस्य वह्नौ विद्यमानत्वेऽपि न दाह इति नान्योन्याभावस्य कारणत्वं संभवति। परिशेषात् प्रागभावादिषु त्रिषु कस्य कारणत्वं ब्रवीषि ?

न तावत् प्रागभावः कारणं प्रध्वंसे व्यभिचारात्, त च प्रध्वंसः प्रागभावे व्यभिचारात्।

अत्रायं भावः—यत्र मणिः वह्नौ न संयुक्तः, मन्त्रो वा न प्रयुक्तस्तत्र मणेर्मन्त्रस्यवा प्रागभावसत्त्वात् वह्निना दाहः। एवं यत्र सम्बद्धोऽपि मणिः कदाचित् यदृच्छया कारणान्तरोपनिपातवशेन वा ध्वस्तश्चेत् मन्त्रप्रयोगश्चोपरतः तत्र प्रतिबन्धकध्वंसात् वह्निना दाहः। इत्थं यत्र स्थलविशेषे मण्यादि प्रतिबन्धकसंसर्गस्य अत्यन्ताभावः। तत्र संसर्गाभावात् वह्निना दाहः इति तत्तत्स्थलानुरोधेन एषां त्रयाणामभावानां कारणत्वे वक्तव्ये सति प्रागभावात् यत्र कार्यं तत्र प्रध्वंससंसर्गाभावयो व्यभिचारः, प्रध्वंसस्थले प्रागभाव-, संसर्गाभावयोः, संसर्गाभावस्थले प्रागभावप्रध्वंसयोश्च व्यभिचार इति। न वा समुच्चयेन एषां त्रयाणां कारणत्वम्, असंभवात्। नापि विकल्पेन अनियत-हेतुकत्वापातात्। अतो नाभावस्य करणत्वं युक्तम्।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

अपि च मन्त्रप्रयोगस्थले मणिरूपप्रतिबन्धकाभावे सत्यपि दाहकार्यं न जायते। एवं मणिरूपप्रतिबन्धकस्थले मन्त्रादिप्रतिबन्धविरहेऽपि कार्यं न जायत इत्यन्वयव्यभिचारः।

तथा मणिरूपप्रतिबन्धककाले मन्त्रादिरूपोत्तेजकसत्त्वे प्रतिबन्धकाभावरूप्रकारणविरहेऽपि दाहकार्यजननात् व्यतिरेकव्यभिचारः। एवमन्वयव्यतिरेकव्यभिचारद्वयप्रदर्शनेन प्रतिबन्धकाभावस्य कारणतानियामकस्य अन्वयव्यतिरेकानुविधानस्यासंभवात् कारणत्वं न संगच्छते।

यदि उत्तेजकाभावविशिष्टमण्यादिप्रतिबन्धकाभावस्यैव कार्यहेतुत्वं, उत्तेजककाले तदभावविशिष्टप्रतिबन्धकाभावसत्त्वात् न व्यतिरेकव्यभिचार इति प्रतिपाद्यते, तदा संयोगेन द्रव्यस्याव्याप्यवृत्तितया मणिसत्त्वेऽपि किञ्चिदवच्छेदेन मण्यभावसत्त्वात् दाहापत्तिः।

एवं मन्त्ररूपोत्तेजकदशायामपि उत्तेजकस्य मन्त्रस्य (शब्दरूपत्वात्) गगनगतत्वेन वह्निदेशेऽसंभवेन उत्तेजकाभावविशिष्टमणिसत्त्वेन दाहानापत्तिः।

किं च किं नाम प्रतिबन्धकत्वम्? न तावत् कारणीभूताभावप्रतियोगित्वं, दाहकारणीभूतस्य वह्निरूपस्य वह्न्यभावस्य प्रतियोगिनि वह्न्यभावेऽतिव्याप्तेः। तस्यापि प्रतिबन्धकत्वापत्तेः। न चेदमिष्टं कारणसत्त्वे कार्यानुत्पत्तिप्रयोजकस्यैव प्रतिबन्धकत्वव्यवहारात्।

कारणाभावे प्रतिबन्धकताव्यवहाराभावात् च। एवं घटस्यापि कारणीभूतस्वप्रागभावप्रतियोगित्वेन स्वोत्पत्तिं प्रति स्वस्य प्रतिबन्धकत्वापत्तिः। न चेष्टापत्तिः कार्यकालवृत्तितयैव प्रतिबन्धकाभावस्य कारणतास्वीकारात्।

इतोऽपि न प्रतिबन्धकाभावः कारणं, कारणीभूताभावप्रतियोगित्वस्य प्रतिबन्धकत्वात् प्रतिबन्धकत्वेऽवगते सति तदभावस्य कारणत्वावगतिः, प्रतिबन्धकाभावस्य कारणत्वावगमे सति तत्प्रतियोगिनः प्रतिबन्धकत्वावगमं इत्यन्योन्याश्रयापत्तेः। किन्तु कार्यानुकूलधर्मविघटकत्वमेव प्रतिबन्धकत्वं, मण्यादीनां दाहानुकूलशक्तिविघटकत्वादेव तत्समवधानकाले वह्निना दाहो न जायते। अतो दाहानुगुणा काचिदनुग्राहिका शक्तिर्वह्नेरुन्नीयते। सा च तृणारणिमणिषु एकैव। तत्कार्यवह्नौ वैजात्यानुपलम्भात्। तृणारणिमणीनां विलक्षणत्वेऽपि (प्रत्यक्षभूत) तत्कार्यवह्नौ वैजात्यादर्शनात् त्रिषु एकजातीया शक्तिः। अतो नानियतहेतुकत्वनिमित्तव्यभिचारः।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

अभावस्य कारणत्वे शङ्कितदोषनिरासः

अभावस्य कुतः कारणत्वं नास्ति ? तत्र किमपि प्रमाणमस्ति ? येन कारणत्वं निषिद्धयते ? तस्य तुच्छत्वादिति चेत्–न। विधिरूपेण अभावस्य तुच्छत्वेऽपि स्वरूपेण सत्त्वात्। अन्यथा स्वरूपेण (विधिरूपेण) सतो भावस्यापि निषेधरूपेणासत्त्वात् तस्यापि तुच्छत्वप्रसङ्गः। अथ कारणत्वस्य भावत्वेन व्याप्तत्वात् (तन्निवृत्तौ) अभावे भावत्वनिवृत्तौ कारणत्वमपि निवर्तत इति चेत्–न। कारणत्वस्य अभावत्वेन व्याप्तत्वात् भावे अभावत्वनिवृत्तौ कारणत्वमपि निवर्तत इति विपरीतस्यापि वक्तुं शक्यत्वात्। कारणत्वनिश्चयहेतोरन्वयव्यतिरेकानुविधानस्य भाववत् अभावेऽपि तुल्यत्वात् तत्तात्स्थानुरोधेन भाव इव अभावोऽपि जनकः। अथ आकाशादिवत् अभावस्य अवर्जनीयतया सन्निधिः न तु हेतुत्वेन इसि चेत्–तुल्यम्। यद्यपि आकाशादिवत् अभावस्य नित्यत्वविभुत्वाभावात् न-अवर्जनीयतया सन्निधिः, तथापि अवर्जनीयत्वे भावस्यापि तत्तुल्यम्।

नन्वभावस्तु कार्यविरोधिनं स्वप्रतियोगिनमुत्सारयन् सन्निधत्ते न तु-कार्यार्थमित्यन्यथासिद्धिरिति चेत्-तर्हि भावोऽपि कार्यविरोधिनं स्वाभावमुत्सारयन् सन्निधत्ते इति तत्राप्यन्यथासिद्धिस्तुल्या।

अथ भावस्याभावाभावात्मकत्वेन न स्वरूपव्यतिरिक्तमभावोत्सारणं नाम किञ्चिदस्ति कार्यं, तेन कार्यप्रयुक्त एव भावसन्निधिरिति चेत् तर्हि अभाव स्यापि भावाभावात्मकत्वेन न स्वव्यतिरेकेण भावोत्सारणं नाम कार्यमस्ति। तस्मात् यथा भावस्यैव भावो जनक इति नियमोऽनुपपन्नः, तथा भाव एव जनको नाभाव इत्यपि न।

अत एव—

'भावो यथा तथाभावः कारणं कार्यवन्मतः'।

इत्युदयनाचार्यपादैरुक्तम्।

एवमभावस्य कारणत्वसिद्धया प्रतिबन्धकाभावस्य हेतुत्वमक्षतमेव। तादृशप्रतिबन्धकाभावरुपसामग्री विघटनेन मण्यादेर्दाहप्रतिबन्धकत्वस्य अन्यथासिद्धत्वात् न शक्तिकल्पनाया अवसरः।

यदुक्तं—अभावस्य हेतुत्वाभ्युपगमे प्रागभाव-प्रध्वंसादिविकल्पेनानियतहेतुकत्वापत्तिः तथा च व्यभिचार इति। तदपि न। यस्मिन् केवलप्रति-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

बन्धके सति संसर्गिणि कार्यं न जायते तस्मिन्नसति असंसर्गिणि जायत इत्यभ्युपगमे संसर्गाभाव एक एव कारणं प्रागभावादयस्तु तद्विशेषा इति नानियतहेतुकत्वम् ।

ननु संसर्गाभावः कारणमित्युक्तेऽपि संसर्गप्राक् प्रध्वंसादिविकल्पेनानियतहेतुकत्वं, तत्रापि संसर्गाभावस्वीकारेऽनवस्थेति चेन्न । न ह्यत्र संसर्गस्याभावः कारणं, यतो विकल्प्येत, किन्तु संसृज्यमानस्य मन्त्रादेः । नहि संसर्गः प्रतिबन्धकः संसृज्यमानस्यैव मन्त्रादेः प्रतिबन्धकत्वात् ।

एवं सत्यपि अभावेषु जातेरभावात् कथं त्रयाणामुपग्रहः स्यात्, अनुपगृहीतानां च कथं कारणत्वावधारणमिति चेत्-जातिं विनाऽप्येकोपाध्युपगृहीतानां त्रयाणां कारणत्वं शक्यावधारणमेव । अत्रोपाधिश्च संसर्गितापन्नप्रतियोगिनीप्रूयत्वमित्याशयः ।

अन्वयव्यतिरेकव्यभिचारपरिहारः

प्रतिबन्धकाभावस्य कारणत्वं अन्वय-व्यतिरेकव्यभिचाराभ्यां न संभवतीति यदुक्तं-तदपि न । प्रतिबन्धकान्तरासमानाधिकरणप्रतिबन्धकाभावस्यैव हेतुत्वात् मणिरूपप्रतिबन्धकसत्त्वे विद्यमाने मन्त्रादिप्रतिबन्धकान्तरस्याभावः मणिरूपप्रतिबन्धकसमानाधिकरण एवेति तत्र प्रतिबन्धकान्तरासमानाधिकरणप्रतिबन्धकाभावो नास्तीति नान्वयव्यभिचारः । मणिसत्त्वे उत्तेजकसत्त्वे च मण्यभावरूपप्रतिबन्धकाय विरहेऽपि दाहोदयात् व्यतिरेकव्यभिचार इति यत् तदपि उत्तेजकाभावविशिष्टप्रतिबन्धकाभावस्य हेतुत्वाभ्युपगमात् परिहृतं, उत्तेजकसत्त्वे उत्तेजकाभावविशिष्टप्रतिबन्धकस्याभावात् (विशेषणाभावप्रयुक्तविशिष्टाभावस्य तत्र सत्त्वात्) दाहो जायते इति ।

एवं परिष्कारकरणेऽपि संयोगेन द्रव्यस्याव्याप्यवृत्तितया मणिसत्त्वेऽपि पार्श्वान्तरावच्छेदेन तदभावस्यापि विद्यमानत्वात्, मन्त्रस्यापि शब्दरूपत्वात् गगनवृत्तिनया वह्निदेशऽसत्त्वात् विशेष्याभावयुक्तविशिष्टाभावस्य निरुक्तस्थलद्वये विद्यमानत्वात् तत्र कारणसत्त्वेऽपि कार्यानुत्पत्त्या अन्वयव्यभिचारो दुष्परिहार एवेति चेत् । अत्रोच्यते—अभावीयविशेषणतासंबन्धेन दाहत्वावच्छिन्नंप्रति उद्देश्यतादैशिकविशेषणतान्यतरसंबन्धावच्छिन्नप्रतियोगिताकतत्तदुत्तेजकाभाव[1]विशिष्टदैशिकविशेषणतोद्देश्यत्वान्यतरसम्बन्धावच्छिन्न-

(१) वैशिष्ट्यं च सामानाधिकरण्यसंबन्धेन ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

प्रतियोगिताकाभावस्य अभावीयविशेषणतासम्बन्धेन हेतुत्वमिति। अङ्गीकारे संयोगस्याव्याप्यवृत्तित्वेऽपि दैशिकविशेषणतायाः भावाभावसाधारणतया व्याप्यवृत्तित्वात् तेन संबन्धेन मणिसत्त्वे तत्संबन्धावच्छिन्नप्रतियोगिताकमण्यभावो न संभवति, एवं मन्त्रस्य समवायेन वह्न्यवृत्तित्वेऽपि उद्देश्यतासंबन्धेन वह्निवृत्तित्वसंभवात् तेन संबन्धेन वह्निवृत्तित्वे सति तत्संबन्धावच्छिन्न(उद्देश्यतासंबन्धावच्छिन्न)-प्रतियोगिताकमन्त्राभावो न संभवति। अतो मणिसत्त्वे मन्त्रसत्त्वे च निरुक्तसंबन्धविशेषावच्छिन्नविशेष्याभावस्याभावात् विशिष्टाभावरूपकारणविरहात् न दाह इति न व्यभिचारग्रन्थोऽपीति। प्रतिबन्धकत्वस्य कारणीभूताभावप्रतियोगित्वरूपत्वे वह्निस्वरूपवह्न्यभावाभावप्रतियोगित्वात् वह्न्यभावस्य दाहप्रतिबन्धकत्वापत्तिः, एवं घटस्यापि स्वकारणीभूतस्वप्रागभावप्रतियोगित्वात् स्वोत्पत्ति प्रति प्रतिबन्धकत्वापत्तिरिति यदापत्तिद्वयं तत्रेत्थं परिह्रियते। तादात्म्यातिरिक्तसंबन्धावच्छिन्नकारणताश्रय**भावभिन्नात्यन्ताभाव**प्रतियोगित्वं प्रतिबन्धकत्वमिति परिष्कारे कृते सति वह्निस्वरूपाभावस्य भावरूपत्वात् भावभिन्नत्वाभावात् न तमादाय वह्न्यभावेऽतिव्याप्तिः, **अत्यन्ताभावेति** विशेषणात् घटादिप्रागभावो न ग्रहीतुं शक्यत इति तत्प्रतियोगिनि घटादौ न स्वं प्रति स्वस्य प्रतिबन्धकत्वापत्तिः। घटाद्यत्यन्ताभावस्य विषयविधया स्वप्रत्यक्षे कारणत्वात् तत्प्रतियोगिनो घटादेः स्वाभावप्रत्यक्षे प्रतिबन्धकत्वापत्तिरपि कारणतायां तादात्म्यातिरिक्तसंबन्धावच्छिन्नत्वानिवेशात् निरस्ता। स्वप्रत्यक्षे विषयस्य स्वस्य तादात्म्यसम्बन्धेनैव हेतुत्वात् घटात्यन्ताभावनिष्ठकारणतायास्तादात्म्यसंबन्धावच्छिन्नत्वात् [तादात्म्यतिरिक्तसंबन्धावच्छिन्नत्वाभावात्]

अन्योन्याश्रयपरिहारः

अथ प्रतिबन्धकाभावस्य कारणत्वावगमे सति तत्प्रतियोगिनः प्रतिबन्धकत्वावगमः, प्रतिबन्धकत्वावगमे सति तदभावस्य कारणत्वावगम इत्यन्योन्याश्रय इति प्रसङ्गोऽपि दुर्बल एव। प्रतिबन्धकाभावस्य कारणत्वागमः न तत्प्रतियोगिनः प्रतिबन्धकत्वावगमसापेक्षः किन्तु अन्वय-व्यतिरेकाभ्यां, अन्वय-व्यतिरेकौ च प्रत्यक्षादिप्रमाणान्तरेण अवगम्येते। अतः कारणत्वावगमो न प्रतिबन्धकत्वावगतिसापेक्ष इति नान्योन्याश्रयदोषावकाशः।

अपि च कार्यानुकूलशक्ति(धर्म)विघटकत्वमेव प्रतिबन्धकत्वमिति पक्षे अनुमितिं प्रति बाधसत्प्रतिपक्षयोः प्रतिबन्धकत्वं न स्यात्। परामर्शनाशानन्तरं

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

यत्र लौकिकप्रत्यक्षबाधनिश्चयः त त्र बाधोत्पत्तिद्वितीयक्षणे बाधेन परामर्शनिष्ठानुमित्युत्पादनशक्तिनाशात् बाधोत्पत्तितृतीयक्षणे अनुमितिप्रतिबन्धः (अनुत्पाद) इति वक्तव्यं तच्च न संभवति बाधोत्पत्तिद्वितीयक्षणे परामर्शस्यैवाभावात् कारणाभावादेव बाधोत्पत्तितृतीयक्षणे अनुमितिर्नोत्पद्यत इति वक्तुं शक्यत्वात्। अस्माकं पक्षे कारणीभूतबाधनिश्चयाभावप्रतियोगिनो बाधनिश्चयस्य बाधोत्पत्तिद्वितीयक्षणे सत्त्वात् (प्रतिबन्धकसत्त्वात्)तत्तृ तीयक्षणे अनुमितिरिति वक्तुं शक्यते। अतः कारणीभूताभावप्रतियोगित्वमेव प्रतिबन्धकत्वम्। प्रतिबन्धकाभावरूपकारणविरहादेव मण्यादिसमवहितस्थले दाहानुत्पत्तेरन्यथासिद्धत्वात् न शक्तिकल्पना युक्ता।

वह्नयादिषु सहजशक्तिनिरासः

अपि च शक्तिरपि दुर्घटैव। सा किं नित्या जन्या वा ? न नित्या, अनित्यवह्न्यादौ जातिभिन्ननित्यधर्मायोगात्। किं च सा यदि सर्ववह्निवृत्तिरेका, तदा क्वचित्प्रतिबन्धे वह्न्यन्तरे दाहो न स्यात् शक्तेरेकत्वात्। प्रतिव्यक्तिशक्तिभेदाङ्गीकारे शक्त्यानन्त्यम्। नित्यत्वे शक्तिमति नष्टे शक्तेरवस्थानं न संभवति। नापि जन्या-शक्ति प्रति वह्नेः कारणत्वात् तन्नियामकत्वेन शक्त्यापत्त्यानवस्थापत्तेः। अथ शक्त्यन्तरं विना वह्नेः स्वरूपेणैव शक्तौ हेतुता, तर्हि दाहेऽपि स्वरूपेणैव हेतुत्वमस्तु किं शक्तिमत्त्वेन ? अपि च मणिसत्त्वेऽपि वह्नेर्दाहः स्यात् शक्तिमतो वह्नेस्सत्त्वात्। मणिना प्रतिबन्धात् तदानीं न दाह इति चेत्, किं प्रतिबन्धकेन मणिना शक्तिः नाश्यते उत धर्मान्तरं जन्यते ? विपरीतधर्मान्तरजनने तादृशधर्मान्तराभावे सत्येव दाहरूपकार्यं उत्पद्यत इत्यभावस्य कारणत्वस्वीकारः। तथा च विपरीतधर्मान्तरं दाहप्रतिबन्धकं, तादृशधर्मान्तराभावो दाहकारणमिति प्रतिबन्धकाभावस्यैव कारणत्वस्वीकारेण अस्मन्मतप्रवेशो जातः। यदि मणिना प्रपिबन्धकेन न विपरोतधर्मान्तरं जन्यते किन्तु दाहशक्तिरेव नाश्यत इत्युच्येत तदा उत्तेजकसमवधाने सति दाहानुत्पादप्रसङ्गः शक्तेर्नष्टत्वात्।

अथ उत्तेजकसमवधाने पुनरुत्ते जकेन शक्तिरुत्पद्यत इति चेत् तदानियतहेतुकत्वापत्त्या मिथो व्यभिचारप्रसङ्गः। दाहरूपैककार्यं प्रति मण्यादिप्रतिबन्धकासमवधानस्थले वह्निस्वरूपमात्रस्य, प्रतिबन्धकसमवहितस्थले उत्ते जकस्य च हेतुत्वस्वीकारात्। अथ स्वरूपोत्पादकोत्तम्भकयोरेकशक्तिमत्त्वेन कारणत्वाभ्युपगमे नायं दोष इति चेन्न। विजातीययोस्तयोरेकशक्ति-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

निषेधात् । अत एव विजातीयानां तृणारणिमणीनां वह्निरूपसामान्यं प्रति हेतुत्वं निषिद्ध्यते । एवं तावत् न सहजा शक्तिः ।

व्रीह्यादिषु आधेयशक्तिनिरासः

नाप्याधेया-'व्रीहीन् प्रोक्षति' इत्यादिषु व्रीह्याद्युद्देशेन प्रयुज्यमानः प्रोक्षणादिः पुरुषमेव संस्कुरुते, न व्रीह्यादिकम् । यथा देवताविशेषोद्देशेन अग्नौ प्रयुक्तास्समन्त्रा हविराहुतयः पुरुषमेव संस्कुर्वते न वह्निं नापि देवताः, तथा प्रोक्षणादिः पुरुष एव अतिशयमुत्पादयति न व्रीह्यादौ ।

ननु व्रीह्यादिषु प्रोक्षणादिना किञ्चित्फलं नोत्पद्यते चेत् व्रीह्यादीनां क्रियाजन्यफलशालित्वाभावात् तेषु प्रोक्षणादिकर्मत्वमनुपपन्नं स्यात् । अतो व्रीह्यादिवृत्तितया किञ्चिदपूर्वं प्रोक्षणादिजन्यम् अवश्यमभ्युपगन्तव्यमिति चेत्-न । जलसंयोगरूपफलवत्त्वेनैव कर्मत्वोपपत्तेः । न च जलसंयोगस्य प्रोक्षणान्तर्गतत्वात् न प्रोक्षणफलत्वमिति वाच्यम् । ग्रामं गच्छतीत्यत्रापि ग्रामस्य कर्मत्वं न स्यात्, यथाऽत्र संयोगस्य प्रोक्षणान्तर्गते न तत्फलत्वं, एवं ग्रामस्य गमनावच्छेदकत्वात् । [न कर्मत्वं स्यात्]

ननु गमनस्य पादविहारात्मकत्वात् ग्रामसंयोगस्म न गमनात्मकत्वं, किंतु तत्फलत्वमेव । जलसंयोगस्य तु प्रोक्षणान्तर्गतत्वमावश्यकं, अन्यथा कृतेऽपि जलप्रक्षेपे ब्रीहिसंयोगाभावे प्रोक्षणं न जातमिति व्यवहारायोगात् । तस्मात् संयोगस्य प्रोक्षणान्तर्गतत्वात् न फलत्वमिति शक्तिरेव कल्प्येति चेन्न । शिलां प्रोक्षतीत्यन्यत्रापि संयोगस्याफलत्वेन शक्तिकल्पनापत्तेः । तस्मात् प्रक्षणे कृतेऽपि संयोगरूपफलाभावादेव प्रोक्षणं न जातमिति व्यवहारः ।

किं च ब्रीहिषु प्रतिव्यक्ति शक्तयः कल्प्यन्ते ? अथवा अनेकब्रीहिवृत्तितया (व्यासंज्यवृत्तिः) एका वा ? प्रथमपक्षो न युक्तः गौरवात् (अनेकशक्तिकल्पनापत्तेः) न द्वितीयः—व्यासज्यवृत्तिजन्य धर्मस्य द्वित्वादेः किञ्चिदाश्रयनाशनाश्यत्वनियमात् कतिपयब्रीहिनाशे तन्निष्ठशक्तेरपि नाशात् इतरेषां यागोपयोगो न स्यात् अतो न ब्रीहनादिषु काचनाधेयाशक्ति सिद्ध्यति ।

पदशक्तिनिरासः

घटादिपदार्थबोधकपदपदार्थसम्बन्धरूपा शक्तिरपि नेश्वरेच्छातिरिक्ता । तथैव निर्वाहात् अस्मात् पदात् अयमर्थो बोद्धव्यः अथवा इदं पदमेतदर्थे शक्तमित्याकारिका वेश्वरेच्छैव पदपदार्थ सम्बन्धत्वेनोपेयत इति न तदातिरिक्ता

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

पदशक्तिरङ्गीक्रियते। एवं च क्लृप्तपदार्थेष्वेव अन्तर्भूता, नातिरिक्ता शक्तिस्सिद्ध्यति।

व्रीह्यादिद्रव्यवृत्तितया आधेयशक्तिसमर्थनम्

व्रीहीन् प्रोक्षतीत्यत्र प्रोक्षणादिना आत्मनिष्ठमेवादृष्टं जायत इति यदुक्तं तन्न समीचीनं (तथा सति द्वितीयाश्रुतिबाधापत्तिः) कर्मणि द्वितीयेत्यनुशासनेन कर्मत्वार्थे द्वितीयाविधानात् कर्मत्वस्य क्रियाजन्यफलशालित्वरूपत्वात् प्रोक्षणजन्यादृष्टरूपफलं व्रीहिषु यदि न स्यात् तदा व्रीहीन् इति द्वितीयाश्रुतिबाधः। अपि च फलसाधनयोः सामानाधिकरण्यनियमोऽपि भज्येत, प्रोक्षणात्मकसाधनस्य व्रीहिनिष्ठत्वं, तज्जन्याद्दृष्टस्यात्मनिष्ठत्वमिति वैयधिकरण्यात्।

किं च व्रीहीन् प्रोक्षतीति वाक्येन व्रीह्यादीनामदृष्टाश्रयत्वादृते तन्मात्रबोधने एतद्वाक्यवैयर्थ्यापत्तिः।

यदाग्नेयोऽष्टाकपाल इत्यादिवाक्यैः पुरोडाशस्य यागसाधनत्वे बुद्धे तत्प्रकृति भूतद्रव्यापेक्षा 'व्रीहिभिर्यजेत' इत्यनेन निवर्त्यते तेनात्र यागीयव्रीहिःत्वेनोद्देश्यता, न तु व्रीहित्वमात्रेण, लौकिकव्रीहिषु वैयर्थ्यात्। अतो वह्निद्वारा प्रोक्षणस्य यागार्थत्वात् जलसंयोगस्य च जलशोषे नाशेन कालान्तरभावियागार्थत्वासंभवात् अवश्यमदृष्टमभ्युपगन्तव्यम्। तस्य चादृष्टस्य व्रीहिवृत्तितयाभ्युपगमे तदाश्रयकतिपयव्रीहिनाशे नाशप्रसङ्ग इति यदुक्तं तदपि न। पेषणेन सर्वव्रीहिनाशेऽपि यथा न नाशः तथात्रापि अपूर्वसाधनत्वस्य संस्कारान्तरेणानपायात्। अतो व्रीहतादिषु निरुक्तरीत्या आधेयशक्तिरवश्यमभ्युपगन्तव्या।

घटादिपदेषु अर्थबोधकशक्तिनिरूपणम्

ईश्वरेच्छैव पदशक्तिरिति पक्षोऽपि न साधीयान्, ईश्वरेच्छाया ईश्वरनिष्ठत्वात् इच्छायाः कुत्रापि संवन्धत्वादर्शनात् पदपदार्थवृत्तिवाच्यवाचकभावरूपाशक्ति रवश्यमभ्युपगन्तव्यानुभवस्वारस्यात् च।

सहजशक्ति समर्थनम्

यदुक्तं—मण्यादि समवधानकाले दाहादि कार्याभावः प्रतिबन्धकाभावरूपसामग्रीविरहप्रयुक्तो न तु दाहशक्तिप्रतिबन्धादिति—तत्रेदं विचार्यते। किं प्रतिबन्धाकाभावः स्वतन्त्रकारमथवा प्रतिबन्धकाभावविशिष्टवह्निः कारणं तत्र प्रतिबन्धकाभावोऽवच्छेदक इति।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

घटं प्रति दण्डचक्रयोर्यथा स्वतन्त्रकारणत्वं विनिगमनाविरहात् दण्डस्य न चक्रावच्छेदकत्वं, चक्रस्य वा न दण्डावच्छेदकत्वं, एवं वह्निप्रतिबन्धकाभावयोर्दाहं प्रति स्वतन्त्रकारणत्वमेव अन्यथा प्रतिबन्धकाभाव एव कारणं वह्निरेवावच्छेदकः किं न स्यात् ?

ननु दण्डचक्रयोर्घटं प्रति प्रत्येकं नियतपूर्ववृत्तित्वेन स्वतन्त्रकारणत्वस्य क्लृप्तत्वेन तत्र तुल्यबालयोस्तयोः कतरस्यावच्छेदकत्वं कतरस्य हेतुत्वमिति शङ्काया नावकाशः। अत्र तु प्रतिबन्धकाभावस्य विनिगमनाविरहात् कारणत्वं, कारणत्वाच्च विनिगमनाविरह इत्यन्योन्याश्रयदोषापत्त्या न कारणत्वं सिद्ध्येत्।

अथ प्रतिबन्धकाभावस्यापि दाहं प्रति नियतपूर्ववृत्तित्वादेव कारणता, न तु विनिगममनाविरहात् येनान्योन्याश्रयदोषस्स्यादिति चेत्—तदप्यसिद्धम्—

तथाहि मणिरूपप्रतिबन्धकस्तु दाहप्रागभावस्याग्रिमसमयसम्बन्धे हेतुः न तु दाहानुत्पादं प्रति। अनुत्पादस्य प्रागभावरूपस्यानादित्वेनाजन्यत्वात्। तथा दाहप्रागभावस्याग्रिमसमयसम्बन्धाभावं प्रति मण्यभावस्य हेतुत्वेनान्यथा सिद्धत्वान्न दाहे मण्यभावः कारणम्। इत्थं च मण्यादिप्रतिबन्धका भावस्य दाहादिकं प्रति कारणत्वनिरासात् कारणीभूताभावप्रतियोगित्वरूपप्रतिबन्धकत्वस्य मण्यादावनुपपन्नत्वात् कार्यानुकूलशक्ति[1] विघटकत्वरूपं[2] प्रतिबन्धकत्वमेवाभ्युपगन्तव्यम्।

---

१. वह्नेर्मणिना दाह शक्तिः नाश्यते, उत्तेजकेन मण्याद्यपसारणेन वा पुनर्जन्यत इत्यङ्गीकारेऽनन्तशक्तिकल्पनापत्तिरेतन्मते। प्रतिबन्धकाभावस्य कारणत्वमतेऽपि मण्यभावस्य कारणत्वं, कुत्रचित् उत्तेजकस्येति। अथवा उत्तेजका भावविशिष्टमण्यभावस्य कारणत्वं वाच्यं, तथासति विशेष्यविशेषणभावविनिगमनाविरहेणानन्तकार्यकारणभावकल्पनापत्तिः, अपि च मन्त्रौषधादीनामुत्तेजकातामनन्तत्वात् विशिष्टाभावकूटस्यहेतुत्वे चाति गौरवम्। अतोऽस्मत्पक्ष एव श्रेयान् इति।

२. मणिना शक्तेः प्रतिबन्धो नाम शक्त्यभिभव एव। अभिभवश्चोद्भवाभावः। उद्भवश्च कार्याभिमुखं स्वरूपमेव। आभिमुख्यं च प्रागभावस्याग्रिमसमय सम्बन्धाभावः। मणिना च स्वशक्त्या दाहप्रागभावाग्रिमसमयसम्बन्धो जन्यते। स एव प्रतिबन्धः।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

अत्रेदमवधेयम्—शक्तिसिद्धौ लाघवमपि गमकं भवति तथा हि कार्यनिष्ठवैजात्यानुपलम्भेऽपि तृणारणिमणीनां कारणानां विलक्षणत्वात् कार्यवैजात्यमवश्यंभावीत्यभ्युपेत्य त्रयाणां पृथक् कारणत्वं कल्प्यते, अथवा वह्नेर्वैलक्षण्यादर्शनात् एकजातीयत्वमङ्गीकृत्य तं प्रति तृणारणिमणीनां अन्यतमत्वेन कारणत्वमभ्युपेयत इति, पक्षद्वयेऽपि गौरमपरिहार्यं, अन्यतमत्वं च तद्भिन्नभिन्नत्वं, तथा च अनन्तभेदकूटनिवेशात् गौरवं, त्रयाणां पृथक् कारणत्वपक्षे कारणतात्रयं कल्पनीयमिति गौरवम्। अतस्तदपेक्षया एकशक्तिमत्त्वेन त्रयाणां कारणत्वे महल्लाघवम्। अपि च योग्यवृत्तिजातेरुपलम्भोऽवश्यं भावी यथा विजातीयघट पटादिद्रव्यगत घटत्व-पटत्वादिजातेरुपलम्भः, तथैव वह्नेः प्रत्यक्षयोग्यत्वात् तत्र वैजात्ये सति तदुपलम्भोऽपि स्यात् तथानुपलम्भात् एकजातीयत्वमङ्गीकृत्य तृणारणिमणीनामेकशक्तिमत्त्वेन कारणत्वे लाघवम्। अत एव व्रीहियवयोः विकल्पस्संगच्छते। अन्यथा साधनद्रव्यभेदेन वह्निवत् यागेऽपि वैजात्यापत्तेः, भिन्नयागार्थत्वे चैकार्थत्वाभावेन विकल्पायोगात्। अत एकशक्तिमत्त्वेन कारणत्वमवश्यं स्वीकर्तव्यम्।

शक्तेरतिरिक्तपदार्थत्वम्

शक्तिः न द्रव्यादित्रिकान्यतमरूपा[1] गुणादिवृत्तित्वात्। नापि सामान्याद्यन्यतमरूपा[2] उत्पत्तिमत्त्वे सति विनाशित्वात्। अतः परिशेषात् इयं शक्तिः द्रव्यादिपदार्थातिरिक्तैवेति सिद्ध्यति।

रीडर, मीमांसा-धर्मशास्त्रविभागः, संस्कृतविद्याधर्मविज्ञानसंकायः
काशीहिन्दूविश्वविद्यालयः, वाराणसी ५

---

१. शक्तेः गुणादिवृत्तित्वं 'वायव्यं श्वेतमालभेत' इत्यादिषु श्वैत्यादि गुणानां भूत्यादिफलसाधनत्वावगमात् यागादीनां स्वर्गादि फलसाधनत्वावबोधाच्च।

२. शक्तेर्नित्यत्वपक्षे उद्भवाभिभवशालित्वादिति हेतुर्विभावनीयः।

शक्तिश्शक्ता न वा? आद्ये शक्तिनिष्ठशक्तावपि कार्यप्रयोजकता निर्वाहाय शक्त्यन्तरमभ्युपगन्तव्यं, एवं तस्या अपि तथेत्यनवस्था। द्वितीये च तस्या दाहकारणत्वमेव न स्यात् अशक्तत्वादित्युभयथा न शक्तिस्सिद्ध्यतीत्येतदपि निरस्तम्—उष्णस्पर्श उष्णस्पर्शाश्रयो न वा? पूर्वत्रानवस्था।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

पीयूषधाराटीकाया व्यापकत्वम्

कामेश्वर उपाध्यायः

पीयूषधारायाः परिचयः

'पीयूषधारा' 'मुहूर्त्तचिन्तामणे'रतिद्वयी व्याख्या विद्यते। ज्यौतिषशास्त्रस्य मुहूर्त्तस्कन्धे व्याख्याग्रन्थानां संख्याल्पीयसी विद्यते। तेषु व्याख्याग्रन्थेषु पीयूषधारा चूडान्तशायिनी रचना तिष्ठति। अस्ति मुहूर्त्तशास्त्रे 'मुहूर्त्तचिन्तामणिः' प्रथिताभिधानो ग्रन्थः। सर्वैरपि गणकैरस्य ग्रन्थस्य महत्त्वं स्वीक्रियते। ग्रन्थेऽस्मिन् त्रयोदशप्रकरणानि सन्ति। तानीमानि— १- शुभाशुभप्रकरणम् २- नक्षत्रप्रकरणम् ३- सङ्क्रान्तिप्रकरणम् ४- गोचरप्रकरणम् ५- संस्कारप्रकरणम् ६- विवाहप्रकरणम् ७- वधूप्रवेशप्रकरणम् ८- द्विरागमनप्रकरणम् ९- अग्न्याधानप्रकरणम् १०- राजाभिषेकप्रकरणम् ११- यात्राप्रकरणम् १२- वास्तुप्रकरणम् १३- गृहप्रवेशप्रकरणम्।

ग्रन्थस्यास्य महत्त्वमनेनैव ज्ञातुं शक्यते यदयं सर्वेषु विद्यानिकेतनेषु ज्यौतिषशास्त्रविभागे पाठ्यक्रमे सुयोजितो विद्यते। मुहूर्त्तचिन्तामणेरनेका व्याख्या अनेकैर्विद्वद्वरैः रचिताः सन्ति; परञ्च तासु पीयूषधारा अतीवगभीरा; प्रथिता, विविधशास्त्रवचनैर्लसिता ज्यौतिषजगतीदानीमपि प्रकाशते।

मुहूर्त्तचिन्तामणे रचना १५२२ शकाब्दे रामदैवज्ञेन कृता। रामदैवज्ञस्य पितुर्नाम अनन्तदैवज्ञ आसीत्। अनन्तदैवज्ञस्य द्वौ पुत्रावास्ताम्, प्रथमस्तु नीलकण्ठो द्वितीयश्च रामदैवज्ञः। श्रीमतो नीलकण्ठदैवज्ञस्य पुत्रनाम गोविन्ददैवज्ञ आसीत्। अयमेव पीयूषधाराया रचयिता। इत्थं मुहूर्त्तचिन्तामणेः कर्त्तुः सम्बन्धः पीयूषधाराया कर्त्रा सह सिध्यति। रामदैवज्ञस्य भ्रातुष्पुत्रः गोविन्ददैवज्ञो नन्वासीत्। सरस्वत्याः प्रसादादेकस्मिन्नेवान्वये उभयोः संस्थितिरासीद्। तदत्र प्रस्तौति स्वयमेव प्रमाणं गोविन्दः —

> तस्मात्पद्माख्यपत्न्याविमलमतो वाक्पती दिक्पतीनां
> माशाः कासारजाभस्फुरदधिकयशोरश्मिभिर्व्याप्य भ्रातौ।
> प्राभूतां तौ तनूजौ श्रुतिगणगदिताचारधारापवित्रौ
> ज्येष्ठः श्रीनीलकण्ठस्तदनु गुणगणालंकृतो रामनामा[1]॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

रामदैवज्ञस्य पितामहः 'चिन्तामणिः' नामासीत् । माता चास्य 'पद्मा' प्रसिद्धा । अमुष्य ज्येष्ठभ्राता भगवान् नीलकण्ठ इव पण्डितनीलकण्ठोऽपि मीमांसा-तर्क-ज्यौतिष-व्याकरणप्रभृतिषु शास्त्रेषु लब्धकीर्तिर्बभूव । दिक्षु-विदिक्षु असौ प्रसिद्धः स्वकीयपाण्डित्यबलात् । रामदैवज्ञस्तु मुहूर्त्तशास्त्रे साक्षाद् वसिष्ठावतार आसीत् । भगवतो गणेशः स्यर्चकोऽयं जनश्रुतिरपि प्रमाणयति तथ्यमिदं मुहूर्त्तचिन्तामणेर्भङ्गलमपि । ज्यौतिषगणितेऽप्यस्य महती प्रतिष्ठा श्रूयते परञ्च यथा मुहूर्त्ते न तथा गणिते ।

शर्वपुरे (काश्यां) मुहूर्त्तचिन्तामणेः प्रकाशनमभूत् । प्रमाणमत्र मुहूर्त्तचिन्तामणिरेव विद्यते—

'गिरीशनगरे वरे भुजभुजेषुचन्द्रे मिते (१५२२)
शके विनिरमादिमं खलु मुहूर्त्तचिन्तामणिम् ।'[२]

अस्य ग्रन्थस्य लोकप्रियत्वमवलोक्य चन्द्रिकातनयेन गोविन्देन पीयूष-धारा टीका रचिता । अस्याः पीयूषधाराया रचनाकालः १५२५ शकाब्दो-विद्यते यथा—

शाके तत्वतिथीमिते १५२५ युगगुणाब्दे नीलकण्ठात्मभू-
र्दग्धाब्धिनिखिलार्थयुक्तममलं मौहूर्त्तचिन्तामणिम् ।
काश्यां वाक्यविचारमन्दरनगेनामथ्यलेखप्रियां
गोविन्दो विधिविद्वरोऽतिविमलां पीयूषधारां व्यधात् ।[३]

अस्य वंशवृक्षस्य प्ररोहक्रमः प्रदर्श्यते—

चिन्तामणिः
|
अनन्तदैवज्ञः
|
नीलकण्ठदैवज्ञः — रामदैवज्ञः (मुहूर्त्तचिन्तामणिकारः)
गोविन्ददैवज्ञः (पीयूषधाराकारः)

पीयूषधारा तथा प्रसिद्धा यथा मुहूर्त्तचिन्तामणिः । रामदैवज्ञाद् अनेकेषु स्थलेषु गोविन्दो विशिष्यते पीयूषधारायाम् । विषयेऽस्मिन् यथास्थलं निर्देशयिष्ये । दैवज्ञानां कृते मुहूर्त्तचिन्तामणेः पारायणं यथा पुण्यप्रदं

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

तथैव पीयूषधाराया आलोडनमपि। अतः पीयूषकर्त्ता स्वाभिमतं स्वयमेव व्यनक्ति—

मुहूर्त्तचिन्तामणिदुग्धसिन्धुमामथ्य युक्तिव्रजमन्दरेण।
गोविन्दसञ्ज्ञस्तनुते सुखाय पीयूषधारां भुवि भूसुराणाम् ॥४

पीयूषधारायां प्रमापका आचार्या ग्रन्थाश्च—

ज्यौतिषशास्त्रस्य अनेके सद्ग्रन्था महाकालस्य अन्तर्गर्भे विनष्टा अभूवन्। इदानीं तेषां महर्षेः प्रणीतानां सद्बन्धानां नामापि न ज्ञायते केनापि। कतिपयानामेतादृशानां ग्रन्थानां नामानि पीयूषधारायां सुरक्षितानि भान्ति। आचार्याणाञ्चाप्युल्लेखो विहितो गोविन्देन तथा तेषां वचनानि चोदाहृतानि प्रायशः स्थलेषु। अत्र पीयूषधाराया आलोडनपूर्वकं नामानि संगृहीतान्यस्माभिरिति। कतिपये स्थले भ्रमो भवति यदिदं नाम कस्यचिद् ग्रन्थस्य विद्यते आहोस्विद् आचार्यस्य कस्यचित्। प्रेक्षणीयनामविवरणिकेयम्—

अत्रिः	गुणाकरः	त्रिस्थलीसेतुः	वाल्मीकिः
अमरसिंहः	चण्डेश्वरः	त्रिविक्रमः	बृहस्पतिः
अङ्गिरा	च्यवनः	दीपिका	ब्रह्मवैवर्तपुराणम्
अच्युतभट्टः	छान्दोग्यसूत्रम्	दैवज्ञमनोहरम्	बादरायणः
आपस्तम्बः	जगन्मोहनम्	देवज्ञवल्लभः	ब्रह्मसिद्धान्तः
उत्पलः	ज्योतिःसारसागरम्	देवीपुराणम्	ब्रह्मपुराणम्
उशनाः	ज्योतिर्निबन्धः	दण्डिः	वैद्यनाथः
ऋक्षोच्चयः	ज्योतिःप्रकाशः	दुर्गादित्यः	भूपालवल्लभः
ऋषिपुत्रः	जैमिनिः	दक्षः	भीमपराक्रमः
केशवार्कः	जाबालिः	देवलः	भुजबलः
कालिदासः	जातुकर्ण्यः	नृसिंहः	भारद्वाजः
कश्यपः	ज्योतिश्चिन्तामणिः	निर्णयः	भृगुः
गर्गः	जयार्णवः	नारदः	भामहः
गृह्यपरिशिष्टम्	ज्यौतिषार्णवः	प्रयोगपारिजातः	भट्टकारिका
गरुडपुराणम्	ज्यौतिस्तन्त्रम्	पैठीनसिः	भागुरिः
गौतमः	टोडरानन्दः	प्रेतमञ्जरी	भास्कराचार्यः
गुरुः	डामरसङ्ग्रहः	पुलस्त्यः	भविष्यपुराणम्

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

भविष्योत्तरपुराणम्	लीलावती	विष्णुः	षट्त्रिंशन्मतम्
मुहूर्त्तमार्त्तण्डः	लिङ्गपुराणम्	वामनपुराणम्	सूर्यसिद्धान्तः
महाभाष्यम्	लल्लः	विवाहवृन्दावनम्	सुमन्तुः
महेश्वरः	वृत्तरत्नाकरः	वृद्धवसिष्ठः	संहिताप्रदीपः
मेधातिथिः	व्यवहारचण्डेश्वरः	विश्वप्रकाशपद्धतिः	स्मृतिचन्द्रिका
माधवः	व्यवहारतत्त्वम्	विधिरत्नम्	सारसङ्ग्रहः
मत्स्यपुराणम्	विश्वरूपः	शार्ङ्गीयविवाहपटलम्	स्कन्दपुराणम्
मार्कण्डेयः	वसिष्ठः	शातातपः	सांख्यप्रकाशः
महाभारतम्	विवाहपटलम्	श्रीपतिः	स्मृत्यर्थसारः
मनुः	वराहो वराहमिहिरः	शङ्खः	समरसारः
यमः	वामनः	शिवरहस्यम्	सुरेश्वरः
रत्नमाला	व्यवहारोच्चयः	श्रीधरः	हारीतः
राजमार्त्तण्डः	वायुपुराणम्	शौनकः	हेमाद्रिः
रात्रविजयम्	व्यासः	श्रुतिकीर्तिः	
रत्नकोषः	वात्स्यः	श्रीमानवसंहिता	

पीयूषधारायाः वैशिष्ट्यम्

मुहूर्त्तचिन्तामणेर्मङ्गलश्लोकस्य प्रथमे चरण एवामङ्गलं प्रदर्शयता गोविन्ददैवज्ञेन तत्रैका कोटिः स्थापिता—

गौरीश्रवः केतकपत्रभंगमाकृष्य हस्तेन ददन्मुखाग्रे ।
विघ्नं मुहूर्त्ताकलितद्वितीय दन्तप्ररोहो हरतु द्विपास्यः ॥[५]

"अत्र भङ्गशब्देन पराजयो विवक्षित इत्यश्लीलत्वमिति चेत्, सत्यम्-तत्र हि युद्धप्रस्तावे स्वरूपान्वाख्यानाददोषः। प्रस्तुते ग्रन्थारम्भे प्रकरणमपि नास्त्यतो भंगशब्दपाठोऽनुचितः। तस्माद् 'गौरीश्रवः केतकबालपत्रम्' इति पाठः साधीयान् कल्प्यः। केचिदत्र पाठे बह्वक्षरपरिवर्त्तनभयात् 'गौरीश्रवः केतकपत्रभागम्' इति पठन्ति। तदेतत्सर्वं मत्सररहितैः सूरिभिर्विवेचनीयम् ।"

पीयूषधारायां प्रतिपदं निर्दिष्टं विद्यते यत् कस्मिन्नपि विषये—'देशाचारमनुसृत्य व्यवहारः कर्त्तव्यः।' यत्र कुत्रापि धर्मशास्त्राभिमतम्, तद्विरुद्धमन्तरं वा उत्पद्यते तत्र स्पष्टमेव लिखितं गणकेन—'अत्र दाक्षिणात्या इदमामनन्ति।' बहुषु स्थलेषु गुर्जरप्रदेशस्य चर्चा पीयूषकारेण विहिता।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

विवाहप्रकरणे कर्त्तरीदोषव्याख्यानावसरे राहोर्विषये लिखितम्—'वराह-पद्येऽपि राहुकेत्वोरन्यतराभिधानमस्ति। तथाहि किमिदं चन्द्रग्रहणं राहुसाहित्यकृतमुत केतुसाहित्यकृतमिति। तत्र ग्रहणीयं चन्द्रे लग्नगे सक्रूरे इत्यत्र क्रूरसाहित्यमभिहितम्। —.........अतः सामान्यवाचिनः क्रूरशब्दस्य प्रयोगाद्राहुकेत्वोरन्यतरयोगोऽपि विवक्षितः। अपरस्य सप्तमराशिस्थत्वात्।' अतो माभूदिति मनसि वितर्को यद् वराहेण राहुकेत्वोः फलं कुत्रापि नोक्तम्। यथा—

सोपप्लवे शशांके सक्रूरे लग्नगे कुजेऽष्टमगे।
मात्रा सार्द्धं म्रियते चन्द्रवदर्केण शास्त्रेण॥[६]

मुहूर्त्तचिन्तामणौ धान्यस्थितेः धान्यवृद्धेश्च मुहूर्त्तं प्रतिपादितमाचार्येण। न तत्र स्पष्टं भवति यत्कास्ति धान्यस्थितिः का च धान्यवृद्धिः। धान्यस्थितिरेकत्र राशीकरणं नाम सा निगदिता। धान्यवृद्धिस्तु—'त्वं मह्यं तावद् धान्यं देहि ततोऽहं मासद्वयेन तुभ्यं सपादं सार्धं वा दास्यामि' इत्येवं रूपा सा निगदिता।

प्रेतदाहमुहूर्त्तनिरूपणप्रसङ्गे दीपिकाकारेण यदुक्तम्—

छेदनं सङ्ग्रहं चैव काष्ठादीनां न कारयेत्।
श्रवणादौ बुधः षट्के न गच्छेद् दक्षिणं दिशम्॥[७]

तन्नसमीचीनम्। अस्य मतस्य खण्डनं गोविन्देन सयुक्तिकं कृतम्। अत्र 'श्रवण'-नक्षत्रस्य ग्रहणं सर्वथाविलोमम्। यतो वसिष्ठादिभिर्मुनिभिः नैतद् गृहीतम्। पञ्चकमुहूर्त्ते धनिष्ठानक्षत्रस्य ग्रहणत्वात् श्रवणनक्षत्रं त्याज्यमेव।

बहुभिराचार्यैं प्रथमरजस्वलास्नाने शतताराश्लेषापूर्वात्रयप्रभृतीनि नक्षत्राणि च गृहीतानि परञ्च नेमानि नक्षत्राणि शोभनानि तथापि पीयूषधाराकारेण कथितम्—'इयं च देशाचारतो व्यवस्थानुसन्धेया। शिष्टाचारस्यापि स्मृतिवत्प्रामाण्यात्।'

पुन्नामानि नक्षत्राणि **वसिष्ठानुसारेण** श्रवणम्, पुष्यः, स्वाती, हस्तः, पुनर्वसुः; मूलम्, उत्तराभाद्रपदम्, अनुराधा, मृगशीर्षम्, अश्विनी। ऋक्षोच्चयमतानुसारेण—हस्तः, आर्द्रा, पुष्यः, मूलम्, मृगशीर्षम्, श्रवणम्, पुनर्वसुः, उत्तराभाद्रपदं नक्षत्राणि पुन्नामानि पठितानि सन्ति। अत्र वसिष्ठमतेन यानि नक्षत्राणि सन्ति तानि दाक्षिणात्या व्यवहरन्ति।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

प्राच्यास्तु ऋक्षोच्चयवाक्येन स्वकीयं मुहूर्त्तं साधयन्ति । अतः देशाचारतो विरोधो न संजायते ।

अनेके जानन्ति यत्—'क्षौरं चौलञ्चैकमेव' परञ्च पीयूषधाराकारेणान्तरं प्रदर्श्यते—'वैदिकं मुण्डनं चौलमित्युच्यते । तद्विषयको विधिः । अवैदिकमुण्डनं सुखार्थं यत्क्षौरमुच्यते । क्षुरस्य कर्म क्षौरमिति सामान्यव्युत्पत्तेः । अतस्तद्‌विषयको निशेध इति वयं ब्रूमः ।'

अक्षरारम्भे षष्ठी तिथिः मार्कण्डेयमुनिना निषिद्धा—

प्राप्ते तु पञ्चमे वर्षे ह्यप्रसुप्ते जनार्दने ।
षष्ठीं प्रतिपदं चैव वर्जयित्वा तथाष्टमीम् ॥[८]

श्रीधरेणापि प्रयोगपारिजाते षष्ठी वर्जिता—

पक्षे पूर्णनिशाकरे प्रतिपदं रिक्तां विहायाष्टमीम् ।
षष्ठीमष्टमशुद्धिभाजि भवने प्रोक्ताक्षरस्वीकृतिः ॥[९]

रामदैवज्ञेन मुहूर्त्तचिन्तामणौ षष्ठी गृहीता—शिवार्कदिग्द्विषट्‌द्वरत्रिके रवावुदक्' परञ्चेयं मान्यता परम्पराविरोधिनी विद्यते । एतत्तु निर्दिष्टं व्याख्याकारेण—'अत्र निषिद्धापि षष्ठी ग्रन्थकृता स्वीकृतेति तच्चिन्त्यम् ।' अत्र ग्रन्थकारमेवाक्षिपति व्याख्याकारः । तत्तु सर्वथा शास्त्रं प्रति सत्यनिष्ठायाः प्रमाणम् । पुनर्वसौ ब्राह्मणवटूनामुपनयनं न कार्यमिति, यथा राजमार्त्तण्ड :—

'पुनर्वसौ कृतो विप्रः पुनः संस्कारमर्हति' इति । अस्यार्थः केनचित् विधीयते यत्कर्मनाशानदीतरणाद्यनेकदुष्टकृत्येन पुनः संस्कारप्रसक्तोः सत्यां विप्रः पुनर्वसौ पुनः संस्कारमर्हतीति न व्रतबन्धनिषेधः । परञ्चात्र पीयूषधाराकारेण—'अत्र विप्रः कृत इति पदद्वयोपादानादितरयोः क्षत्रियविशोः पुनर्वसौ व्रतबन्धो ब्राह्मणस्य मेखलामोक्षश्च प्रशस्त इत्यर्थः' क्रियते ।

अष्टविधविवाहान् वर्णयित्वा प्रत्युद्वाहविषये पीयूषधारायां विशिष्टवचनं प्रत्तं नारदमुनेः—

'प्रत्युद्वाहो नैव कार्यो नैकस्मै दुहितृद्वयम्' प्रत्युद्वाहस्यार्थो विनिमयविवाहः । मत् पुत्राय चेत्त्वया कन्या दीयते तदा मयापि त्वत्पुत्राय कन्या देयेत्येवं पणबन्धरूपः । कान्यकुब्जभाषया 'गुरावट्' इत्याहुः । अनेन ज्ञायते यद् गोविन्दो महान् अन्वेषकः शास्त्रस्य देशकालयोश्चासीत् ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

यात्राप्रकरणे महाडल-हिवर-धबाड-टेलक-गौरवप्रभृतयो योगाः संगृहीता व्याख्याकारेण तथा निर्देशोऽपि प्रत्तः यदेतत्सर्वं दाक्षिणात्या विचारयन्ति ।

इत्थं प्रतिपदं पीयूषधारायां महती विचारसरणिः दृग्गोचरीभवति । एकां पीयूषधारां सम्यग् ज्ञात्वा फलितमुहूर्त्तयोर्ज्ञानं कर्त्तुं शक्यते विदुषा । व्याकरणस्यापि महानुपयोगः कृतः शास्त्रस्यास्य व्याख्यासाधने । यत्र कुत्रापि मुहूर्त्तसाफल्यं विलोक्यते तत्र सरस्वत्याः प्रसादादेव । पीयूषधारा ज्यौतिषस्य अमृता रचना । अस्याः क्षेत्रं व्यापकं विद्यते धारा च अन्तस्तलावगाहिनी शास्त्रसरितः ॥

प्रसङ्गाः —

१. पीयूषधारा, शुभाशुभप्रकरणम्, मङ्गलश्लोकः ७ ।

२. मुहूर्त्तचिन्तामणिः, गृहप्रवेशप्रकरणम्, श्लोकः १० ।

३. पीयूषधारा, गृहप्रवेशप्रकरणे टीकोत्पत्तिकालवर्णनम् श्लोकः २ ।

४. पीयूषधारा, शुभाशुभप्रकरणम्, मङ्गलश्लोकः १४ ।

५. मुहूर्त्तचिन्तामणिः, मङ्गलश्लोकः १ ।

६. पीयूषधारा, विवाहप्रकरणम्, कर्त्तरीदोषकथने राहुकेत्वोर्ग्रहत्वविचारः ।

७. नक्षत्रप्रकरणं श्लोकः ३८ व्याख्यायाम् ।

८. पीयूषधारा, संस्कारप्रकरणम्, श्लोकः ३७ व्याख्यायाम् ।

९. ,, तत्रैव ,, ,,

ज्यौतिषविभागः, काशी-हिन्दूविश्वविद्यालयः

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

लक्षणायाः शाब्दबोधः

डा० जागृति पंड्या

शब्दस्य तिस्रः शक्तयः—अभिधा, लक्षणा व्यञ्जना चेति। तत्र लक्षणाशक्तिः मुख्याद्भिन्ने उपचरित एवार्थे प्रवर्तते।

इत्थं लक्षणायाः स्वरूपप्रक्रिया दृश्यते। मुख्यार्थबाधे, तद्युक्तः अन्यः अर्थः रूढेः प्रयोजनवशात् वा यया शक्त्या लक्षितो भवति सा आरोपिता क्रिया लक्षणा।

आचार्यमम्मटेन लक्षणा एवं लक्षिता—

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।
अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया॥

—का० प्र०—२-६

लक्षणाप्रवृत्त्यर्थं मुख्यार्थबाधः, तद्योगः अर्थात् मुख्यार्थेन संबद्धः अन्यः अर्थः, तथा च रूढिः प्रयोजनं वा—त्रयमिदं अनिवार्यः समयः।

लक्षणायाः शाब्दबोधविचारणायाः प्राग् पूर्वनिर्दिष्टं कारणत्रितयं प्रथमं स्पष्टीक्रियते।

मुख्यार्थबाधस्तु लक्षणायाः प्रथमः समयः। मुख्यार्थबाधे सत्येव वाक्यस्य अन्वयानुपपत्तिः तात्पर्यानुपपत्तिर्वा जायते। यथा—'कलिङ्गः साहसिकः' इत्यत्र अनुपपन्नः अर्थः लक्षणायाः प्रयोजकः भवति तथा च, 'काकेभ्यो दधि रक्ष्यताम्' इत्यत्र वाक्यार्थस्तु स्पष्टः, अन्वितार्थोऽपि गृह्यते किं तु न एतावदेव अस्य तात्पर्यम्। वस्तुतस्तु सर्वेभ्य अपघातकेभ्य दधि रक्षणीयं इत्यत्राभिप्रेतम्। अतस्तात्पर्यानुपपत्तिरपि लक्षणायाः प्रयोजिका।

'साहित्यदर्पण'स्य 'रुचिरा' टीकायां (पृ० ४२) उक्तम्—

"अन्वयस्य सम्बन्धस्यानुपपत्तिरुपपत्त्यभावः, स च क्वचित् साक्षात् सम्भवाभावमुखेन, क्वचित्पुनः तात्पर्यानुपपत्तिमुखेन तात्पर्या विषयतया वा, इति बोध्यम्।"

'साहित्यदर्पण'स्य टीकाकृता जीवानन्दविद्यासागरेण 'विमला' टीकायां (पृ० ३७) उक्तम्—

"अत एवाहुः 'लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तिः' इति।"

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

पुनश्च क्वचित् अन्वयबाधस्तात्पर्यबाधश्च युगपत् संभवतः यथा-'गङ्गायां घोषः' इत्यत्र अन्वयार्थः प्रतिहतः तथा च घोषस्य शीतत्वपावनत्वादिरूपं यत् तात्पर्यं तदपि सुतरां महत्त्वपूर्णम् ।

यदि तात्पर्यमवगणय्य अन्वयानुपपत्तिरेव लक्षणाया बीजं गृह्येत, तर्हि 'गङ्गायां घोषः' इत्यादौ घोषादिपदानां मत्स्यादि-विषयक लक्षणायां गृह्यमाणायां का हानिः ?

किं त्वेवं गङ्गातटस्य शैत्यपावनत्वरूपं प्रयोजनं न सिद्ध्येत् अत एव 'मुख्यार्थबाध' इत्यनेन अन्वयबाधस्य तात्पर्यबाधस्य चेति द्वयोर्ग्रहणमिष्टम् ।

लक्षणाया द्वौ भेदौ—रूढिमूला प्रयोजनवती च । तत्र प्रथमभेदे अन्वयानुपपत्तिः प्रयोजनमूलायां च तात्पर्यानुपपत्तिरपि दृश्यते । क्वचित्तु तात्पर्यान्वियोर्द्वयोरनुपपत्तिः लक्षणायाः प्रयोजिका भवति ।

अथ यदि मुख्यार्थबाधः पूर्वसमयरूपेण न गृह्यते, तर्हि 'राजत्युमा-वल्लभ…' इत्यत्र व्यञ्जनामात्रेण गम्यः गौरीवल्लभरूपोऽन्योऽर्थः मुख्यार्थश्च सादृश्यसंबंधेन युक्तौ तथा च राज्ञः शिवसदृशासाधारण्यस्य प्रतिपादनरूपं प्रयोजनमपि अस्तीति हेतोर्लक्षणातिव्याप्ता भवेत् । अत एव लक्षणायां मुख्यार्थबाध आवश्यकः ।

अथ तद्योगविचारणा । मुख्यार्थबाधे सत्यपि यदि लक्षणया प्राप्तः अन्योऽर्थः (=लक्ष्यार्थः) मुख्यार्थेन सह युक्तो न स्यात्, तदपि न समीचीनं स्यात्, यतः तद्योगाभावे 'गङ्गायां घोषः' इत्यत्र 'गङ्गा' इत्यनेन पदेन यमुनायास्तटोऽपि लक्षितो भवेत् । तत्तु न युक्तम् । इत्थमपि लक्षणा अतिव्याप्ता भवेत् ।

अथ रूढेः प्रयोजनस्य वा स्थितिः विचार्यते । मुख्यार्थबाधतद्योगयोः संभवेऽपि लक्षणया अन्योऽर्थो रूढिबलाद् प्रयोजनबलादेव वा परिस्फुरति ।

ननु प्रयोजनस्य बोधस्तु लक्षणाप्रवृत्तेरनन्तरं व्यञ्जनया भवति, स तु लक्षणाया हेतुः कथं स्यात् ? अत्र 'साहित्यदर्पण'स्य 'विवृति'—टीकायां (पृ० ३८) एवं दृश्यते—

"अवाचकशब्दप्रयोगः सप्रयोजनक इति सामान्यतः प्रयोजनज्ञानाद्वा" ।

अवाचकपदस्य प्रयोगो विशिष्टप्रयोजनार्थं क्रियते इति सामान्यरूपेण प्रयोजनबोधः फलपूर्वको वर्तते । स च लक्षणायां निमित्तरूपो भवति ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

अर्थात् 'प्रयोजनमस्ति' इत्येतत् साधारणसमयरूपेण पूर्वं ज्ञातं भवति किं तु प्रयोजनस्य विशेषरूपं पश्चाद् व्यञ्जनया ज्ञायते।

केचन टीकाकृतः 'प्रयोजनात्' इत्यस्मिन्पदे व्यस्थिता पञ्चमीविभक्तिः 'प्रयोजनमुद्दिश्य' इत्यर्थे प्रयुक्ता—एव व्याख्यां कुर्वन्ति, 'उद्योत'कारस्तु 'प्रयोजनाभिसन्धिपूर्वकं' इत्येवं व्याख्याति, अर्थात् प्रयोजनेन समं संयुज्य—प्रयोजनानुसन्धानेन—इत्यर्थः। एतन्मते प्रयोजनं लक्षणायाः प्रयोजकतत्त्वं भवति।

इत्थं रूढिः प्रयोजनं वा लक्षणायाः पूर्वसमयरूपेण स्वीकृतम्। तदभावे लक्षणाप्रयोगो न शक्यः। यदि तस्य ग्रहणं न स्यात् तर्हि 'कमले चरणाघातं मुखं सुमुखि तेऽकरोत्' इत्यादौ रूढेः प्रयोजनस्य वा अभावेऽपि चरणाघात इत्यनेन पदेन लक्षणया निर्जितत्वस्य बोधो जायेत, तेन च लक्षणाया अतिव्याप्तिप्रसङ्गो भवेत्। तथा च नेयार्थ इति दोषः निरस्यते।

अतो मुख्यार्थबाधः, तद्योगस्तथा च रूढिः प्रयोजनं वा इत्येतत् त्रयं लक्षणायै अत्यावश्यकम्। तत्र पूर्वौ द्वौ हेतू दण्डचक्रादिन्यायेन मिलित्वा कार्यं कुरुतः किं तु रूढिः प्रयोजनं वा तृणारणिमणिन्यायेन लक्षणाया स्वतन्त्रो हेतुर्भवति।

आचार्यमम्मटेन मुख्यार्थबाधः, तद्योगः, रूढिः प्रयोजनं वा इत्येतेषां त्रयाणां निरूपणं लणणाया निमित्तभागे कृतं तथा च तस्या लक्षणभागे—'अन्योऽर्थोः लक्ष्यते यत्सा लक्षणा' इत्येतावदेवोक्तम्। अर्थात् तत्र तद्योगः इत्येतत् पदं न प्रयुक्तम्। तत्तु अत्यावश्यकं यतस्तदभावे लक्षणायां व्यञ्जनाया अपि प्रबेशो भवेत् लक्षणे च अतिव्याप्तिसंभावना। विश्वनाथेन आचार्यमम्मटस्य दोषं अपहाय लक्षणायाः सुविचारितं शास्त्रीयं लक्षणं कृतम्।

यथा—

मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते।
रूढेः प्रयोजनाद्वासौ लक्षणाशक्तिरर्पिता॥

—सा० द०—२'५

अत्र 'ययाऽन्योऽर्थः प्रतीयतेऽसौ लक्षणा' इत्येतत्तु लक्षणाया लक्षणभागे निरूपितं तथा च मुख्यार्थबाधः, तद्योगः, रूढिः प्रयोजनं वा इत्येतानि त्रीणि तस्या निमित्तकारणानि। अपि च 'अर्पिता शक्तिः' इत्येतेन लक्षणायाः स्वरूपं निर्दिष्टम्।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

विश्वनाथस्य लक्षणालक्षणे प्रयुक्तस्य 'अन्योऽर्थः' इत्येतस्य पदस्य शक्यतावच्छेदकातिरिक्तधर्मावच्छिन्नत्वरूपोऽर्थोऽभिप्रेतः। यतः स एव लक्ष्यार्थरूपो भवितुमर्हति, न तु मुख्यार्थभिन्नोऽर्थः। यदि तु मुख्यार्थभिन्नोऽर्थः अभिप्रेतः स्यात् तर्हि 'कदली कदली…' इत्यादौ लक्षणा न स्यात् तथा च लक्षणं अव्याप्तं भवेत्। अतोऽन्योऽर्थं इत्येतेन मुख्यार्थधर्माद्भिन्नधर्मवान् इत्यर्थोऽवगन्तव्यः।

आचार्यमम्मटेन यदुक्तम्—'अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया।' इत्यस्मिन् लक्षणे 'यत्' इति पदस्य अभिप्रायं स्फुटीकुर्वन् झलकीकारः एवं अभिदधाति—

"यदिति ययेत्यर्थं…………यया (वृत्त्या) अन्योऽर्थः अर्थान्तरं (मुख्यभिन्नः) तटादिरूप इति यावत्। लक्ष्यते प्रतिपाद्यते सा (वृत्तिः) लक्षणेत्युच्यते इत्यर्थः।

यद्वा—यदिति लक्षणक्रियाविशेषणम्। अन्योऽर्थो यत् लक्ष्यते यत् प्रतिपाद्यते सा लक्षणेत्यन्वयः।"

—का० प्र०, पृ० ४०

एवं अन्यार्थस्य प्रतिपत्तौ हेतुभूतः शब्दव्यापारो लक्षणा इत्यभिधीयते। 'लक्षणा आरोपिता क्रिया' इत्यस्य व्याख्यानमधुना आरभ्यते।

झलकीकरेण निर्दिष्टं (पृ० ४०) यत् आरोपिता क्रिया इत्येतेन लक्षणायाः स्वरूपं दर्शितं तत्तु न लक्षणघटकम्।

साक्षात्सम्बन्धेन लक्षणा मुख्यार्थे एव वर्तते किं तु परम्परया सा शब्दे प्रतिष्ठिता। अतः सा 'आरोपिता क्रिया' इत्यभिधीयते।

विश्वनाथेनाप्युक्तम्—

"सा शब्दस्यार्पिता स्वभाविकेतरा ईश्वरानुद्भाविता वा शक्तिर्लक्षणा नाम।"

—सा० द०, पृ० ३८

लक्षणाशक्तिर्न स्वाभाविकी। अतः स्वाभाविकाभिधया भिन्नत्वात् सा स्वाभाविकेतरा इति मन्यते।

ये च केचिदभिधामीश्वरोद्भावितां मन्यन्ते, तेषां मतेन लक्षणा ईश्वरानुद्भाविता। यद्यपि व्यञ्जना अपि स्वाभाविकेतरा ईश्वरानुद्भाविता च वर्तते तथापि तस्यां लक्षणालक्षणस्य अतिव्याप्तिप्रसङ्गो न भवति। यतः

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

'अर्पिता शक्तिः' इत्येतेन लक्षणायाः स्वरूपमेव निर्दिष्टं, न तु तस्या व्यावर्तको धर्मः।

'अर्पिता' इत्येतस्य पदस्य टीकाकृद्भिः 'आरोपिता' इत्यर्थः कृतः। मम्मटादिभिश्च लक्षणा आरोपिता क्रिया एवेत्युक्तम्।

यतो लक्षणा व्यापाररूपा, तस्मात् 'क्रिया' इत्यभिहिता। कैश्चित् 'यत्' पदं क्रियाविशेषणत्वेन गृहीतम्।

उक्तं च—

"यत् लक्ष्यते यत् प्रतिपाद्यते सा प्रतिपत्तिरेव (ज्ञानमेव) लक्षणा।" तत्तु न साधु यतः सा तु व्यापाररूपा एव। सा खलु वृत्तिः। ज्ञानं तु वृत्तिजन्यं इति विशेषः। तस्मात् ज्ञानं 'लक्षणा' इति वचनं न समीचीनम्। 'प्रतीतिर्लक्षणोच्यते' इति विधानेन सह आपाततो विरोधो लक्ष्यते। तस्य समाधानं तु—"प्रतीयते अनया इति प्रतीतिः" इति व्युत्पत्त्या भवति।

एवं लक्षणायाः शाब्दबोधे इमे अर्थाः मुख्यत्वेन गृह्यन्ते।

प्रसङ्गग्रन्थाः —

१. काव्यप्रकाशः (का० प्र०)—
झलकीकरविरचितया बालबोधिन्याख्यटीकया समन्वितः, भाण्डारकर-प्राच्यविद्या संशोधनमंदिर, पुणे द्वारा प्रकाशितः, अष्टम्यावृत्तिः, १९८३

२. साहित्यदर्पणः (सा० द०)—
श्रीरामचरण-तर्कवागीश-भट्टाचार्यकृतया विवृत्या समेतः, दुर्गाप्रसाद द्विवेदिना संपादितः, मेहरचन्द लछमनदास इत्यनेन नई दिल्लीतः प्रकाशितः, १९८२

३. साहित्यदर्पणः —
शिवदत्तशर्मणः रुचिराख्यया व्याख्यया समेतः, क्षेमराज श्रीकृष्णदास— श्रेष्ठिना श्रीवेङ्कटेश्वर स्टीम मुद्रणमन्त्रालये प्रकाशमानीतः, १९१७

४. साहित्यदर्पणः —
श्रीमज्जीवानन्दविद्यासागरभट्टाचार्येण विरचितया विमलाख्यया टीकया समेतः, कलिकातामहानगर्या प्रकाशितः, सप्तमं संस्करणम् १९१६

संशोधन-सहायिका, महर्षिवेदविज्ञान—
अकादमी, अमदाबाद—१५

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

ग्रन्थसमीक्षा

भरटकद्वात्रिंशिका

सम्पादकः—प्रो० राधावल्लभ त्रिपाठी, एम०ए०, पी-एच्०डी०, डी०लिट्०,
संस्कृत—विभागाध्यक्षः, डा० हरिसिंह-गौर-विश्वविद्यालये, सागरम्

प्रकाशकः—संस्कृत-परिषद्, विश्वविद्यालयः, सागरम्।

मूल्यम्—१५) रूप्यकाणि।

साहित्यस्य विस्मृतप्रायग्रन्थानन्विष्यान्विष्या तेषां प्रकाशनस्य प्रवृत्तिः प्रारम्भादेव त्रिपाठिमहाभागस्य विद्यते। अन्यान्य-ग्रन्थानामिव भरटकद्वात्रिंशिकाया अप्यन्वेषणं कृत्वा तस्यसम्पादनस्य प्रकाशनस्य च तिमहत्त्वपूर्णं कार्यं तेन कृतम्।

भरटकद्वात्रिंशिका संस्कृत-साहित्ये मुग्धकथानां संकलनं विद्यते। कथा-साहित्यस्य महत्त्वपूर्णोऽयं ग्रन्थः पञ्चतन्त्र-वेतालपञ्चविंशति-शुकसप्ततीनां कथाश्रृंखलायां नूतन-सन्दर्भान् युनक्ति। अस्मिन् कथासंग्रहे शिवभक्तानां सम्प्रदायविशेषस्य कृते 'भरटक' इति शब्दस्य प्रयोगः सम्भवतो भरटका जडभरतस्य परम्परायाः साधव आसन्, व्यवस्थातो बहिर्गता, एवं चोपहासास्पदं जाताः। एतेषां मूर्खाणामेव यथानाम द्वात्रिंशत् कथा अस्मिन् कथासंग्रहे विलसन्ति मनोरञ्जनस्य पर्याप्तसामग्रीं च प्रयच्छन्ति। भरटकद्वात्रिंशत्कथा-साहित्यस्यानुपमा कृतिरस्ति। सा कथाया वाचिकपरम्परायाः स्वरूपमस्मत्समक्षं प्रस्तौति। चतुर्दशशताब्दे-विरचिग्रन्थेऽस्मिन् मध्यकालीन-समाजस्य सजीवचित्रणं विद्यते, येनास्माकं सामाजिकेतिहासस्याध्ययनाय महत्त्वपूर्णोऽयं ग्रन्थः।

जर्मनभाषातिरिक्तमन्यस्यां कस्यामपि भाषायां भरटकत्रिंशिकाया अनुवादोऽद्यावधि नाभूत्। हिन्दी-भाषयाथवान्यथापि अलब्धस्य कथासाहित्यस्यायमज्ञातो निधिः। अनेन प्रकाशनेन भारतवर्षे विदुषां समक्षं प्राथम्येन गच्छति। ग्रन्थोऽयं पाठकानां मनस्यानन्दं जनयिष्यति, तैः प्रशंसितश्च भविष्यतीति विश्वसिमः।

Sanskrit ... Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

नवस्पन्दः

सम्पादक —प्रो० राधावल्लभत्रिपाठी, सागरम्।

प्रकाशकः—मध्यप्रदेश-हिन्दी-ग्रन्थ-अकादमी, भोपालः

मूल्यम्--षड्रूप्यकाणि।

प्रथमं संस्करणम्—१६८८

नवस्पन्दे ऽद्यतनानां षण्णां श्रेष्ठकवीनामप्पाशास्त्रि राशिवडेकर-पंडिता-क्षमाराव—वेंकटव राघव–जानकीवल्लभशास्त्री–जगन्नाथपाठक–श्रीनिवास-रथ-महाभागानां काव्यानां संकलनं विद्यते। एते कवयो संस्कृत-साहित्य-स्योत्कृष्ट-रचयितारः सन्ति।

ग्रन्थस्य कविता मनोहारिण्यः रसपूर्णाश्च विलसन्ति। एतासु कुत्र-चिद् भारतीय-स्वतन्त्रतासंग्रामस्य युगे राष्ट्रस्य जागरणस्य नवयुग-स्यानुभूतीनां च सुन्दरं चित्रणं विद्यते, कुत्रचिदृतुवर्णनस्य छटा विराजते, कुत्रचित् खय्यममहोदयस्य "रुबाईनां निर्झरिणी झरति, कुत्रचिच्च नवीन-गीतस्य शैलीमाध्यमेन समकालीनसमाजस्य द्वन्द्व-संशय-विसंगत्यादीनां मार्मिक्यभिव्यक्तिर्विद्यते। ग्रन्थस्य काश्चित् कविताः प्रबन्धात्मकरचनाभ्य उद्धृताः सन्ति काश्चित्स्वतन्त्ररूपेण विरचिताः सन्ति।

खण्डत्रयात्मकस्यास्य ग्रन्थस्य प्रथमे खण्डे कवीनां परिचयः, द्वितीये खण्डे तेषां रचनास्तृतीये च तासां रचनानां हिन्दीभाषयानुवादोऽस्ति मध्यप्रदेशस्य विश्वविद्यालयेषु बी०ए० अन्तिमवर्षस्य विद्यार्थिमकीकृतपाठ्यक्रमस्यान्त-र्गतं द्रुतपाठाय निर्धारितेनानेन संकलनेन विद्यार्थिनः संस्कृत-साहित्यास्याधु-निककाव्यपरम्परामपि सम्यग्रूपेणात्मसात्कर्तुं शक्नुवन्तु। काव्यमर्मज्ञेन विदुषा सम्पादकेनैतदपि विचार्य कठिनशब्दानामर्थो यथास्थानं लिखितः। संकलनमिदं यथानाम पाठकेषु नवस्पन्दं जनयिष्यतीति विश्वासिमः।

कुसुमभूरिया
प्रवाचिका संस्कृतविभागे
हरसिंह-गौर-सागर-विश्वविद्यालयः
सागरम्

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

This PDF you are browsing now is in a series of several scanned rare books and manuscripts from Sanskrit Academy, Hyderabad.

Address:

Manikeshwar Nagar Kaman,

Osmania University, Tarnaka,

Hyderabad, Telangana, 500007

https://sanskritacademy.net/

https://archive.org/details/@sanskrit_academy_hyd

The Academy is currently led by Director Shri Madhushan Penna.

His CV:

Prof. Penna madhusudan,

Director Sanskrit Academy, Hyderabad

Areas of interest

Yoga shastra, nyaya, yoga and vedanta philosophy.

Works

3 mahakavyas, 10 laghukavyas, 30 translations and 140 edited books

Sahitya Academy Awardee for Mahakavya on Gulabrao Maharaj.

Translated the Marathi Jnaneshwari in 9000 Sanskrit shlokas.

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

Honours

Honorary D.Litt by National Sanskrit University, Tirupati AP. for his unique contribution in Indian Philosophy.

-Vachaspati

-Yoga Ratna

-Shastra nidhi

-Utkrisht Sanskrit Pandit

-Yajna Surabhi

-Shastri (Karavir Peeth)

-Shastra Ratnakara

Awards

- Sahitya Academy award
- Maharashtra govt sadhana award
- Pt. Satvalekar award
- Pt. Latkar shastri award
- Pt. Ghatate award
- Somnath Trust Award with Gold Medal and title of Best Scholar
- Sribhashyam national award

and many other.

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

Foreign Travel

The Netherlands, Canada for World Sanskrit Conference 2018.

Indian embassy, Nepal 2023

DVDs on yoga, Indian philosophy and Sanskrit Literature.

mspenna67@gmail.com

Digitization by eGangotri Trust/Sarayu Trust, New Delhi

Funding for Digitization: Shri Ravi Parimi, Hyderabad

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna